संस्कृत-व्याख्या—सा = प्रसिद्धा, भीमनरेन्द्रनन्दना = दमयन्ती, निजरूपसम्पदाम् = स्वसौन्दर्यसम्पत्तीनाम्, अनुरूपे = योग्ये, बहुशः = अनेकेभ्यः, श्रुतिम् = श्रवणम्, गते = प्राप्ते, तस्मिन्, नृपे = नले, मनोभवाज्ञैकवशंवदम् = मनोभवस्य कामस्य आज्ञायाः आदेशस्य एकं मुख्यं वशंवदम् = प्रवणम्, मनः = चित्तम्, विशिष्य = अतिशयेन, दिदेश = निदधौ। नलगुणश्रवणात् नलासक्तचित्तासीदित्यभिप्रायः।

हिन्दी-व्याख्या—सा=वह (उस), भीमनरेन्द्रनन्दना=राजा भीम की पुत्री दमयन्ती ने, निजरूपसम्पदाम्=अपने सौन्दर्य या शोभा के, अनुरूपे=अनुरूप अथवा योग्य, तथा, बहुशः=अनेक व्यक्तियों से अथवा अनेकबार, श्रुतिं गते=सुने

गये हुये, तस्मिन् नृपे = उस राजा नल के प्रति, मनोभवाज्ञैकवशंवदम् = कामदेव की आज्ञा के एकमात्र वशीभूत, मनः = मन को, विशिष्य = अतिशय-रूप से, दिदेश = लगा दिया।

भावार्थ—राजा भीम की पुत्री दयमन्ती ने चारण-वन्दी आदि जनों के मुखों से अनेकबार राजा नल के गुणों तथा प्रशंसा आदि को सुना था और तदनुसार यह समझ लिया था कि यह राजा नल सौन्दर्य आदि की दृष्टि से उस के पतिके रूप में स्वीकार किये जाने योग्य है। अतः उसने अपने काम के वशीभूत हुये मन को राजा नल की ओर लगा दिया था। कहने का तात्पर्य यह है कि कामदेव ने जब यह देखा कि राजा नल दमयन्ती के लिये सुयोग्य वर है तो उसने दमयन्ती के मन पर अपना प्रभाव डाला और उसके मन को अपने अधीन कर लिया। दमयन्ती तो पहले से ही राजा नल की ओर आसक्त थी ही। अतएव कामदेव के प्रभाव के कारण उसका मन राजा नल से मिलने हेतु प्रतिक्षण और भी उद्विग्न हो उठा।

अलङ्कार—इस पद्य में "अनुप्रास" अलङ्कार है।

व्याकरण—**नन्दना** = नन्द + णिच् + ल्यु (नन्दिग्रहिपचादिभ्यो ल्युणिन्यचः—इस सूत्र से), + टाप्। **बहुशः** = बहु + शस्—यहाँ "बह्वल्पार्थाच्छस्कारकादन्यतरस्याम्" से अपादान अर्थ में। तथा ("अनेकवार"–अर्थ की दृष्टि से—) "संख्यैकवचनात्" से "शस्" प्रत्यय होता है। **श्रुतिम्** = श्रु + क्तिन्। **वशंवदम्** = वश (उपपद) + वद् + खच्—यहाँ "प्रियवशे वदः खच्" से 'खच्' प्रत्यय तथा "अरुर्द्विषदजन्तस्य मुम्" से मुम् का आगम होता है। **दिदेश** = दिश् + लिट् (तिप्)—णल्।

समास—**भीमनरेन्द्रनन्दना** = भीम एव नरेन्द्रः भीमनरेन्द्रः (कर्मधारय) तस्य नन्दना (षष्ठी तत्पु०)। **निजरूपसम्पदाम्** = निजं रूपम् निजरूपम् (कर्मधारय) तस्य सम्पदः (षष्ठी तत्पु०) तासाम्। **अनुरूपे** = रूपं अनुगतः अनुरूपः तस्मिन्। **श्रुतिम्** = श्रूयते अनया इति श्रुतिः ताम्। **मनोभवाज्ञैकवशंवदम्** = मनसः मनसि वा भवतीति अथवा मनसः भवः उत्पत्तिर्यस्य स मनोभवः (बहुव्रीहि) तस्य आज्ञा (तत्पु०)। वशंवदतीति वशंवदम्, एकं वशंवदम् इति एकवशंवदम् (कर्मधारय) मनोभवाज्ञायाः एकवशंवदम्—मनोभवाज्ञैकवशंवदम् (षष्ठी तत्पु०)।

टिप्पणियाँ—**भीमनरेन्द्रनन्दना** = राजा भीम की पुत्री—दमयन्ती।

निजरूपसम्पदाम् = अपने रूपरूपी सम्पत्तियों के अर्थात् अपने सौन्दर्य के। **अनुरूपे** = अनुरूप, योग्य। **बहुशः** = अनेक व्यक्तियों से [चारण, वन्दी आदि जनों से) अथवा–अनेकबार। **श्रुतिं गते** = श्रवणोचर हुये अथवा सुने गये हुये। **मनोभवाज्ञैकवशंवदम्** = कामदेव की आज्ञा के वश में विद्यमान— अर्थात् जिसका मन कामदेव की आज्ञा पर ही आधारित हो गया था। **विशिष्य** = विशेषरूप से। **दिदेश** = लगा दिया, प्रेरित किया।

प्रसङ्ग—जब स्तुतिपाठकर्त्ता चारण आदि भीम के समीप आते थे तब दमयन्ती भी अपने पिता के पास आकर बैठ जाती थी और जब वे अन्य राजाओं का गुणगान करते हुये राजा नल का भी यशोगान करना प्रारम्भ करते थे तो दमयन्ती अति हर्षित होती थी और उसे रोमाञ्च भी हो जाता था—

उपासनामेत्य पितुस्स्म रज्यते दिने दिने सावसरेषु वन्दिनाम्।
पठत्सु तेषु प्रति भूपतीनलं विनिद्ररोमाजनि शृण्वती नलम्॥ ३४॥

म०—अथास्याः श्रवणानुरागमेव चतुर्भिर्वर्णयति–उपासनामित्यादि। सा भैमी दिने दिने प्रतिदिनं 'नित्यवीप्सयोरि'ति वीप्सायां द्विर्भावः। वन्दिनां स्तुतिपाठकानामवसरेषु पितुरुपासनां सेवामेत्य प्राप्य तेषु वन्दिषु भूपतीन् प्रति भूपतीनुद्दिश्य पठत्सु सत्स्विति शेषः। नलं शृण्वती अलं रज्यते स्म रक्ताऽभूदित्यर्थः। रञ्जेर्दैवादिकाल्लट्। अतएव विनिद्ररोमा रोमाञ्चिता अजनीति सात्त्विकोक्तिः। जनेः कर्त्तरि लुङ् 'दीपजने'त्यादिना च्लेश्चिणादेशः। नलगुणश्रवणजन्यो रागस्तस्य रोमाञ्चेन व्यक्तोऽभूदिति भावः॥ ३४॥

अन्वय—सा दिने दिने वन्दिनां अवसरेषु पितुः उपासनां एत्य तेषु भूपतीन् प्रति पठत्सु नलं शृण्वती अलं रज्यते स्म, विनिद्ररोमा अजनि।

संस्कृत-व्याख्या—सा = दमयन्ती, दिने दिने = प्रतिदिनम्, वन्दिनाम् = स्तुतिपाठकानाम्, अवसरेषु = समयेषु, पितुः = भीमस्य, उपासनाम् = सेवाम्, एत्य = प्राप्य, तेषु = वन्दिषु, भूपतीन् = राज्ञः, प्रति = उद्दिश्य, पठत्सु = स्तुतिपूर्वकं वदत्सु सत्सु, नलम् = निषधपतिम्, शृण्वती = आकर्णयन्ती अलम् = अत्यर्थम्, रज्यते स्म = अनुरक्ता बभूव; विनिद्ररोमा = रोमाञ्चिता, अजनि = जाता। तस्याः रोमाञ्चेन नलगुणश्रवणजन्यः रागः व्यक्तः अभूदिति भावः।

हिन्दी-व्याख्या—सा = वह [दमयन्ती], दिने दिने = प्रतिदिन,

वन्दिनाम् = वन्दियों के (राजाओं की प्रशंसा करने के) अवसरेषु = अवसरों पर, पितुः = अपने पिता भीम के, उपासनाम् = समीप, एत्य = आकर, तेषु = उन [वन्दियों] के, भूपतीन् प्रति = राजाओं के विषय में, पठत्सु = गुणगान [प्रशंसा आदि] करने पर, नलम् = राजा नल के बारे में, शृण्वती = सुनती हुयी, अलम् = पूर्णरूप से [पर्याप्त रूप से], रज्यते स्म = प्रसन्न होती थी, तथा, विनिद्ररोमा = रोमाञ्चयुक्त, अजनि = हो जाती थी। अर्थात् राजा नल के गुण और उनकी प्रशंसा सुनकर राजा नल के प्रति विद्यमान उसका प्रेम उसके शरीर में उत्पन्न हुये रोमाञ्च द्वारा स्पष्ट हो जाया करता था।

भावार्थ—राजा भीम के समीप जब भाट-चारण आदि वन्दीगण आकर उपस्थित हुआ करते थे तो वह दमयन्ती भी अपने पिता के समीप आकर बैठ जाया करती थी और जब वे वन्दीगण अन्य राजाओं का गुणगान आदि किया करते थे तो उस समय वह नल सम्बन्धी गुणों का वर्णन ध्यान पूर्वक सुना करती थी तथा मन ही मन अत्यधिक हर्षित होती थी। यहाँ तक कि हर्षाधिक्य के कारण उसका शरीर रोमाञ्चयुक्त हो जाता था।

कहने का तात्पर्य यह है कि दमयन्ती के अन्दर नल-विषयक श्रवणानुराग नामक सात्विक भाव जाग्रत हो जाता था।

अलङ्कार—उक्त पद्य में राजा नल के बारे में श्रवण करने में अनुराग और तदनन्तर सात्विक-भाव के उदित होने में "भावोदय" नामक अलङ्कार है।

व्याकरण—**दिनेदिने** = इस स्थल पर "नित्यवीप्सयोः" सूत्र से वीप्सा अर्थ में द्वित्व हुआ है। **उपासनाम्** = उप + आस् + "ण्यासश्रन्थो युच्" से युच् और तदनन्तर यु के स्थान पर अन हुआ है। **एत्य** = आ + इ + क्त्वा—ल्यप्। **रज्यते स्म** = रञ्ज् + लट्—यहाँ भूत-अर्थ में "स्मे लट्" से लट् लकार हुआ है। **अजनि** = जन् (दिवादिगणी) + लुङ् लकार [प्रथम पुरुष एकवचन का रूप]।

समास—**विनिद्ररोमा** = विनिद्राणि रोमाणि यस्याः सा (बहुव्रीहि)।

टिप्पणियाँ—**दिनेदिने** = प्रदि दिन। **वन्दिनाम्** = स्तुति पाठ करने वाले अथवा विरुदावली का गान करने वाले भाट-चारण आदि के। **अवसरेषु** = अवसरों अथवा समयों पर—अर्थात् विभिन्न राजाओं के गुण-गान के अवसरों पर। **उपासनम्** = समीपता को। **एत्य** = प्राप्त करके। **पठत्सु** = पाठ करते हुये अथवा पढ़ते हुये होने पर—गुणगान करते हुये होने पर।

रज्यते स्म = अनुराग युक्त हो जाती थी अर्थात् दमयन्ती का हृदय राजा नल के प्रति उत्पन्न हुये अनुराग से परिपूर्ण हो जाता था। अलम् = पर्याप्तरूप से अथावा अत्यधिक रूप से। विनिद्ररोमा = पुलकायमान शीर से युक्त अथवा रोमाञ्चित। अजनि = हो जाती थी।

प्रसङ्ग—परस्पर वार्त्तालप के प्रसङ्ग सें सखी के मुख से 'नल' नामक घास का भी नाम सुन लेने पर वह (दमयन्ती) तुरन्त ही अपने कानों को उस ओर लगा देती थी—

कथाप्रसङ्गेषु मिथस्सखीमुखात्तृणेऽपि तन्व्या नलनामनि श्रुते।
द्रुतं विधूयान्यदभूयतानया मुदा तदाकर्णनसज्जकर्णया॥ ३५॥

म०—कथेति। मिथोऽन्योऽन्यं रहसि कथाप्रसङ्गेपु विस्रम्भगोष्ठीप्रसङ्गेपु सखीमुखान्नलनामनि नलाख्ये तृणे श्रुते सति 'नलः पोटगले राज्ञी'ति विश्वः। अनया तन्व्या दमयन्त्या द्रुतमन्यत् कार्यान्तरं विधूय निराकृत्य मुदा हर्षेण तदाकर्णने नलशब्दाकर्णने सज्जकर्णया दत्तकर्णया अभूयत अभावि। 'भुवो भावे' लङ्। अर्थान्तरप्रयुक्तोऽपि नलशब्दो नृपस्मारकतया तदाकर्षकोऽभूदिति रागातिशयोक्तिः॥ ३५॥

अन्वय—मिथः कथाप्रसङ्गेपु सखीमुखात् नलनामनि तृणे अपि अनया तन्व्या द्रुतं अन्यत् विधूय मुदा तदाकर्णनसज्जकर्णया अभूयत।

संस्कृत-व्याख्या—मिथः = परस्परम्, कथाप्रसङ्गेपु=विस्रम्भगोष्ठी प्रसङ्गेपु, सखीमुखात् = सख्याः वयस्यायाः मुखात् आननात्, नलनामनि = नलाख्ये, तृणे अपि = तृणविशेषेऽपि, श्रुते = आकर्णिते, सति, अनया तन्व्या = दमयन्त्या, द्रुतम् = शीघ्रमेव, अन्यत् = इतरत् कार्यं, विधूय = त्यक्त्वा, मुदा = हर्षेण, तदाकर्णनसज्जकर्णया = तस्य नलशब्दस्य आकर्णने श्रवणे सज्जकर्णया दत्तकर्णया, अभूयत = अभावि। अर्थान्तरप्रयुक्तः अपि नलशब्दः राज्ञः नलस्य स्मारकतया तदाकर्षकोऽभूदिति भावः।

हिन्दी-अनुवाद—मिथः = परस्पर, कथाप्रसङ्गेपु = वार्त्तालाप के प्रसङ्ग में, सखीमुखात् = सखी के मुख से, नलनामनि = 'नल' नामक [नरसल], तृणे = घास के विषय सें अपि = भी, श्रुते = सुन लेने पर, अनया तन्व्या = यह कोमल अङ्गों वाली दमयन्ती, द्रुतम् = तुरन्त, अन्यत् = दूसरी बात अथवा दूसरे कार्य को, विधूय = छोड़कर, मुदा = हर्ष से, तदाकर्णनसज्जकर्णया = उसको ही सुनने के लिये उद्यत कानों वाली, अभूयत् = हो जाती थी।

भावार्थ—आपस में वार्त्तालाप के अवसरों पर अपनी सखी के मुख से तृण (नरसल नामक घास) के बारे में भी 'नल' नाम सुनकर कृशाङ्गी दमयन्ती तुरन्त ही अन्य बातचीत अथवा कार्य को छोड़कर ["मेरी यह सखी मेरे प्रियतम 'नल' की ही चर्चा कर रही है" ऐसा समझ कर] उस बात को सुनने में ही दत्तचित्त हो जाती थी।

यदि कभी वार्त्तालाप करती हुयीं दमयन्ती की सखियाँ प्रसङ्गवश 'नल' नामक घास का नाम भी ले लेती थीं तो दमयन्ती, यह समझ कर कि ये राजा नल के बारे में कुछ कह रही हैं, सब कार्यों का त्याग कर उनकी बातों की ही ओर अपने कानों को लगा दिया करती थी।

इस वर्णन से दमयन्ती का नल के प्रति अनन्य प्रेम ही अभिव्यक्त होता है।

अलङ्कार—इसमें 'अतिशयोक्ति' नामक अलङ्कार है।

व्याकरण—तन्व्या=तनु + ङीष = तन्वी (तृतीया एकवचन में-तन्व्या)।, **प्रभूयत्** = भू + लङ् (भाव में) प्रथम पुरुष-एकवचन का रूप।

समास—**कथाप्रसङ्गेषु** = कथायाः प्रसङ्गः इति कथाप्रसङ्गः तेषु। **सखीमुखात्** = सख्याः मुखात्-इति। **तदाकर्णनसज्जकर्णया** = तस्य आकर्णनम् (षष्ठी तत्पु०) इति तदाकर्णनम् तस्मिन् सज्जौ कर्णौ यस्याः सा तदाकर्णनसज्जकर्णा (बहुव्रीहि) तया।

टिप्पणियाँ—**मिथः** = परस्पर, आपस में अथवा एकान्त में। **कथाप्रसङ्गेषु** = कथा अथवा बातचीत के प्रसङ्ग में। यहाँ "कथानुषंगेषु" पाठभेद भी है। **नलनामनि** = नल नामक अथवा नरसल या नरकट नामक। **तृणे** = घास का नाम लेने पर। **श्रुते** = सुन लेने पर। **तन्व्या** = कोमल अङ्गोंवाली दमयन्ती के द्वारा। **द्रुतम्** = शीघ्र ही, तत्काल ही, तुरन्त ही। **विधूय** = छोड़ कर अथवा त्यागकर। **मुदा** = हर्ष से, प्रसन्नता से—"मुत्प्रीतिः प्रमदो हर्षप्रमोदामोदसम्मदाः" इत्यमरः। **तदाकर्णनसज्जकर्णया** = 'नल' शब्द के श्रवण करने में लगादिया है अपने कानों को जिसने—ऐसी (दमयन्ती)। **अभूयत** = हो जाती थी।

प्रसङ्ग—सौन्दर्य में उसकी सखियाँ स्मृत-कामदेव के स्थान पर उपमान के रूप में राजा नल का ही नाम प्रस्तुत किया करती थीं—

स्मरात्परासोरनिमेषलोचनाद् बिभेमि तद्भिन्नमुदाहरेति सा ।
जनेन यूनः स्तुवता तदास्पदे निदर्शनं नैषधमभ्यषेचयत् ॥३६॥

म०—स्मरादिति । परासोर्मृतात् अत एवानिमेषलोचोनान्निश्चालाद्याहे-वादिति च गम्यते । उभयथापि भयहेतूक्तिः । तस्माद्बिभेमीति तद्भिन्नं ततोऽन्यमुदाहरेति तत्सदृशं निदर्शयेत्याह सा दमयन्ती यूनः स्तुवता जनेन प्रयोगकर्त्रा तदास्पदे स्मरस्थाने निदर्शनं दृष्टान्तं नैषधं निषधानां राजानं नलं 'जनपद-शब्दात्क्षत्रियादञ्' । अभ्यषेचयत् स्मरस्य स्थाने तत्सदृश एवाभिषेक्तुं युक्तः । स च नलादन्यो नास्तीति तस्मिन् नल उदाहृतेऽनुतर्षं शृणोतीति रागाति-रेकोक्तिः । 'उपसर्गात् सुनोती'त्यादिना अड्व्यवायेऽपि षत्वम् ॥ ३६ ॥

अन्वय—परासोः अनिमेषलोचनात् स्मरात् बिभेमि । "तत् भिन्नं उदाहर" इति सा यूनः स्तुवता जनेन तदास्पदे नैषधं निदर्शनं अभ्यषेचयत् ।

संस्कृत-व्याख्या—परासोः=मृतात्, अनिमेषलोचनात्=निमेषरहितनेत्रात्, स्मरात्=कामात्, बिभेमि=भयमनुभवामि । तत् = तस्मात् कामात्, भिन्नम् = अन्यम्, उदाहर = निदर्शय, इति = अनेन प्रकारेण, सा = दमयन्ती, यूनः=युवा-पुरुषान्, स्तुवता=प्रशंसता, जनेन=प्रयोज्यकर्त्रा, तदास्पदे=स्मरस्थाने, नैषधम्= निषधानां राजानं नलम्, निदर्शनम् = दृष्टान्तम्, अभ्यषेचयत् = स्थापयामास ।

हिन्दी-अनुवाद—परासोः = मृत अथवा निष्प्राण, अनिमेषलोचनात् = निर्निमेष नेत्रों वाले, स्मरात् = कामदेव से [मैं], बिभेमि = डरती हूँ । [अतएव] तद्भिन्नम् = उससे भिन्न किसी अन्य का, उदाहर = उदाहरण दो । इति = इस प्रकार, सा = उस दमयन्ती ने, यूनः = यूवकों की, स्तुवता = प्रशंसा करने वाले, जनेन = [सखी] जन से, तदास्पदे = उस कामदेव के स्थान पर, नैषधम् = निषधदेश के राजानल को, निदर्शनम् = उदाहरण अथवा दृष्टान्त के रूप में, अभ्यषेचयत् = अभिषिक्त कराया ।

भावार्थ—"मृत (अतएव) निर्निमेष नेत्रों वाले कादेव से मैं डरती हूँ । अतः कोई अन्य उदाहरण प्रस्तुत करो" ऐसा कहकर उस दमयन्ती ने युवा पुरुषों की प्रशंसा करते हुये (सखी) लोगों के द्वारा कामदेव के स्थान पर नल को अभिषिक्त कराया ।

दमयन्ती की सखियाँ सुन्दर युवा व्यक्तियों की प्रशंसा करती हुयी उनकी उपमा कामदेव से दिया करती थीं । किन्तु दमयन्ती राजा नल के प्रति अनुराग रखने के कारण युवकों के वर्णन में उपमा के रूप में राजा नल का ही नाम

सुनना चाहती थी। अतः वह अपनी सखियों से कहती थी कि मुझे मरे हुये तथा निमेषरहित कामदेव से भय प्रतीत होता है। अतः तुम लोग उपमान कामदेव के स्थान पर किसी अन्य का नाम लो। कामदेव के स्थान पर लोक में उपमान होने योग्य नल के अतिरिक्त अन्य कोई व्यक्ति था ही नहीं अतः उसकी सखियाँ राजा नल का ही नाम उपमान के स्थान पर प्रस्तुत कर देती थीं। इस भाँति दमयन्ती अपने अभिलषित को अप्रकट रूप से करा लेती थी।

शिव जी द्वारा कामदेव को भस्म कर दिया गया था। अतः वह मृत थे मृत व्यक्ति का निमेषशून्य होना स्वाभाविक ही है। इसके अतिरिक्त कामदेव को भी देवताओं की श्रेणी में रखा जाता है। देवगण निमेषशून्य होते ही हैं।

जब किसी राजा आदि विशिष्ट व्यक्ति की मृत्यु हो जाया करती है तब उसके स्थान पर किसी अन्य विशिष्ट व्यक्ति को अभिषिक्त किया जाता है। कामदेव को तो शिव द्वारा भस्म किया ही जा चुका है। अतएव वे मृत हैं। उनके स्थान पर किसी अन्य अनुपम सुन्दर व्यक्ति का नाम उपमान रूप में लिया जाना आवश्यक ही था। अतः उसके स्थान पर अपूर्व सौन्दर्य युक्त नल का नाम लेना उचित ही है।

अलङ्कार—कामदेव देवता होने से निमेषशून्य हैं। उसे यहाँ मरा हुआ अतएव निमेषशून्य होने तथा उससे भय-भीत होने सम्बन्धी "उत्प्रेक्षा" की गयी है।

महाकवि ने जिस कामदेव को यहाँ मृतक रूप में प्रस्तुत किया है। उसी के स्थान पर "तदास्पदे" पद का प्रयोग कर नल को प्रस्तुत किया है। अत एव इस स्थल पर अमङ्गलसूचक अश्लील दोष आ गया है।

व्याकरण—उदाहर = उद् + आ + हृ + लोट्—सिप्—हि—लुक् । **स्तुवता** = स्तु + लट् = शतृ = स्तुवन् (तृतीया एकवचन का रूप)। **निदर्शनम्** = नि + दृश् + णिच् + ल्युट्—अन। **नैषधः** = निषध + अण् ("तस्येदम्" से)॥ **स्मरात्** = यहाँ "भीत्रार्थानां भयहेतुः" सूत्र से पंचमी विभक्ति हुयी है। **अभ्यषेचयद्** = अभि + सिच् + णिच् + लङ्—तिप्।

समास—परासोः = परागताः असवः (प्राणाः) यस्य सः (बहुव्रीहि) परासुः तस्मात्। **अनिमेषलोचनात्** = नास्ति निमेषो ययोः ते अनिमेषे, अनिमेषे लोचने यस्य सः (बहुव्रीहि) तस्मात्। **तदास्पदे** = तस्य आस्पदम्

इति तदास्पदम् (षष्ठी तत्पु०) तस्मिन् । नैषधम्—निषधानां अयमिति नैषधः तम् ।

टिप्पणियाँ—परासोः = प्राणरहित-मृत-निष्प्राण । **अनिमेषलोचनात्**= निमेषशून्य अथवा निश्चल नेत्रों से युक्त । **स्मरात्**=कामदेव से । **उदाहर**= उदाहरण अथवा दृष्टान्त दो । **स्तुवता** = प्रशंसा करते हुये । **तदास्पदे** = उस (कामदेव) के स्थान पर । **निदर्शनम्** = उदाहरण अथवा दृष्टान्त । **नैषधम्** = राजा नल । **अभ्यषेचयत्** = अभिषिक्त कराया ।

प्रसङ्ग—निषधदेश से आये हुये दूतों, ब्राह्मणों, वन्दियों तथा चारणों से वह दमयन्ती (उस देश के राजा का नाम क्या है ? प्रजाओं का पालन कैसा करता है ? तथा उसकी क्या २ विशेषतायें हैं ? इत्यादि प्रकारों से) राजा नल के गुणों को ही पूछा करती थी—

नलस्य पृष्टा निषधागता गुणान् मिषेण दूतद्विजवन्दिचारणाः ।
निपीय तत्कीर्तिकथामथानया चिराय तस्थे विमनायमानया ॥ ३७ ॥

म०—नलस्येति । निषधेभ्य आगता दूताः सन्देशहराः, द्विजा ब्राह्मणाः, वन्दिनः स्तावकाः चारणाः देशभ्रमणजीविनः ते सर्वे मिषेण व्याजेन नलस्य गुणान् पृष्टाः पृच्छतेर्दुहादित्वात् प्रधाने कर्मणि क्तः । अथ प्रश्नानन्तरमनया भैम्या तत्कीर्त्तिकथा नलस्य यशःकथामृतं निपीय नितरां श्रुत्वेत्यर्थः । चिराय विमनायमानया विमनीभवन्त्या भृशादित्वात्क्यङि सलोपश्च 'अकृत्सार्वधातुकयोर्दीर्घः' ततो लटः शानचादेशः । तदा तस्थे स्थितं तिष्ठतेर्भावे लिट् । अयञ्च दूतादिव्यवधाने गुणकीर्त्तनलक्षणः प्रलापाख्यो रत्यनुभवः ॥ ३७ ॥

अन्वय—निषधागता दूतद्विजवन्दिचारणाः मिषेण नलस्य गुणान् पृष्टाः, अथ तत्कीर्तिकथां निपीय अनया चिराय विमनायमानया तस्थे ।

संस्कृत-व्याख्या—निषधागताः = निषधदेशात् आगताः, दूतद्विजवन्दिचारणाः = दूताः सन्देशहराः द्विजाः ब्राह्मणाः वन्दिनः स्तुतिपाठकाः चारणाः देशभ्रमणजीविनः ते सर्वे, मिषेण = व्याजेन, नलस्य, गुणान् = सौन्दर्यादीन्, पृष्टाः = जिज्ञासिताः, अथ = प्रश्नानन्तरम्, तत्कीर्तिकथाम् = तस्य नलस्य कीर्तिकथां यशः कथामृतम्, निपीय = नितरां श्रुत्वा, अनया = दमयन्त्या, चिराय = चिरकालं यावत्, विमनायमानया = विमनीभवन्त्या, तस्थे = स्थितम् ।

हिन्दी-अनुवाद—निषधागताः = निषधदेश से आये हुये, दूतद्विजवन्दि-

चारणाः = दूतों, ब्राह्मणों, स्तुतिपाठकों तथा चारणों से, [वह दमयन्ती], भिषेण = किसी बहाने से, नलस्य = नल के, गुणान् = गुणों को, पृष्टाः = पूछती थी अथ = और तदनन्तर, तत्कीर्तिकथाम् = उस राजा नल के यशसम्बन्धी वर्णन को, निपीय = भली भाँत पानकर (सुनकर), अनया = दमयन्ती, चिराय = बहुत समय तक, विमनायमानया तस्थे = अन्यमनस्क रहा करती थी।

भावार्थ—वह दमयन्ती निषध देश से आये हुये दूतों, ब्राह्मणों, वन्दीजनों तथा भाटों चारणों आदि से यह प्रश्न किया करती थी कि उस देश का राजा कौन है—? प्रजा के साथ उसका व्यवहार कैसा है ? कौन-कौन से विशिष्ट गुणों से वह सम्पन्न है ? इसके पश्चात् उन लोगों द्वारा वर्णित राजा नल की उत्तम-कीर्ति तथा गुणों आदि का श्रवण कर वह अन्यमनस्क हो जाया करती थी। वह इस सोच में पड़ जाती थी कि ऐसे सद्गुणों एवं कीर्ति से युक्त राजा नल को मैं किस भाँति प्राप्त कर सकूगी ? इस भावना से वह बहुत समय तक अन्य-मनस्क रहा करती थी **अथवा**—ऐसे उत्तमगुणों से युक्त राजा नल के प्रति मेरा अनुराग हुआ है। अतः उनको प्राप्तकर मैं निश्चय ही कृतकृत्य हो जाऊँगी। इस भावना से वह बहुत समय तक आनन्द का अनुभव करते हुये उदासीन रूप में स्थित रहा करती थी।

अलङ्कार—इस श्लोक में 'भावोदय' नामक अलङ्कार की संभावना की जा सकती है।

व्याकरण—गुणान् पृष्टाः = इस स्थल पर "प्रच्छ्" धातु के द्विकर्मक होने के कारण "पृष्टा" में कर्म में 'क्त' प्रत्यय हुआ है तथा कर्म के उक्त होने के कारण "दूतद्विजवन्दिचारणाः" में द्वितीया-विभक्ति नहीं हुयी है। 'गुणान्' में "न लोका"—इत्यादि सूत्र से षष्ठी का निषेध हो जाने पर द्वितीया (वहुवचन) विभक्ति हुयी है। **निपीय** = नि + पा + क्त्वा—ल्यप् + ईत्व होकर। **चिराय** = यह अव्यय शब्द है। **विमनायमानया** = विमनस् + क्यङ् (नामधातु), 'स' का लोप, दीर्घ होने के पश्चात् + शानच् + टाप् विमनायमाना—[तृतीया एकवचन]। **तस्थे** = स्था + लिट् (भाव में)।

समास—दूतद्विजवन्दिचारणाः = दूताश्च द्विजाश्च वन्दिनश्च चारणाश्च इति दूतद्विजवन्दिचारणाः (द्वन्द्व समास)। **विमनायमानया** = विमना इव आचरति इति विमनायते—विमनायमाना तया—विमनायमानया।

टिप्पणियाँ—निषधागताः = निषध देश से आये हुये। प्राचीनकाल में 'निषध' नामक एक देश था जिसके अधिपति राजा नल थे। इसकी राजधानी 'अलका' नामक नगरी थी—यह नदी तट पर स्थित थी। **दूतद्विजवन्दिचारणाः** = दूतों, ब्राह्मणों, वन्दियों (स्तुति–प्रशंसा करने वालों) और चरणों (भाटों) से। **मिषेण** = व्याज से—बहाने से। **गुणान् पृष्टाः** = गुणों को पूछती थी। **निपीय** = निश्शेप रूप से पानकर के—भलीभाँति [सन्तोष के साथ] सुनकर। **चिराय** = अधिक समय तक—चिरकालपर्यन्त। **विमनायमानया** = अन्यमनस्क होकर अथवा उदासीनता के साथ। **तस्थे** = उपस्थित रही—स्थित रहती थी।

प्रसङ्ग—उपर्युक्त पाँच श्लोकों में नल के प्रति दमयन्ती के श्रवणजन्य अनुराग का वर्णन प्रस्तुत किया गया है। अब महाकवि द्वारा चित्र एवं स्वप्न आदि में दर्शनजन्य दमयन्ती के अनुराग का वर्णन प्रस्तुत किया जा रहा है—

प्रियं प्रियां च त्रिजगज्जयिश्रियौ लिखाधिलीलागृहभित्तिकावपि।
इति स्म सा कारुतरेण लेखितं नलस्य च स्वस्य च सख्यमीक्षते ॥३८॥

म०—प्रतिकृतिस्वप्नदर्शनादयो विरहिणां विनोदोपायाः, अथ तत्कथनमुखेन दर्शनानुरागञ्चास्या दर्शयन् प्रतिकृतिदर्शनं तावदाह—प्रियमिति। सा भैमी त्रीणि जगन्ति समाहृतानि त्रिजगत्। समाहारो द्विगुरेकवचनम्। तस्य जयिनो लोकत्रयजित्वरी श्रीः शोभा ययोस्तादृशौ कावपि प्रियं प्रियाञ्च तौ अधिलीलागृहभित्ति विलासवेश्मकुड्ये विभक्त्यर्थेऽव्ययीभावः। लिखेत्युक्तौ कारुतरेण शिल्पिकाण्डेन प्रयोज्येन लेखितं नलस्य च स्वस्य च सख्यं रूपसाम्यापादनम् ईक्षते स्म ॥ ३८ ॥

अन्वय—अधिलीलागृहभित्ति त्रिजगज्जयिश्रियौ कावपि प्रियं प्रियां च लिख इति सा कारुतरेण लेखितं नलस्य च स्वस्य च सख्यम् ईक्षते स्म।

संस्कृत-व्याख्या—अधिलीलागृहभित्ति = विलासवेश्मकुड्ये, त्रिजगज्जयिश्रियौ = त्रयाणां जगतां समाहारः त्रिजगत् तत् जयति इत्येवंशीला श्रीः शोभा ययोः तादृशौ, कावपि = अनिर्दिष्टनामानौ, प्रियम् = नायकम्, प्रियाम् = नायिकां च, लिख = चित्रय, इति = एवम्, सा = दमयन्ती, कारुतरेण = कुशलशिल्पिना, लेखितम् = चित्रितम्, नलस्य च, स्वस्य च = स्वकीयस्य च, सख्यम् = रूपसाम्यापादनं रूपसादृश्यम् वा, ईक्षते स्म = पश्यति स्म।

हिन्दी-अनुवाद—अधिलीलागृहभित्ति = क्रीड़ागृह अथवा विलासगृह की

दीवाल पर, त्रिजगज्जयिश्रियौ = तीनों लोकों में सर्वश्रेष्ठ सौन्दर्य (शोभा) वाले—अथवा–तीनों लोकों को जीतने वाली शोभा से युक्त, कावपि = किन्हीं दो, प्रियम् = प्रेमी, च = और, प्रियाम् च = प्रेमिका के, लिख = चित्र बनाओ । इति = इस प्रकार [कहकर], सा = वह दमयन्ती, कारुतरेण = चतुर शिल्पी अथवा चित्रकार के द्वारा, लेखितम् = चित्रित, नलस्य = राजा नल के, च = और, स्वस्य च = अपने, सख्यम् = रूपसादृश्य को, ईक्षते स्म = देखा करती थी ।

भावार्थ—वह दमयन्ती 'लोकत्रय-विजयिनी सुन्दरतावाले किसी प्रिय तथा प्रिया अर्थात् स्त्री-पुरुष को विलासगृह की दीवाल पर चित्रित करो' ऐसा कहने पर चित्रकार द्वारा चित्र में बनाये गये राजा नल के तथा अपने रूपसाम्य को देखा करती थी ।

अपने प्रिय के चित्र के दर्शन द्वारा उत्कण्ठा दूर करने की इच्छा से दमयन्ती चित्रकार से लीलागृह की दीवाल पर संसार में सबसे अधिक सुन्दर युवक तथा युवती का चित्र बनाने को कहती और चित्रकार नल तथा दमयन्ती का चित्र बना देता—क्योंकि ये दोनों ही संसार में सर्वाधिक सुन्दर थे । इस चित्र को देखकर दमयन्ती अपना मनोरञ्जन कर लेती थी ।

अलङ्कार—इस श्लोक में 'उपमेयोपमा' नामक अलङ्कार व्यञ्जित हो रहा है ।

व्याकरण—सख्यम् = सखि + यत् (भाव में) । **ईक्षते स्म** = यहाँ 'स्म' के योग में भूत अर्थ में 'लट्' लकार का प्रयोग हुआ है । **कौ** = यहाँ पर "पुमान स्त्रिया" सूत्र से एकशेषसमास हुआ है ।

समास—अधिलीलागृहभित्ति = लीलायाः गृहम्—इति (षष्ठी तत्पु०) अथवा लीलार्थं वा गृहम् (चतु० तत्पु०), तस्य भित्तिः (षष्ठी तत्पु०), लीलागृहभित्तौ इति अधिलीलागृहभित्ति—यहाँ "अव्ययं विभक्तिसमीप'— इत्यादि सूत्र से अव्यय के साथ सुबन्त का समास हुआ है (अव्य० समास) । **त्रिजगज्जयिश्रियौ** = त्रयाणां जगतां समाहारः त्रिजगत्, त्रिजगत् जयतीत्येवंशीला त्रिजगज्जयिनी ["जिदक्षि—" इत्यादि सूत्र से "इनि" प्रत्यय] त्रिजगज्जयिनी श्रीः ययोः तौ त्रिजगज्जयिश्रियौ (बहु० समा०) । पुंवद्भाव । **कारुवरेण** = कारुषु तरः कारुतरः (सप्तमी तत्पु०) तेन । **सख्यम्** = सख्युर्भावः सख्यम् ।

टिप्पणियाँ—**अधिलीलागृहभित्ति** = लीलागृह अथवा विलासगृह की दीवाल पर। **त्रिजगज्जयिश्रियौ** = तीनों लोकों के सौन्दर्य को जीत लिया है जिन्होंने अर्थात् त्रिभुवन विजयी शोभा (सौन्दर्य) से युक्त। **प्रियं-प्रियाम्** = प्रेमी-प्रेमिका अथवा नायक नायिका को। **कारुतरेण** = उत्तम शिल्पी अथवा चित्रकार द्वारा ["कारुः शिल्पी" इत्यमरः]। **सख्यम्** = सादृश्य, सौन्दर्य के अथवा रूप के सादृश्य को। इस स्थल पर 'सखि' शब्द-का लक्षणया सदृश अर्थ में प्रयोग किया गया है। **ईक्षते स्म** = देखा करती थी, देखती थी॥

अपने प्रिय का दर्शन तीन रूपों में किया जाया करता है (१) चित्र दर्शन (२) स्वप्नदर्शन तथा (३) साक्षात् दर्शन। इस श्लोक में चित्र द्वारा दर्शन का वर्णन प्रस्तुत किया गया है।

प्रसङ्ग—यद्यपि दमयन्ती ने नल का साक्षात् दर्शन अभी तक नहीं किया था किन्तु फिर भी अपने प्रारब्ध कर्मों के परिणाम स्वरूप वह स्वप्न में उनको देख लेती थी—

मनोरथेन स्वपतीकृतं नलं निशि क सा न स्वपती स्म पश्यति।
अदृष्टमप्यर्थमदृष्टवैभवात्करोति सुप्तिर्जनदर्शनातिथिम्॥ ३९॥

म०—मनोरथेनेति। मनोरथेन सङ्कल्पेन स्वपतीकृतं स्वभर्तृकृतं नलम् अभूततद्भावेच्वौ दीर्घः। स्वपती निद्राती सा दमयन्ती क निशि कुत्र रात्रौ न पश्यति स्म? सर्वस्यामपि रात्रौ दृष्टवती। तथा हि सुप्तिः स्वप्नः अदृष्टम् अत्यन्ताननुभूतमप्यर्थं किमुत दृष्टमिति भावः। अदृष्टवैभवात् प्राक्तनभाग्यबलात् जनदर्शनातिथिं लोकदृष्टिगोचरं करोति, तदत्रापि निमित्तादृष्टात्तादृक् स्वप्न-ज्ञानमुत्पन्नमित्यर्थः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः॥ ३९॥

अन्वय—मनोरथेन स्वपतीकृतं नलं स्वपती सा क निशि न पश्यति स्म? सुप्तिः अदृष्टवैभवात् अदृष्टमपि अर्थं जनदर्शनातिथिं करोति।

संस्कृत-व्याख्या—मनोरथेन = संकल्पेन, स्वपतीकृतम्, नलम् = नैषधम्, स्वपती = निद्राती, सा = दमयन्ती, क्व = कुत्र, निशि = रात्रौ, न पश्यति स्म = न दृष्टवती? सुप्तिः = स्वप्नः, अदृष्टवैभवात् = प्राक्तनभाग्यबलात्, अदृष्टमपि = अत्यन्ताननुभूतमपि, अर्थम् = वस्तु, जनदर्शनातिथिम् = लोकदृष्टि-गोचरम्, करोति = विदधाति॥

हिन्दी-अनुवाद—मनोरथेन = संकल्प के द्वारा, स्वपतीकृतम् = अपना

पति बनाये हुये, नलम् = राजा नल को, स्वपती = निद्रा में पड़ी हुयी, सा = वह दमयन्ती, क्व निशि = किस रात्रि में, न पश्यति स्म = नहीं देखती थी ? अर्थात् सभी रात्रियों में देखा करती थी । [क्योंकि] सुप्तिः = स्वप्न, अदृष्टवैभवात् = पुरातन भाग्य के बल से, अदृष्टमपि अर्थम् = कभी न देखी गयी हुयी वस्तु को भी, जनदर्शनातिथिम् = लोगों की दृष्टि का अतिथि, करोति = कर देता है अथवा बना देता है ।

भावार्थ—अपने मन के द्वारा संकल्पित तथा अपने पति के रूप में स्वीकृत राजा नल को वह दमयन्ती प्रतिदिन रात्रि में सोयी हुयी अवस्था में देखा करती थी । क्योंकि स्वप्न पहले कभी न देखे गये हुये पदार्थ को भी पूर्वजन्मकृत भाग्य के बल से मनुष्य को अवश्य दिखला दिया करता है । चूँकि भाग्य दमयन्ती को स्वप्न में राजा नल का दर्शन करा देने वाला है, अतएव दमयन्ती का राजा नल के प्रति किया गया हुआ प्रेम भाग्य द्वारा अनुमोदित ही प्रतीत होता है ।

कहने का अभिप्राय यह है कि "यद्यपि दमयन्ती ने राजा नल को पहले कभी नहीं देखा था किन्तु फिर भी वह उसे स्वप्न में देख लेती थी क्योंकि कभी पहले न देखी गयी वस्तु का दर्शन भी स्वप्नावस्था में प्रारब्ध द्वारा हो जाया करता है ।"

अलङ्कार—इस श्लोक के पूर्वार्द्ध भाग में "स्वपती" तथा उत्तरार्धभाग में "अदृष्ट" पदों की आवृत्ति के भिन्न २ अर्थ होने के कारण यहाँ "यमक" अलङ्कार है । इसके अतिरिक्त उक्त श्लोक के पूर्वार्धभाग में वर्णित विषय का उत्तरार्धभाग के सामान्य वर्णन द्वारा समर्थन किये जाने से "अर्थान्तरन्यास" अलङ्कार भी बन जाता है ।

व्याकरण—**स्वपतीकृतम्** = स्वपति + च्वि, ईत्व, दीर्घ—कृ + क्त । **स्वपती** = स्वप् + लट्—शतृ + ङीप । **सुप्तिः** = स्वप् + क्तिन् ।

समास—**मनोरथेन** = मनसः रथः—मनोरथः तेन । **स्वपतीकृतम्** = स्वस्य पतिः स्वपतिः, न स्वपतिः इति = अस्वपतिः, अस्वपतिः स्वपतिः कृतः इति स्वपतीकृतः तम् । **जनदर्शनातिथिम्** = जनस्य दर्शनम् इति जनदर्शनम्, तस्य अतिथिः—तम् ।

टिप्पणियाँ—**मनोरथेन** = इच्छा अथवा मन में किये संकल्प के द्वारा । **स्वपतीकृतम्** = जिसको अपना पति मान लिया गया है उसको—अर्थात्

राजा नल को। **स्वपती** = शयन करती हुयी अथवा निद्रा की अवस्था में विद्यमान। **अदृष्टवैभवात्** = [अपने पुरातन] भाग्य के वैभव से—भाग्य के प्रभाव से। **अदृष्टमपि अर्थम्** = जीवन में पहले कभी भी न देखी गयी हुयी वस्तु को। **जनदर्शनातिथिम्** = लोगों के दर्शनों के अतिथि के रूप में—अर्थात् लोगों द्वारा देखे जाने योग्य। **करोति** = कर देता है—बना देता है।

प्रसङ्ग—जैसे कोई दासी चुपके से नायिका को किसी नायक को संकेत द्वारा दिखला दिया करती है उसी प्रकार से निद्रा ने दमयन्ती को राजा नल का दर्शन कराया—

निमीलितादक्षियुगाच्च निद्रया हृदोऽपि बाह्येन्द्रियमौनमुद्रितात्।
अदर्शि संगोप्य कदाप्यवीक्षितो रहस्यमस्यास्स महन्महीपतिः ॥४०॥

म०—निमीलितादिति। निद्रया प्रयोजिकया निमीलितान्मुकुलितादुपरतव्यापारादित्यर्थः, अक्षियुगाच्च तथा बाह्येन्द्रियाणां चक्षुरादीनांमौनेन व्यापारराहित्येन मुद्रितात्प्रतिष्टब्धात्, मनसो बहिरस्वातन्त्र्यादिति भावः। हृदो हृदयादपिसङ्गोप्य गोपयित्वेत्यर्थः, 'अन्तर्द्धौ येनादर्शनमिच्छती'त्यक्षियुगमनसोरपादानत्वम्। अदर्शनं चात्र मनसो बाह्येन्द्रियमौनमुद्रितादिति विशेषणसामथर्यादिन्द्रियार्थसंप्रयोगजन्यज्ञानविरह एवेति ज्ञायते, स्वप्नज्ञानं तु मनोजन्यमेव। तदजन्यज्ञानमत्रेत्याह=कदाप्यवीक्षित इति। अत्यन्तादृष्टचर इत्यर्थः महद्रहस्यमतिगोप्यं वस्तु स महीपतिर्नलः। अस्या भैम्या अदर्शि दर्शयाञ्चक्रे, दृशेर्ण्यन्तात् कर्मणि लुङ्। यथा काचिच्चेटी कस्यैचित्कामिन्यै कञ्चन कान्तं संगोप्य दर्शयति तद्वदिति ध्वनिः ॥ ४० ॥

अन्वय—निद्रया निमीलितात् अक्षियुगात् च बाह्येन्द्रियमौनमुद्रितात् हृदः अपि संगोप्य कदापि अवीक्षितः महत् रहस्यं स महीपतिः अस्याः अदर्शि।

संस्कृत-व्याख्या—निद्रया = प्रयोजिकया सुषुप्त्या, निमीलितात् = मुकुलितात्—उपरतव्यापारादित्यर्थः, अक्षियुगात् = नेत्रद्वयात्, च, बाह्येन्द्रियमौनमुद्रितात् = बाह्य इन्द्रियाणां चक्षुरादीनां मौनेन स्वविषयग्रहणाभावेन मुद्रितात् प्रतिष्टब्धात् मनसः बहिरस्वातन्त्र्यात्—इति भावः, हृदः अपि = हृदयादपि, संगोप्य = गोपयित्वा-इत्यर्थः, कदापि अवीक्षितः = अत्यन्तादृष्टचरः-इत्यर्थः, महद् रहस्यम् = अतिगोप्यं वस्तु, स महीपतिः = नलः, अस्याः = दमयन्त्याः, अदर्शि = दर्शयाञ्चक्रे। यथा काचित् दासी कस्यैचित् कामिन्यै कञ्चन कान्तं संगोप्य दर्शयति तथैव निद्रा दमयन्त्यै नलं संगोप्य अदर्शयत्।

हिन्दी-अनुवाद—निद्रया = निद्रा ने, निमीलितात् = बन्द हुयी, अक्षियुगात् = दोनों आखों से, च = और, बाह्येन्द्रियमौनमुद्रितात् = बहिरिन्द्रियों के अपने २ विषयों को ग्रहण न करने के कारण स्तब्ध, हृदः अपि = हृदय से भी, संगोप्य = छिपाकर, कदापि = कभी भी, अवीक्षितः = न देखे गये हुये, महद्रहस्यम् = अत्यधिक रहस्य रूप, स महीपतिः = उस राजानल को, अस्याः = इस [दमयन्ती] को, अदर्शि—दिखला दिया।

भावार्थ—निद्रा ने बन्द हुये दोनों नेत्रों से तथा बाह्य (कर्ण आदि) इन्दियों के अपने २ विषय (सुनना आदि) को ग्रहण करने में मौन हो जाने से स्तब्ध अर्थात् शयन-अवस्था में विषयों को ग्रहण न करते हुये हृदय से भी छिपाकर, कभी पहले न देखे गये हुये अतएव रहस्य रूप उस राजा नल को इस दमयन्ती के लिये दिखला दिया।

जैसे कोई चतुर दूती नायिका को अन्य लोगों से छिपाकर उसके प्रियतम नायक को दिखला दिया करती है उसी प्रकार निद्रा ने भी, नायिका दमयन्ती द्वारा जिनका दर्शन पहले कभी नहीं किया जा सका था, ऐसे नायक राजा नल को नायिका दमयन्ती को दिखला दिया। कहने का तात्पर्य यह है कि दमयन्ती ने राजा नल को स्वप्न में देखा किन्तु उसके दोनों नेत्रों तथा वाह्य-इन्द्रियों की क्रिया से रहित हृदय को भी इसका पता न लग सका।

जाग्रत् अवस्था में किसी वस्तु अथवा पदार्थ अथवा व्यक्ति का चाक्षुष ज्ञान मन के नेत्रेन्द्रिय के साथ तथा नेत्रेन्द्रिय का उस वस्तु के साथ सम्बद्ध होने पर ही संभव है किन्तु स्वप्नावस्था में होने वाला ज्ञान केवल मानस ही है क्योंकि इस अवस्था में वाह्य-इन्द्रियां व्यापार-शून्य रहा करती हैं। इस कारण यहाँ यह कहा गया है कि निद्रा ने, नेत्रों तथा शेष वाह्य-इन्द्रियों के मौन से मुद्रित मन से छिपाकर राजा नल का दर्शन दमयन्ती को कराया।

अलङ्कार—इसमें रूपक अलङ्कार की प्रतीति होती है।

व्याकरण—संगोप्य = सम् + गुप् + णिच् + क्त्वा—ल्यप्। अदर्शि = दृश् + णिच् + लुङ् (कर्म में)।

समास—वाह्येन्द्रियमौनमुद्रितात् = वाह्येन्द्रियाणां मौनेन मुद्रितात्।

टिप्पणियाँ—निद्रया = निद्रा के द्वारा। निमीलितात् = बन्द हुयीं। अक्षियुगात् = दोनों नेत्रों से। वाह्येनिद्रियमौनमुद्रितात् = वाह्य-इन्द्रियों

द्वारा अपने २ विषयों का ग्रहण न किये जाने के कारण सुप्त अथवा शून्य। हृदः = हृदय से, मन से। संगोप्य = छिपाकर। अदर्शि = दिखला दिया।

प्रसङ्ग—कामपीड़ित उस दमयन्ती को हेमन्त ऋतु की रात्रियाँ बड़ी प्रतीत होने लगी—

अहो अहोभिर्महिमा हिमागमेऽप्यतिप्रपेदे प्रति तां स्मरार्दिताम्।
तपर्तुपूर्त्तावपि मेदसां भरा विभावरीभिर्बिभरांबभूविरे ॥४१॥

म०—अथास्याश्चिन्ताजागरावाह—अहो इति। हिमागमे हेमन्तेऽपि स्मरार्दितां तां दमयन्तीं प्रति अहोभिर्दिवसैः अतिमहिमा अतिवृद्धिः प्रपेदे तथा तपर्त्तुपूर्त्तावपिग्रीष्मान्तेऽपि विभावरीभिर्निशाभिः मेदसां भरा मांसराशयोऽतिवृद्धिरिति यावत्। बिभराम्बभूविरे बभ्रिरे, भृञः कर्मणि लिट् आम् प्रत्ययः। अहो आश्चर्यं शास्त्रविरोधादनुभवविरोधाच्चेति भावः। विरहिणां तथा प्रतीयत इत्यविरोधः, एतेनास्या निरन्तरचिन्ता जागरश्च गम्यते। अहोशब्दस्य 'ओदि' ति प्रगृह्यत्वात् प्रकृतिभावः॥

अन्वय—अहो, स्मरार्दितां तां प्रति हिमागमे अपि अहोभिः अति महिमा प्रपेदे। तपर्तुपूर्त्तौ अपि विभावरीभिः मेदसां भरा बिभरांबभूविरे।

संस्कृत-व्याख्या—अहो = आश्चर्यम्, स्मरार्दिताम् = कामपीडिताम्, ताम् = दमयन्तीं, प्रति = लक्ष्यीकृत्य, हिमागमे अपि = हेमन्ते अपि, अहोभिः= दिवसैः, अति महिमा = दैर्घ्यम्, प्रपेदे = प्राप्तः। [अभिप्रपेदे पाठोऽपि लभ्यते] तपर्तुपूर्त्तौ अपि = ग्रीष्मान्ते अपि, विभावरीभिः = निशाभिः, मेदसां भरा = मांसलतातिशयः—स्थूलत्वमिति यावत्, बिभरांबभूविरे = बभ्रिरे।

हिन्दी-अनुवाद—अहो = आश्चर्य की बात है कि, स्मरार्दिताम् = कामपीड़ित, ताम् = उस दमयन्ती के प्रति अथवा [दनयन्ती को] लक्षित करके, हिमागमे अपि = हेमन्त ऋतु के आ जाने पर भी, अहोभिः = दिनों ने, अति महिमा = दीर्घता को, प्रपेदे = प्राप्त कर लिया। [तथा] तपर्तुपूर्त्तौ अपि= ग्रीष्म ऋतु की समाप्ति पर भी, विभावरीभिः = रात्रियों ने, मेदसां भरा = अतिशय मांसलता स्थूलता (लक्षणा से) दीर्घता, बिभरांबभूविरे = धारण करली।

भावार्थ—यह बड़े आश्चर्य की बात है कि उस दमयन्ती के लिये हेमन्तऋतु में भी दिन बड़े प्रतीत होने लगे तथा ग्रीष्म ऋतु की पूर्णता होने पर भी रात्रियाँ बड़ी प्रतीत हुयीं।

हेमन्तऋतु में दिन तथा ग्रीष्म-ऋतु में रात्रि छोटी हो जाया करती हैं। विरह अवस्था में अल्प-काल भी बहुत बड़ा प्रतीत होने लगा करता है। अतः नल के विरह का अनुभव करने वाली दमयन्ती को हेमन्तऋतु सम्बन्धी दिन तथा ग्रीष्मकालीन रात्रियाँ अत्यधिक लम्बी प्रतीत हो रहीं थी।

अलङ्कार—उपर्युक्त श्लोक में हिम-आगम रूप कारण के रहते हुये होने पर भी दिनों का लघुत्व नहीं हुआ तथा ग्रीष्म रूप कारण के विद्यमान रहते हुये भी रात्रियों में लघुता का कथन न किये जाने से "विशेषोक्ति" अलङ्कार की संभावना की जा सकती है।

इसके अतिरिक्त श्लोक के अन्तिम चरण में "अनुप्रास" अलङ्कार है।

व्याकरण—अहो = यह आश्चर्य वाचक अव्यय है। इस स्थल पर "ओत्" सूत्र से प्रगृह्यसंज्ञा तथा प्रकृतिभाव हो जाने के कारण "एङःपदान्तादति" सूत्र से होने वाला पूर्वरूप नही हुआ। **अभिप्रपेदे** = अभि (उपसर्ग) प्र + पद् + लिट् (लकार)। **विभरांबभूविरे** = भृ + लिट्।

समास—हिमागमे—हिमस्य आगमः इति हिमागमः तस्मिन्।

टिप्पणियाँ—स्मरार्दिताम् = काम से पीड़ित अथवा विह्वल। **हिमागमे** = हेमन्त ऋतु में [अगहन तथा पौष मास में हेमन्त ऋतु होती है।] **अहोभिः** = दिनों ने। **महिमा** = महत्व (लक्षणा-व्यापार द्वारा) महानता अथवा दीर्घता-लम्बा हो जाना)। **अभिप्रपेदे** = प्राप्त की। **तपर्तुपूर्तौ**=ग्रीष्म ऋतु की पूर्णता पर। **विभावरीभिः** = रात्रियों ने। **मेदस्वांभरा** = मेद के (चर्बी के) कारण अत्यधिक स्थूलता—अर्थात् दीर्घता। **विभरांबभूविरे** = धारण की—स्वीकार की।

प्रसङ्ग—इधर राजा नल ने भी जब दमन्यती के गुणों का श्रवण किया तब उनके हृदय में भी उसके प्रति अनुराग उत्पन्न हो गया। उसी अनुराग का वर्णन निम्नलिखित श्लोक में वर्णित है—

स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः श्रयन्तमन्तर्घटनागुणश्रियम्।
कदाचिदस्या युवधैर्यलोपिनं नलोऽपि लोकादश्रृणोद् गुणोत्करम्॥४२॥

म०—स्वेत्यादि। अथ नलोऽपि स्वस्य कान्त्या सौन्दर्येण याः कीर्त्तयः तासां व्रजः पुञ्ज एव मौक्तिकस्रक् मुक्ताहारः तस्या अन्तः अभ्यन्तरे घटनागुणश्रियं गुम्फनसूत्रलक्ष्मीं श्रयन्तं भजन्तं युवधैर्यलोपिनं तरुणचित्तस्थैर्यपरिहारि-

णम् अस्या दमयन्त्या गुणोत्करं सौन्दर्यसन्दोहं लोकादागन्तुकजनात् अश्रृणोत् ।
अत्र कीर्त्तिव्रजगुणोत्करयोर्मुक्ताहारगुम्फनसूत्रत्वरूपणाद्रूपकालङ्कारः ॥ ४२ ॥

अन्वय—नलः अपि कदाचिद् लोकात् स्वकान्तिकीर्तिव्रजमौक्तिकस्रज = अन्तर्घटनागुणश्रियं श्रयन्तं युवधैर्यलोपिनं अस्याः गुणोत्करं अश्रृणोत् ।

संस्कृत-व्याख्या—नलः = नैषधः, अपि, कदाचित् = कस्मिंश्चित्समये, लोकात् = आगन्तुकजनात्, स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः = स्वस्य निजस्य कान्त्या सौन्दर्येण याः कीर्त्तयः यशांसि तासां व्रजः पुञ्ज एव मौक्तिकस्रक् मुक्ताहारः तस्याः, अन्तर्घटनागुणश्रियम् = अन्तः अभ्यन्तरे घटनागुणश्रियम् गुम्फनसूत्रलक्ष्मीं (शोभाम्), श्रयन्तम् = भजन्तम्, युवधैर्यलोपिनम् = तरुणचित्तस्थैर्यपरिहारिणम्, अस्याः = दमयन्त्याः, गुणोत्करम्, अश्रृणोत् = श्रुतवान् ।

हिन्दी-अनुवाद—नलः = राजा नल ने, अपि = भी, कदाचिद् = किसी समय, लोकात् = आगन्तुक लोगों से, स्वकान्तिकीर्तिव्रजमौक्तिकस्रजः = अपने सौन्दर्य सम्बन्धी कीर्तिसमूह रूपी मोतियों की माला को, अन्तर्घटनागुणश्रियम् = अन्दर से गूँथने वाले सूत्र की शोभा को, श्रयन्तम् = धारण करते हुये, युवधैर्यलोपिनम् = युवकों के धैर्य को लुप्त करने वाले, अस्याः = इस दमयन्ती के, गुणोत्करम् = सौन्दर्य सम्बन्धी गुण समूह को, अश्रृणोत् = सुना ।

भावार्थ—राजा नल ने भी कभी आगन्तुक लोगों के द्वारा अपने सौन्दर्य के यशःसमूह रूपी मुक्ताहार को अन्दर से गूँथने वाले सूत्र की शोभा से युक्त एवं युवकों के धैर्य को नष्ट कर देने वाले इस [दमयन्ती] के गुणसमूह को सुना ।

राजा नल के [अपने] सौन्दर्य सम्बन्धी कीर्त्ति-समूह रूपी मोतियों के हार को अन्दर से जोड़ने वाले धागे (सूत) के समान दमयन्ती के गुणों को राजा नल ने आगन्तुक लोगों के मुखों से सुना । तात्पर्य यह है कि राजा नल ने दमयन्ती के गुणों को सुना ।

कीर्ति अथवा कीर्तिसमूह का रंग श्वेत माना जाता है । अतः राजा नल के सौन्दर्य सम्बन्धी कीर्ति के शुभ्र होने से उसमें मोतियों की कल्पना की गयी है । इन मोतियों से निर्मित माला का गुम्फन करने के लिये बीच के धागे के समान दमयन्ती के गुण-समूह की कल्पना की गयी है । इस भाँति गुँथी हुयी मुक्तामाला के रूप में राजा नल तथा दमयन्ती-दोनों ही के गुण गुम्फित हो गये ।

अलङ्कार—इस पद्य में "कीर्तिव्रज" में "मौक्तिकस्त्रज" का तथा "गुणोत्कर" में "घटनागुण" का आरोप किये जाने से "रूपक" अलङ्कार है।

व्याकरण—**युवधैर्यलोपी** = युवधैर्य + लुप् + णिच् + णिनि [कर्त्तरि ताच्छील्ये]।

समास—**स्वकान्तिकीर्तिव्रजमौक्तिकस्त्रजः** = स्वस्य कान्त्या याः कीर्त्तयः तासां व्रजः एव मौक्तिकस्त्रक् तस्याः इति। **अन्तर्घटनागुणश्रियम्** = अन्तः घटना इति अन्तर्घटना, तदर्थं गुणः [चतुर्थी तत्पुरुष] इति अन्तर्घटनागुणः तस्य श्रीः [षष्ठी तत्पु०] ताम्। **युवधैर्यलोपिनम्** = यूनां धैर्यम् [षष्ठी तत्पु०] इति युवधैर्यम्, तत् लोपयितुं शीलमस्य इति युवधैर्यलोपी तम्। **गुणोत्करम्** = गुणानां उत्करमिति [षष्ठी तत्पु०] गुणोत्करम्।

टिप्पणियाँ—**लोकात्** = लोगों से [आगन्तुक व्यक्तियों से]। **स्वकान्तिकीर्तिव्रजमौक्तिकस्त्रजः** = अपने [राजा नल के] सौन्दर्य विषयक यशः-समूहरूपी मोतियों की माला के। **अन्तर्घटनागुणश्रियम्** = [मोतियों को] अन्दर से जोड़ने वाले सूत्र [धागा] की शोभा को। **श्रयन्तम्** = सेवन करने वाले—धारण करने वाले। [ऐसे दमयन्ती के गुण समूह को] **युवधैर्यलोपिनम्** = युवा-पुरुषों के धैर्य को नष्ट कर देने वाले अथवा युवा व्यक्तियों के धैर्य को खो देने वाले। यह "गुणोत्करम्" का विशेषण है। **अस्याः** = इस [दमयन्ती] के। **गुणोत्करम्** = गुण समूह को। **अशृणोत्** = सुना, श्रवण किया।

प्रसङ्ग—शारीरिक सौन्दर्य में राजा नल ने कामदेव को पराजित कर दिया था। अतः कामदेव उसका बदला लेना चाहता था। इस दृष्टि से कामदेव ने अवसर पाकर अपनी अमोघ शक्तिरूपिणी दमयन्ती के द्वारा राजा नल पर विजय प्राप्त करने की इच्छा की—

तमेव लब्ध्वावसरं ततः स्मरश्शरीरशोभाजयजातमत्सरः।
अमोघशक्त्या निजयेव मूर्तया तया विनिर्जेतुमियेष नैषधम्॥ ४३॥

म०—अथास्य तस्यां रागोदयं वर्णयति=तमेवेति। ततो गुणश्रवणानन्तरं शरीरशोभाया देहसौन्दर्यस्य जयेन जातमत्सरः उत्पन्नवैरः स्मरः तमेवावसरमवकाशं लब्ध्वा मूर्त्तया मूर्तिमत्या निजया अमोघशक्त्येव अकुण्ठितसामर्थ्येनेवेत्युत्प्रेक्षा। तया दमयन्त्या नैषधं नलं विनिर्जेतुमियेष इच्छति स्म, रन्ध्रान्वेषिणो हि विद्वेषिण इति भावः। तेन रागोदय उक्तः॥ ४३॥

अन्वय—ततः शरीरशोभाजयजातमत्सरः स्मरः तमेव अवसरं लब्ध्वा मूर्त्तया निजया अमोघशक्त्या इव तया नैषधं विनिर्जेतुं इयेष।

संस्कृत-व्याख्या—ततः = [दमयन्त्याः] गुणश्रवणानन्तरम्, शरीरशोभाजयजातमत्सरः = शरीरशोभायाः देहसौन्दर्यस्य जयेन जातः उत्पन्नः मत्सरः वैरः यस्य तादृशः, स्मरः = कामः, तमेव, अवसरम् = अवकाशम्, लब्ध्वा = प्राप्य, मूर्त्तया = शरीरधारिण्या, निजया = स्वकीयया, अमोघशक्त्या = अकुण्ठितसामर्थ्येन इव, तया = दमयन्त्या, नैषधम् = नलम्, विनिर्जेतुम् = पराभवितुम्, इयेष = इच्छति स्म।

हिन्दी-अनुवाद—ततः = दमयन्ती के गुणों का [राजा नल द्वारा] श्रवण कर लिये जाने के पश्चात्, शरीरशोभाजयजातमत्सरः = [अपने] शरीर की कान्ति [शोभा] को जीत लिये जाने के कारण उत्पन्न हुयी ईर्ष्या से युक्त, स्मरः = कामदेव ने, तमेव = उस ही, अवसरम् = अवसर को, लब्ध्वा = पाकर, मूर्तया = शरीरधारिणी, निजया = अपनी, अमोघशक्त्या = अमोघशक्तिरूपिणी, तया = उस दमयन्ती के द्वारा, नैषधम् = राजा नल को, विनिर्जेतुम् = जीतने की, इयेष = इच्छा की।

भावार्थ—[जब राजा नल ने दमयन्ती के सौन्दर्य एवं तत्सम्बन्धी गुणों का श्रवण कर लिया तो उनके हृदय में दमयन्ती के प्रति अनुराग उत्पन्न हो गया—राजा नल की इस प्रकार की स्थिति हो जाने के] अनन्तर [राजा नल के शरीर की शोभा द्वारा कामदेव के] शरीर की शोभा को जीत लिये जाने के कारण उत्पन्न हुयी ईर्ष्या (डाह तथा द्वेष) से युक्त कामदेव ने उसी अवसर को पाकर शरीरधारिणी [मूर्तिमती] अपनी अमोघ [कभी विफल न होने वाली] शक्ति के सदृश उस दमयन्ती के द्वारा राजा नल को जीतने की अभिलाषा की।

कामदेव को अपने सौन्दर्य पर गर्व था। किन्तु समस्त ब्रह्माण्ड में सर्वाधिक सौन्दर्यशाली राजा नल को ही माना गया है। अतः इस प्रकार राजा नल कामदेव से कहीं अधिक सौन्दर्यशाली हुए। अतएव यह कहा जाना उचित ही था कि राजा नल ने सौन्दर्य में कामदेव को परास्त कर दिया था। कामदेव ने जब यह देखा कि मैं सौन्दर्य में राजा नल से पराजित हो गया हूँ तो वह राजा नल का शत्रु बन गया। और ऐसा अवसर ढूँढने लगा कि जिससे मैं नल को नीचा दिखला सकूँ।

शत्रु छिद्रान्वेषी हुआ करता है और वह अवसर प्राप्त हो जाने पर बदला लेने की इच्छा रखा करता है। जब राजा नल के हृदय में दमयन्ती के प्रति अनुराग उत्पन्न हो गया तो कामदेव ने सोचा कि मेरे लिये यही अच्छा अवसर है। अतः नल पर विजय प्राप्त करने के लिये इसी अवसर को उचित समझकर कामदेव ने दमयन्ती के रूप में विद्यमान अपनी अमोघ शक्ति का प्रयोग [राजा नल पर] करने की इच्छा की।

अलङ्कार—इस श्लोक में "अमोघशक्त्येव" में उत्प्रेक्षा अलङ्कार है।

व्याकरण—शोभा = शोभ् + अङ् [षिद्भिदादिभ्योऽङ्-सूत्र से] तदन्तर टाप् होकर शोभा शब्द बनता है। **इयेष** = इष् + लिट्।

समास—शरीरशोभाजयजातमत्सरः = शरीरस्य शोभा तस्याः जयः (षष्ठी तत्पुरुष), तेन जातः मत्सरः यस्य सः (बहुव्रीहि)।

टिप्पणियाँ—ततः = तदनन्तर, उसके पश्चात्—राजा नल द्वारा दमयन्ती के गुणों का श्रवण किये जाने के बाद। **शरीरशोभाजयजातमत्सरः** = [अपने] शरीर के सौन्दर्य को [राजा नल द्वारा] जीत लिये जाने के कारण उत्पन्न हुयी ईर्ष्या से युक्त। दूसरे के शुभ अर्थात् उत्कर्ष के कारण जो द्वेष उत्पन्न हो जाता है उसी को "मत्सर" शब्द द्वारा कहा जाता है—"मत्सरोऽन्यशुभद्वेषे"—इत्यमरः। **तमेव अवसरम्** = उस ही अवसर को—राजा नल ने जब लोगों के मुख से दमयन्ती के सौन्दर्य और उसके गुणों का श्रवण कर कर लिया तब। **मूर्त्तया**—मूर्तिधारिणी अथवा शरीरधारिणी। **अमोघशक्त्या इव** = कभी भी निष्फल न होने वाली शक्ति के सदृश। **नैषधम्** = निषध देश के राजा नल को। **विनिर्जेतुम्** = जीत लेने के लिये। **इयेष** = इच्छा की।

प्रसङ्ग—दमयन्ती के गुणों का श्रवण करने के अनन्तर राजा नल के मन में दमयन्ती के प्रति अनुराग उत्पन्न हो गया और परिणामस्वरूप उनका मन काम-पीड़ित हो गया—

अकारि तेन श्रवणातिथिर्गुणः क्षमाभुजा भीमनृपात्मजाश्रितः।
तदुच्चधैर्यव्ययसंहितेषुणा स्मरेण च स्वात्मशरासनाश्रयः ॥ ४४ ॥

म०—अकारीति। तेन क्षमाभुजा नलेन भीमनृपात्मजायाः दमयन्त्याः श्रितः गुणः तदीयः सौन्दर्यादिः श्रवणातिथिः श्रोत्रविषयः अकारि कृतः श्रुतः इत्यर्थः। करोतेः कर्मणि लुङ्। तस्य नलस्य उच्चधैर्यव्ययाय उच्चधैर्यनाशाय संहितेषुणा स्मरेण च स्वात्मनः शरासनाश्रयः चापनिष्ठो गुणो मौर्वी श्रवणातिथिरकारि

आकर्णं कृष्ट इत्यर्थः। दमयन्तीगुणश्रवणान्नलमनसि महान् मदनविकारः प्रादुर्भूत इत्यर्थः। अत्रोक्तवाक्यार्थस्य पूर्ववाक्यार्थहेतुकं काव्यलिङ्गमलङ्कारः ॥ ४४ ॥

अन्वय—तेन क्षमाभुजा भीमनृपात्मजाश्रितः गुणः श्रवणातिथिः अकारि। च तदुच्चधैर्यव्ययसंहितेपुणा स्मरेण स्वात्मशरासनाश्रयः [गुणः श्रवणातिथिः अकारि]।

संस्कृत-व्याख्या—तेनक्षमाभुजा = राज्ञा नलेन, भीमनृपात्मजाश्रितः = भीमनृपात्मजायाः दमयन्त्याः श्रितः आश्रितः [भीमनृपात्मजालयः पाठे सति] भीमनृपात्मजालयः = भीमनृपकन्या आलयः स्थानमाश्रयो वा यस्य तादृशः, गुणः = तदीयः सौन्दर्यादिः गुणः, श्रवणातिथिः = श्रोत्रविषयः, अकारि = कृतः [श्रुतः—इत्यर्थः]। च, तदुच्च धैर्यव्ययसंहितेपुणा = तस्य नलस्य उच्चं उत्कृष्टं धैर्यं तस्य व्ययः नाशः तस्यै संहितः धनुषि आरोपितः इषुः बाणः येन तथाभूतेन, स्मरेण = कामेन, स्वात्मशरासनाश्रयः = स्वात्मनः यत् शरासनं धनुः तदाश्रयः आधारः स्थानं वा यस्य तथाभूतः, [गुणः = मौर्वी, श्रवणातिथिः अकारि = आकर्णं [कर्णपर्यन्तं वा] कृष्टः—इत्यर्थः]। दमयन्तीगुणश्रवणानन्तरं नलमनसि महान् मदनविकारः प्रादुर्भूतः—इति भावः।

हिन्दी-अनुवाद—तेन क्षमाभुजा = पृथ्वी के पालक उस राजा नल ने, भीमनृपात्मजाश्रितः = राजा भीम की कन्या के अधीन [पाठान्तर में] भीमनृपात्मजालयः = राजा भीम की पुत्री दमयन्ती के आश्रित [अर्थात् दमयन्ती में विद्यमान], गुणः = गुणों को, श्रवणातिथिः = श्रवण (कान) का अतिथि, अकारि = बनाया। च = और, तदुच्चधैर्यव्ययसंहितेपुणा = उस राजा नल के उत्कृष्ट धैर्य को नष्ट करने के लिये बाणों का संधान करने वाले, स्मरेण = कामदेव ने, स्वात्मशरासनाश्रयः = अपने धनुष पर आश्रित रहने वाली [गुणः = प्रत्यञ्चा को, श्रवणातिथिः = कान का अतिथि, अकारि = बनाया।]

भावार्थ—उस राजा (नल) ने भीमनन्दिनी (दमयन्ती) के आश्रित गुणों को अपने कानों का अतिथि बनाया अर्थात् दमयन्ती के गुणों को सुना और उस (नल) के अत्यधिक धैर्य को नष्ट करने के लिये बाण चढ़ाये हुये कामदेव ने अपने धनुष पर आश्रित प्रत्यञ्चा को कान का अतिथि बनाया अर्थात् कामदेव ने धनुष की डोरी को कान तक खींचा।

कहने का तात्पर्य यह है कि जैसे ही राजा नल ने दमयन्ती के सौन्दर्य

सम्बन्धी गुणों का श्रवण किया वैसे ही वह दमयन्ती के प्रति अनुरक्त हो गया।

अलङ्कार—उपर्युक्त श्लोक में "स्वात्मशरासनाश्रयः" में "पुनरुक्ताभास" नामक अलङ्कार की प्रतीति होती है। इसके अतिरिक्त श्लोक के पूर्वार्ध सम्बन्धी वाक्यार्थ के प्रति श्लोक के उत्तरार्ध का वाक्यार्थ हेतु है। अतः "काव्यलिङ्ग" नामक अलङ्कार की भी संभावना की जाती है।

व्याकरण—क्ष्माभुजा = क्ष्मा + भुज् + क्विप्। तृतीया विभक्ति के एकवचन का रूप। अकारि = कृ + लुङ्।

समास—क्ष्माभुजा = क्ष्मां पृथ्वीं भुङ्क्ते इति क्ष्माभुज् तेन। भीमनृपात्मजाश्रितः = भीमनृपस्य आत्मजा तस्याः श्रितः। [पाठान्तरे] भीमनृपात्मजालयः = भीम एव नृपः (कर्मधारय) इति भीमनृपः तस्य आत्मजा (षष्ठी तत्पु०) सा एव आलयः यस्य सः (बहुव्रीहि)। तदुच्चधैर्यव्ययसंहितेषुणा = उच्चं धैर्यं (कर्मधारय) इति उच्चधैर्यम्, तस्य व्ययः, तस्मै संहितः इषुः येन सः (बहुव्रीहि) तेन। स्वात्मशरासनाश्रयः = स्वात्मनः शरासनम् अथवा सु—शोभनं यत् आत्मशरासनं तत् आश्रयो यस्य सः (बहुव्रीहि)। श्रवणातिथिः = श्रवणस्य अतिथिः इति।

टिप्पणियाँ—क्ष्माभुजा = पृथ्वी का भोग करने वाले अर्थात् राजा ने। भीमनृपात्मजाश्रितः=भीम कन्या दमयन्ती के अधीन। (पाठान्तरमें) भीमनृपात्मजालयः = भीमनन्दिनी दमयन्ती ही जिसका आश्रय अथवा स्थान हो ऐसे गुण। गुणः = सौन्दर्य आदि गुण। [कामदेव के धनुष के पक्ष में—] प्रत्यञ्चा अथवा डोरी। तदुच्चधैर्यव्ययसंहितेषुणा = उस [राजा नल] के महान् धैर्य को नाश करने के लिये [अपने] धनुष पर बाण चढ़ाने वाले। स्वात्मशरासनाश्रयः = अपना अथवा [शोभन] धनुष ही है आश्रय जिसका ऐसी प्रत्यञ्चा। श्रवणातिथिः अकारि = कान का अतिथि किया। दमयन्ती के गुणों के पक्ष में अर्थ होगा—श्रवण किया—सुना-कर्णगोचर किया। कामदेव के धनुष की डोरी के पक्ष में अर्थ होगा—कान तक [डोरी अथवा प्रत्यञ्चा को] खींचा।

अमुष्य धीरस्य जयाय साहसी तदा खलु ज्यां विशिखैस्सनाथयन्।
निमज्जयामास यशांसि संशये स्मरस्त्रिलोकीविजयार्जितान्यपि ॥४५॥

म०—अमुष्येति। स स्मरः साहसी साहसकारः 'न साहसमनारुह्य नरो

भद्राणि पश्यती'ति न्यायादविलम्बी सन्नित्यर्थः। अमुष्य धीरस्य अविचलितस्य नलस्य जयाय शरासनज्यां निजधनुर्मौर्वीं विशिखैः शरैः सनाथयन् सनाथां कुर्वन् संयोजयन्नित्यर्थः, त्रयाणां लोकानां समाहारस्त्रिलोकी 'तद्धितार्थे'त्यादिना समासः, 'अकारान्तोत्तरपदो द्विगुः स्त्रियामिष्यत' इति स्त्रीलिङ्गत्वात् 'द्विगोरि'ति ङीप्। तस्य विजयेनार्जितानि सम्पादितान्यपि यशांसि संशये निमज्जयामास किं पुनः सम्प्रति सम्पाद्यमित्यपिशब्दार्थः। वृद्धयपेक्षया अनुचितकर्मारम्भे मूलमपि नश्येदिति संशयितवानित्यर्थः। अत्र स्मरस्योक्तसंशयाऽसम्बन्धेऽपि तत्सम्बन्धोक्तेरतिशयोक्तिः॥ ४५॥

अन्वय—तदा खलु धीरस्य अमुष्य जयाय ज्यां विशिखैः सनाथयन् साहसी स्मरः त्रिलोकीविजयार्जितानि यशांसि अपि संशये निमज्जयामास।

संस्कृत-व्याख्या—तदा = तस्मिन् समये, खलु—निश्चयेन, धीरस्य = अविचलितस्य, अमुष्य = नलस्य, जयाय = विजयाय, ज्याम् = मौर्वीम् विशिखैः = शरैः, सनाथयन् = सनाथां कुर्वन्—संयोजयन्—इत्यर्थः, साहसी = साहसकरः, स्मरः = कामदेवः, त्रिलोकीविजयार्जितानि = त्रयाणां लोकानां समाहारः—त्रिलोकी तस्य विजयेन अर्जितानि सम्पादितानि, यशांसि = कीर्त्तयः, अपि, संशये = संदेहे, निमज्जयामास = निक्षिप्तवान्। वृद्धयपेक्षया अनुचितकर्मारम्भे मूलमपि नश्येदिति संशयितवानित्यर्थः।

हिन्दी-अनुवाद—तदा = उस समय, खलु = निश्चय के साथ, धीरस्य = धैर्यशाली, अमुष्य = इस राजा नल को जयाय = जीतने के लिये, ज्याम् = [अपने धनुष की] प्रत्यञ्चा को, विशिखैः = बाणों से, सनाथयन् = युक्त करते हुये, साहसी = साहसयुक्त, स्मरः = कामदेव ने, त्रिलोकीविजयार्जितानि = तीनों लोकों को जीतने से प्राप्त हुये [अपने], यशांसि = यश को, अपि = भी, संशये = सन्देह में, निमज्जयामास = डाल दिया।

भावार्थ—उस समय इस धैर्यशाली नल पर विजय प्राप्त करने के लिये अपने धनुष की प्रत्यञ्चा को बाणों से युक्त करते हुये साहसी कामदेव ने तीनों लोकों के लोगों पर विजय प्राप्त करने से प्राप्त हुये अपने यश को सन्देह में डाल दिया।

यद्यपि महान् धैर्यशाली राजा नल को जीत लेना कामदेव के लिये एक दुष्कर कार्य ही था किन्तु फिर भी उसने ऐसा करने का साहस किया। क्योंकि अनुचित कार्य के करने से यश की वृद्धि तो दूर रही, मूल भी नष्ट हो जाया करता है।

अलङ्कार—उपर्युक्त श्लोक में वर्णित संशय के साथ कामदेव का सम्बन्ध न होने पर भी कामदेव के साथ उसका सम्बन्ध प्रदर्शित किया गया है—अतः "अतिशयोक्ति" अलङ्कार है।

व्याकरण—**जयाय** = इसमें "तुमर्थाच्च भाववचनात्" सूत्र से चतुर्थी विभक्ति हुई है। **त्रिलोकी** = त्रयाणां लोकानां समाहारः "त्रिलोकी" इस द्विगु समास में "द्विगोः" इस सूत्र से ङीप् होता है।

समास—**त्रिलोकीविजयार्जितानि** = त्रयाणां लोकानां समाहारः त्रिलोकी (द्विगु), त्रिलोक्याः विजयः त्रिलोकीविजयः, (षष्ठी तत्पु०) तेन अर्जितानि (तृतीया तत्पु०) इति।

टिप्पणियाँ—**धीरस्य** = धैर्यशाली।, **अमुष्य** = इस (राजा नल) के। **जयाय** = जीतने के लिये। **ज्याम्** = डोरी अथवा प्रत्यञ्चा को—"मौर्वीज्या-शिञ्जिनी गुणः',–इत्यमरः। **विशिखैः** = बाणों से—" पृषत्कबाणविशिखा अजिह्मगखगाशुगाः—इत्यमरः। **सनाथयन्** = सनाथ अर्थात् युक्त करते हुये। **साहसी** = साहसयुक्त—साहस से परिपूर्ण। अपनी शक्ति से अधिक कार्य करने की क्षमता साहस से ही आया करती है—"न साहसमनारुह्य नरो भद्राणि पश्यति"। **स्मरः** = कामदेव। **त्रिलोकीविजयार्जितानि** = तीनों लोकों अथवा भुवनों को जीत लेने से प्राप्त हुये। **यशांसि** = यश को, कीर्ति को। **निमज्जयामास** = डुबो दिया—डाल दिया। राजा नल कामदेव की अपेक्षा सौन्दर्य, गुणों तथा बल आदि सभी में कहीं अधिक थे अतः उनपर विजय प्राप्त करने की इच्छा करना भी कामदेव के लिये नितान्त अनुचित था। अतएव उनके द्वारा राजा नल को जीतने के लिये किया गया साहस दुस्साहस मात्र ही कहा जायगा। फिर भी उसने साहस किया और इस भाँति उसने अपने त्रिलोकविजयी यश को खतरे में डाल दिया।

प्रसङ्ग—राजा नल अत्यन्त महान् तथा धीर व्यक्ति थे फिर भी वे काम के वशीभूत होगये। इससे प्रतीत होता है कि भगवदिच्छा ही ऐसी थी—

अनेन भैमीं घटयिष्यतस्तथा विधेरबन्ध्येच्छतया व्यलासि तत्।
अभेदि तत्तादृगनङ्गमार्गणैर्यदस्य पौष्पैरपि धैर्यकञ्चुकम्॥ ४६॥

म०—दैवसहायात् पुष्पेषोरेव पुरुषकारः फलित इत्याह=अनेनेति। अनेन नलेन सह भैमीं घटयिष्यतः योजयिष्यतो विधेर्विधातुरबन्ध्येच्छतया अमोघ-

सङ्कल्पत्वेन यत्तस्मात्तथा तेन प्रकारेण योऽग्रे वक्ष्यते इति भावः। व्यलासि विलसितं लसतेर्भावे लुङ्। यत् पौष्पैरपि न तु कठिनैरनङ्गस्य न तु देहवतः मार्गणैर्धैर्यमेव कञ्चुकमस्य नलस्य अभेदि भिन्नं, कर्म्मणि लुङ्। दमयन्तीनलयोर्दाम्पत्यघटनाय अनङ्गमार्गणैर्नलधैर्यकञ्चुकभेदनाद्विधेरवन्ध्येच्छत्वं विज्ञायत इत्यर्थः, दैवानुकूल्ये किं दुष्करमिति भावः। तत्रानङ्गपौष्पयोः कञ्चुकं भिन्नमिति विरोधः, तस्य विलासेनाभासीकरणाद्विरोधाभासः, स च धैर्यकञ्चुकमिति रूपकोत्थापित इति तयोरङ्गाङ्गिभावेन सङ्करः॥ ४६॥

अन्वय—अस्य तत् तादृक् धैर्यकञ्चुकं पौष्पैः अपि अनङ्गमार्गणैः यत् अभेदि तत् तथा अनेन भैमीं घटयिष्यतः विधेः अवन्ध्येच्छतया व्यलासि।

संस्कृत-व्याख्या—अस्य = नलस्य, तत् = प्रसिद्धम्, तादृक् = तथा अभेद्यमित्यर्थः, धैर्यकञ्चुकम् = धैर्यमेव कञ्चुकम्, पौष्पैः अपि = कुसुम निर्मितैरपि, अनङ्गमार्गणैः = कन्दर्पबाणैः, यत् = यस्माद्, अभेदि = भिन्नम्; तत् = तस्मात्, तथा = तेन प्रकोरण, अनेन = नलेन, भैमीम् = दमयन्तीम्, घटयिष्यतः = योजयिष्यतः, विधेः=विधातुः, अवन्ध्येच्छतया = अमोघसंकल्पत्वेन, व्यलासि = विलसितम्। दमयन्तीनलयोः दाम्पत्यघटनाय कामबाणैः नलधैर्यकञ्चुकभेदनाद् विधातुः अमोघसंकल्पत्वं विज्ञायतेः, इत्यर्थः, दैवानुकूल्ये किं दुष्करम् ?—इति भावः।

हिन्दी-अनुवाद—अस्य = इस नल का, तत् = प्रसिद्ध, तादृक् = वैसा (अभेद्य), धैर्यकञ्चुकम् = धैर्यरूपी कवच, पौष्पैरपि = कुसुमनिर्मित अर्थात् अति सुकोमल, अनङ्गमार्गणैः = कामदेव के बाणों से, यत् = जिस कारण, अभेदि = विदीर्ण हो गया; तत् = उस कारण, तथा = उस प्रकार से, अनेन = नल के साथ, भैमीम् = दमयन्ती का, घटयिष्यतः = संगम कराने वाले, विधेः= विधाता के, अवन्ध्येच्छतया = अमोघ संकल्प का ही, व्यलासि = विलास था।

भावार्थ—वैसे प्रसिद्ध एवं दुर्भेद्य राजा नल के साथ उस प्रकार का (इन्द्र आदि देवों का त्यागकर) दमयन्ती का संगम कराने वाले विधाता के सफल मनोरथ का ही यह विलास था। अन्यथा अत्यधिक शूरवीर एवं महान् धैर्यसम्पन्न राजा नल का धैर्य अशरीरी कामदेव के पुष्पनिर्मित कोमलतम बाणों से कदापि भेदा नहीं जा सकता था। इससे ज्ञात होता है कि विधाता की इच्छा के विरुद्ध कुछ भी कर सकना संभव नहीं हुआ करता है अथवा विधाता के अनुकूल होने पर संसार में कुछ भी असंभव नहीं हुआ करता है।

कामदेव के पुष्पसदृश सुकोमल वाणों ने राजा नल के धैर्यरूपी कवच को विदीर्ण कर डाला। इससे यह भाव प्रकट होता है कि ब्रह्मा की ही यह दृढ़ इच्छा थी कि दमयन्ती का संयोग राजा नल के साथ हो।

अलङ्कार—इसमें "शरीररहित (कामदेव) के बाणों द्वारा कवच नष्ट हो गया" में स्पष्ट विरोध की प्रतीति होती है किन्तु विधाता के विलास द्वारा उस विरोध का परिहार भी प्रस्तुत कर दिया गया है। अतः विरोधाभास" अलङ्कार है। "धैर्यकञ्चुकम्" में रूपक अलङ्कार का होना स्पष्ट ही है। अतएव दोनों में अंग-अंगी भाव से "संकर" है।

व्याकरण—**पौष्पैः**=पुष्प + अण्। **अभेदि**=भिद् + लुङ्। **घटयिष्यतः**= घट् + णिच् + लृट्—शतृ = घटयिष्यन् (षष्ठी एकवचन में—घटयिष्यतः)। **अवन्ध्येच्छतया** = अवन्ध्येच्छ + तल् + टाप् (तृतीया एकवचन में—अवन्ध्येच्छतया)।

समास—**धैर्यकञ्चुकम्** = धैर्यमेव कञ्चुकम्—इति। **अनङ्गमार्गणैः**= नास्ति अङ्गं यस्य स अनङ्गः (बहुव्रीहि) तस्य मार्गणैः। **अवन्ध्येच्छतया** = अवन्ध्या अव्यर्था इच्छा यस्य स अवन्ध्येच्छया तया।

टिप्पणियाँ—**तादृक्** = उस प्रकार का अर्थात् दुर्भेद्य। **धैर्यकञ्चुकम्**= धैर्यरूपी कवच अथवा कंचुक [कञ्चुको वारबाणोऽस्त्री—इत्यमरः]। **पौष्पैः**= फूलों से निर्मित। **अनङ्गमार्गणैः** = अशरीरी अथवा शरीररहित (भगवान् शिव द्वारा कामदेव का शरीर नष्ट कर दिया गया था—तभी से कामदेव का नाम "अनङ्ग" पड़ गया ["कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मृतः"—इत्यमरः।] कामदेव के पंच प्रसिद्ध बाण पाँच फूल ही माने जाते हैं और वे ये हैं—"अरविन्दमशोकञ्च चूतञ्च नवमल्लिका। नीलोत्पलञ्च पञ्चैते पञ्चबाणस्य सायकाः॥" **यत्** = जिस कारण से। **अभेदि** = भेद दिया—विदीर्ण कर दिया। **घटयिष्यतः** = आगे आने वाले समय में संगम कराने की इच्छा रखने वाले। **विधेः** = विधाता के अथवा भाग्य के। **अवन्ध्येच्छतया** = सफल मनोरथ अथवा दृढ़संकल्प वाला होने से। **व्यलासि** = विलास था।

प्रसङ्ग—राजा नल अपने से न्यून कान्ति वाले कामदेव को नहीं लाँघ सके—

किमन्यदद्यापि यदस्त्रतापितः पितामहो वारिजमाश्रयत्यहो।
स्मरं तनुच्छायतया तमात्मना शशाक शङ्के स न लङ्घितुं नलः ॥४७॥

म०—अथ विधिमपि जितवतः किं विध्यपेत्त्यैत्याशयेनाह—किमिति। किमन्यत् अन्यत् किमुच्यते, पितामहो विधिरपि तस्य स्मरस्यास्त्रैस्तापितः सन्तापितः अद्यापि वारिजमाश्रयति तस्य पद्मासनत्वादिति भावः। सर्वनीतेरपचारश्च गम्यते, अहो विधेरपि स्मरविधेयत्वमाश्चर्यम्। पितामहतापिनं स्मरं स नलः आत्मनस्तनोः छायेव छाया कान्तिर्यस्य तस्य भावस्तत्ता तया तनुच्छायतया तनोश्छाया अनातपस्तनुच्छाया तत्तयेति च गम्यते 'छाया त्वनातपे कान्ताविति'वैजयन्ती। लङ्घितुं न शशाक इत्यहं शङ्के, न हि स्वच्छाया लङ्घितुं शक्या इति भावः। अत्र स्मरलङ्घने पितामहोऽप्यशक्तः किमुत नल इत्यर्थापत्तिस्तावदेकोऽलङ्कारः। 'एकस्य वस्तुनो भावाद्यत्र वस्त्वन्यथा भवेत्। कैमुत्यन्यायतः सा स्यादर्थापत्तिरलङ्क्रिया'॥ इति लक्षणात्। तनोश्छायेवच्छायेत्युपमा छाययोरभेदाध्यवसायादतिशयोक्ति एतत्त्रितयोपजीवनेनालङ्घ्यत्वे तनुच्छायतताया हेतुत्वोत्प्रेक्षा सङ्कीर्णा, सा च शङ्क इति व्यञ्जकप्रयोगा द्वाच्येति॥ ४७॥

अन्वय—किमन्यत्? अहो, यदस्त्रतापितः पितामहः अद्यापि वारिजं आश्रयति। तं स्मरं स नलः आत्मनः तनुच्छायतया लंघितुं न शशाक [इति] शङ्के।

संस्कृत-व्याख्या—किम् अन्यत्=अन्यत् किं उच्यते ?, अहो = आश्चर्यम्, यदस्त्रतापितः = यस्य कामस्य अस्त्रैः बाणैः तापितः सन्तापितः, पितामहः = विधिः, अद्यापि = इदानीमपि, वारिजम् = जलजम्, आश्रयति = अवलम्बते [तस्य पद्मासनत्वादित्यर्थः]। तम्, स्मरम् = कामम्, सः नलः, आत्मनः = स्वस्य, तनुच्छायतया = तनोः शरीरस्य छाया कान्तिः यस्य तस्य भावः तत्ता तया, लंघितुम् = अतिक्रमितुम्, न शशाक = शक्तः नाभूत्, [इति] शङ्के = इत्यहं मन्ये।

हिन्दी-अनुवाद—किमन्यत् = और क्या कहा जाय ?, अहो = आश्चर्य की बात है कि, यदस्त्रतापितः = जिस (कामदेव) के अस्त्रों से संतापित, पितामहः = ब्रह्मा भी, अद्यापि = आज तक भी [कमलासन होने के कारण] वारिजम् = कमल का, आश्रयति = सहारा लिये हुये है। तम् = उस, स्मरम्, कामदेव को, स नलः = वह नल, आत्मनः = अपने, तनुच्छायतया = अपने शरीर की कान्ति की छाया सदृश कान्ति से युक्त होने के कारण, लंघितुम् = अतिक्रमण कर सकने में, न शशाक = समर्थ न हो सके [इति] शङ्के = ऐसा मैं मानता हूँ।

भावार्थ—और अधिक क्या कहा जाय ? ब्रह्मा भी इस कामदेव के वाणों के प्रभाव से संतप्त होकर निरन्तर कमल का ही आश्रय प्राप्त किये हुये हैं और इसी कारण उनको "कमलासन" भी कहा जाता है फिर राजा नल तो सांसारिक पुरुष ही थे वे, यद्यपि शारीरिक कान्ति की दृष्टि से कामदेव को नीचा दिखला चुके थे, किन्तु उनकी दमयन्ती के प्रति अनुरक्ति देखकर कामदेव को अपना बदला लेने का अच्छा अवसर प्राप्त हो गया था, अतः इस अवस्था में वे काम के वाणों के प्रभाव को अपने से दूर न कर सके। जब ब्रह्मा, जिन्हे सृष्टि का उत्पादक कहा जाता है, वे ही काम के प्रभाव को अपने से दूर हटा सकने में समर्थ नहीं हो सके तो फिर राजा नल की तो हस्ती ही क्या थी ? वे किस भाँति उस काम के बाणों के प्रभाव का उल्लंघन कर सकने में सक्षम हो सकते थे ?

जिस कामदेव ने अतिशय वृद्ध पितामह (ब्रह्मा) को ऐसा सन्तप्त कर दिया कि इतना अधिक समय व्यतीत हो जाने पर भी उन्हें आज तक कमल का आश्रय प्राप्त करना पड़ रहा है, फिर वही काम अपने प्रतिद्वन्दी राजा नल को संतप्त नहीं करेगा, यह कैसे संभव हो सकता था ?

राजा नल अत्यधिक (काम से अधिक) सुन्दर थे। कामदेव को उनके शरीर की छाया (परछाईं) ही माना गया था। अतएव नल अपने शरीर की छाया रूप उस कामदेव का उल्लंघन कैसे कर सकते थे ? क्योंकि संसार में अति प्रबल व्यक्ति भी अपने शरीर की परछाईं को कभी भी लाँघ नहीं सकता—स्वशरीर की छाया सभी के लिये अनतिक्रमणीय (अनुल्लंघनीय) ही हुआ करती है।

अलङ्कार—इस श्लोक में कामदेव के 'अलंघ्यत्व सम्बन्धी हेतु की संभावना किये जाने से "हेतूत्प्रेक्षा" अलङ्कार है। उत्प्रेक्षावाचक शब्द "शङ्के" है। "कामदेव का अतिक्रमण किये जाने में जब ब्रह्मा भी समर्थ नहीं हैं तब राजा नल की तो बात ही क्या ?" इस भाग में "अर्थापत्ति" अलङ्कार है तथा "तनोश्छायेव छाया" में "उपमा" भी बन जाती है।

व्याकरण—वारिजम् = वारि + जन् + ड (नपु० लिं० प्रथमा वि० एकवचन)। तनुच्छायतया=तनुच्छाय + तल् + टाप् (तृतीया-एकवचन)। शशाक—शक् + लिट्।

समास—यदस्त्रतापितः = यस्य अस्त्राणि (षष्ठी तत्पु०) यदस्त्राणि, तैः

तापितः (तृतीया तत्पु०) । **वारिजम्** = वारिणि जायते इति वारिजम् । **तनुच्छायतया** = तनोः छाया इव छाया यस्य स तनुच्छायता तया ।

टिप्पणियाँ—किमन्यत् = और क्या कहा जाय अर्थात् इससे भी अधिक और क्या कहा जा सकता है कि भगवान् ब्रह्मा भी काम के बाणों से संतप्त हो गये थे और आज तक उसी अवस्था में विद्यमान हैं। इसी कारण कमलों का आश्रय भी प्राप्त किये हुये हैं। **अहो** = यह आश्चर्योत्पादक अव्यय है। **यदस्त्रतापितः**=जिसके अस्त्रों अर्थात् पुष्पनिर्मित बाणों से संतप्त। **पितामहः**= ब्रह्मा। **वारिजम्** = कमल का। ब्रह्मा का आसन कमल माना गया है अतः महाकवि ने ब्रह्मा के स्वभाव सिद्ध कमलासनत्व के बारे में कामसंतप्त होने सम्बन्धी संभावना की है। संतप्तावस्था में विद्यमान व्यक्ति शीतलवस्तु के आश्रय की ही सदैव इच्छा किया करता है। **आश्रयति** = आश्रय अथवा सहारा प्राप्त किया है। **तनुच्छायतया** = [अपने] शरीर की छाया के सदृश छाया को धारण किये हुये होने के कारण—"छाया त्वनातपे कान्तौ"—इति वैजयन्ती। **लङ्घितुम्** = अतिक्रमण कर सकने में, उल्लंघन करने हेतु, लाँघ सकने में। **शशाक** = समर्थ अथवा सक्षम हुआ।

प्रसङ्ग—वह दमयन्ती लज्जारूपिणी नदी को पार करके राजा नल के हृदय में प्रविष्ट हो गयी—

उरोभुवा कुम्भयुगेन जृम्भितं नवोपहारेण वयस्कृतेन किम्।
त्रपासरिद्दुर्गमपि प्रतीर्य सा नलस्य तन्वी हृदयं विवेश यत् ॥ ४८ ॥

म०—उरोभुवेति। सा तन्वी भैमी त्रपैव सरित् सैव दुर्गं नलसम्बन्धि तदपि प्रतीर्य्य नलस्य हृदयं विवेशेति यत् तत्प्रवेशनं यत्तदोर्नित्यसम्बन्धात्, वयस्कृतेन नवोपहारेण नूतननिर्म्माणेन उरोभुवा तज्जन्येन कुम्भयुगेन कुचयुगाख्येनेति भावः, इत्यतिशयोक्तिः। 'न लोके'त्यादिना कृद्योगषष्ठीप्रतिषेधात्कर्त्तरि तृतीया, 'नपुंसके भाव उपसंख्यानमि'ति षष्ठी तु शेषविवक्षायाम्। जृम्भितं जृम्भणं किमुत्प्रेक्षा सा चोक्तातिशयोक्तिमूलेति सङ्करः। दमयन्तीकुचकुम्भविभ्रमश्रवणात्त्रपां विहाय तस्यामासक्तचित्तोऽभूदित्यर्थः, तेन मनःसङ्ग उक्तः ॥ ४८ ॥

अन्वय—सा तन्वी त्रपासरिद्दुर्गं अपि प्रतीर्य नलस्य हृदयं यत् विवेश, [तत्] किं वयस्कृतेन नवोपहारेण उरोभुवा कुम्भयुगेन जृम्भितम् ॥

संस्कृत-व्याख्या—सा = प्रसिद्धा, तन्वी = कृशाङ्गी, दमयन्ती, त्रपासरित्-दुर्गमपि = त्रपा लज्जा एव सरित् नदी तस्याः दुर्गं नल सम्बन्धि तदपि, प्रतीर्य = तीर्त्वा, नलस्य, हृदयम् = चित्तम्, यत्, विवेश = प्रविष्टवती, [तत् = प्रवेशनम्], किम् वयस्कृतेन = वयसा युवावस्थया कृतेन संपादितेन, नवोपहारेण = नवः नूतनः उपहारः उपायनं तद्रूपेण, उरोभुवा = उरसि जन्येन, कुम्भयुगेन = कुचकलशद्वयेन कुचयुगाख्येन वा, जृम्भितम् = विलसितम् ? दमयन्तीकुचकुम्भविलासश्रवणात् नलः त्रपां विहाय तस्यां आसक्त-चित्तः अभूदित्यर्थः ।

हिन्दी-अनुवाद—सा = उस, तन्वी = कृशाङ्गी (दमयन्ती) ने, त्रपासरिद्दुर्गमपि = लज्जारूपिणी नदीरूप दुर्ग को भी, प्रतीर्य = पार करके, नलस्य = (राजा) नल के, हृदयम् = हृदय में, यत् = जो, विवेश = प्रवेश पा लिया; [तत् = वह], किम् = क्या, वयस्कृतेन = युवावस्था द्वारा दिये गये, नवोपहारेण = नवीन उपहाररूप, उरोभुवा = वक्षःस्थल पर उत्पन्न हुये, कुम्भयुगेन = दोनों स्तनरूपी कलशों का, जृम्भितम् = विलास था ?

भावार्थ—कृशाङ्गी वह दमयन्ती अपनी लज्जारूपिणी नदी के उत्कृष्टतम प्राकार को पारकर जो नल के हृदय में प्रविष्ट होगयी, वह क्या युवावस्था द्वारा दिये गये नवीन (मुक्ताहार के सदृश) उपहार से युक्त वक्षस्थल पर उत्पन्न हुये स्तनरूप दो कलशों का ही प्रभाव था ।

जिस भाँति कोई अभिसारिका दो घड़ों की सहायता से नदी को पारकर दुर्गम संकेतस्थल पर पहुँच जाया करती है उसी भाँति दमयन्ती ने भी दो स्तनरूपी कलशों की सहायता से लज्जारूपिणी नदी के प्राकार को पार करके राजा नल के हृदय में प्रवेश प्राप्त कर लिया ।

अलङ्कार—इस श्लोक में अतिशयोक्तिमूलक "उत्प्रेक्षा" नामक अलङ्कार है ।

व्याकरण—**प्रतीर्य**=प्र + तॄ + क्त्वा—ल्यप् । **उरोभुवा** = उरस् + भू + क्विप् (तृतीया एकवचन में) । **जृम्भितम्** = जृम्भ् + क्त (भाव में) ।

समास—**त्रपासरिद्दुर्गम्** = त्रपा एव सरित् तस्याः दुर्गम्—इति । **वयस्कृतेन** = वयसा कृतं इति वयस्कृतम्—तेन । **नवोपहारेण** = नवः उपहारः इति नवोपहारः (कर्मधारय) तेन । **उरोभुवा** = उरसि भवतीति उरोभू तेन ।

टिप्पणी—तन्वी = कृशाङ्गी—दुबले अंगों वाली—पतली दुबली। **त्रपासरिद्दुर्गम्** = लज्जारूपी नदी के दुर्ग को अथवा लज्जा-नदी रूपी दुर्ग को। [दुर्ग–किला]। **प्रतीर्य** = पार करके। **वयस्कृतेन** = युवावस्था द्वारा किये गये अथवा युवावस्था द्वारा दिये गये। **नवोपहारेण** = नवीन उपहाररूप। **उरोभुवा** = वक्षस्थल पर उत्पन्न होने वाले। **कुम्भयुगेन** = दो कलशों से। दो स्तनों रूपी कलशों से। **जृम्भितम्** = विलास था।

प्रसङ्ग—दमयन्ती के विरह से उत्पन्न राजा नल की अधीरता को उनकी शय्या ही जान सकी—कोई दूसरा नहीं—

अपह्नुवानस्य जनाय यन्निजामधीरतामस्य कृतं मनोभुवा।
अबोधि तज्जागरदुःखसाक्षिणी निशा च शय्या च शशाङ्ककोमला ॥४९॥

म०—अथास्य जागरावस्थामाह—अपह्नुवानस्येति। निजामधीरतां चपलत्वं जनायापह्नुवानस्यापलपतः 'श्लाघह्नुङ्स्थे' त्यादिना सम्प्रदानत्वाच्चतुर्थी। अस्य नलस्य मनोभुवा कामेन यज्जागरप्रलापादिकं कृतन्तत्सर्वं जागरदुःखस्य साक्षिणी। 'साक्षाद्द्रष्टरि संज्ञायामि'ति साक्षाच्छब्दादिनिप्रत्यये ङीप्। शशाङ्केन कोमला रम्या निशा चाबोधि। 'दीपजने'त्यादिना कर्त्तरि च्लेश्चिणादेशः। तथा शशाङ्कवत्कोमला मृदुला शय्या अबोधि, निशायां शय्यायां जागरणयोस्तत्साक्षित्वमिति भावः॥ ४९॥

अन्वय—निजां अधीरतां जनाय अपह्नुवानस्य अस्य मनोभुवा यत् कृतं तत् जागरदुःखसाक्षिणी शशाङ्ककोमला शय्या च निशा च अबोधि।

संस्कृत-व्याख्या—निजाम्=स्वकीयाम्, अधीरताम्=चपलत्वम्, जनाय= लोकाय, अपह्नुवानस्य = गोपायतः, अस्य = नलस्य, मनोभुवा = कामेन, यत् = अनिर्वाच्यम्, कृतम् = विहितम्, तत्, जागरदुःखसाक्षिणी = जागरणजन्यकष्टस्य साक्षिणी, शशाङ्ककोमला = शशस्य मृगविशेषस्य अङ्कः उत्सङ्गः तद्वत् कोमला मृदुला, शय्या = आस्तरणम्, च [शशाङ्केन चन्द्रेण कोमला रम्या—] निशा च = रात्रिश्च, अबोधि = जानाति स्म।

हिन्दी-अनुवाद—निजाम् = अपनी, अधीरताम् = अधीरता को, जनाय= लोगों से, अपह्नुवानस्य = छिपाते हुये, अस्य = इस राजा नल के साथ, मनोभुवा = कामदेव ने, यत् कृतम् = जो किया था, तत् = उसे, जागरदुःखसाक्षिणी = जागरण के कष्ट को साक्षात् (प्रत्यक्ष) रूप से देखने वाली तथा शशाङ्ककोमला = मृगविशेष की गोद के समान कोमल, शय्या = शय्या, च =

और, [शशाङ्ककोमला = चन्द्रमा से रमणीय—] निशा = रात्रि ही, अबोधि= जानती थी।

भावार्थ—अन्य लोगों से अपनी दमयन्ती संबंधी अनुरक्ति से होने वाली चंचलता को छिपाने वाले राजा नल के साथ कामदेव ने जो भी व्यवहार किया उसको राजा नल के रात्रिपर्यन्त जागरण को देखने वाली सुकोमल शय्या अथवा चन्द्रमा के कारण अत्यन्त मनोहर रात्रि ही जानती थी।

राजा नल काम द्वारा संतप्त किये जा चुके थे अतः उनको रात्रि में निद्रा नहीं आती थी और वे अपनी शय्या पर करवटें ही बदलते रहते थे। इसी भाँति उनकी रात्रियाँ व्यतीत हो रही थीं। अतः राजा नल की शारीरिक एवं मानसिक कष्टजन्य विकलता को प्रत्यक्षरूप से देखने वाली या तो उनकी शय्या ही थी अथवा रात्रि ही थी।

व्याकरण—**अधीरताम्** = अधीर + तल् + टाप् = अधीरता—द्वितीया-एकवचन में—अधीरताम्। **जनाय** = यहाँ पर "श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमानः" सूत्र से "जनाय अपह्नुवानस्य" के प्रयोग की दृष्टि से ह्नु धातु के योग में "चतुर्थी विभक्ति" हुयी है। **अपह्नुवानस्य** = अप + ह्नु + लट्—शानच् = अपह्नुवानः—षष्ठी एकवचन में अपह्नुवानस्य। **मनोभुवा** = मनस् + भू + क्विप्—तृतीया एकवचन में। **साक्षिणी** = साक्षात् + इनि + ङीप्। **शय्या** = शी + क्यप् ("सत्तायां समजनिपदनिपतमनविदषुञ्शीङ्भृञिणः" सूत्र से) तदनन्तर "अयङ् यि क्ङिति" सूत्र से अयङादेश। **अबोधि** = बुध् (दिवादिगणी) + लुङ् (कर्त्ता में—) तिप्—"दीपजन···" इत्यादि सूत्र से च्लि के स्थान पर चिणादेश होकर।"

समास—**अधीरताम्** = अधीरस्य भावः अधीरता ताम्। **मनोभुवा** = मनसि भवतीति मनोभूः तेन। **जागरदुःखसाक्षिणी** = जागरस्य यत् दुःखम् तस्य साक्षिणी। **शशाङ्ककोमला** = शशाङ्कवत् कोमला इति (उपमित समास)। **शय्या** = शेते अस्यामिति शय्या। **निशा** = नितरां श्यति तनूकरोति व्यापारान् इति निशा।

टिप्पणियाँ—**निजाम् अधीरताम्** = अपनी अधीरता को। राजा नल के हृदय में दमयन्ती को स्थान प्राप्त हो चुका था। इस परिस्थिति को समझकर कामदेव ने भी राजा नल पर अपना प्रभाव उत्पन्न किया। अतः उनकी दमयन्ती विषयक अभिलाषा और भी अधिक उत्कट हो गयी। और उसी के

कारण उनके हृदय में अधैर्य उत्पन्न हो गया। जनात्=लोगों से। अपह्नुवानस्य=छिपाते हुये। मनोभुवा=कामदेव ने। जागरदुःखसाक्षिणी=(राजा नल के सम्पूर्ण रात्रि—) जागरण किये जाने से उत्पन्न हुये कष्ट की प्रत्यक्ष द्रष्टा। शशाङ्ककोमला=मृगविशेष की गोद के सदृश सुकोमल अथवा चन्द्रमा के समान शुभ्रवर्ण की [रात्रि के पक्ष में—] चन्द्रमा के सदृश सुन्दर अथवा चन्द्रमा (की चाँदनी) से सुशोभित। निशा=रात्रि। अवोधि=जाना, समझा—अथवा—जानती थी।

प्रसङ्ग—अत्यधिक काम-संतप्त हो जाने पर भी राजा नल ने विदर्भराज भीम से उनकी कन्या दमयन्ती की याचना नहीं की—

स्मरोपतप्तोऽपि भृशं न स प्रभुर्विदर्भराजं तनयामयाचत।
त्यजन्त्यसूञ्शर्म च मानिनो वरं त्यजन्ति न त्वेकमयाचितव्रतम् ॥५०॥

म०—ननु किमनेन निबन्धनेन, याच्यताम्भीमभूपतिर्दमयन्तीम्, नेत्याह—स्मरेत्यादि। भृशं गाढं स्मरोपतप्तः कामसन्तप्तोऽपि प्रभुः समर्थः स नलः विदर्भराजं भीमनृपतितनयां दमयन्तीं न अयाचत न याचितवान् 'दुहियाची' त्यादिना याचेर्द्विकर्मकता। तथाहि—मानिनो मनस्विनोऽत्युच्चमनस्काः असून् प्राणान् शर्म च सुखञ्च त्यजन्ति एतत्त्यागोऽपि वरं मनाक् वरमिति मनागुत्कर्ष इति महोपाध्यायवर्द्धमानः। किन्तु, एकमद्वितीयमयाचितव्रतम् अयाञ्चानियमन्तु न त्यजन्ति, मानिनां प्राणत्यागदुःखाद् दुःसहं याञ्चाया दुःखमित्यर्थः। सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्यासः ॥ ५० ॥

अन्वय—भृशं स्मरोपतप्तोऽपि स प्रभुः विदर्भराजं तनयां न अयाचत। मानिनः असून् शर्म च वरं त्यजन्ति, तु एकं अयाचितव्रतं न त्यजन्ति।

संस्कृत-व्याख्या—भृशम्=गाढम्, स्मरोपतप्तः अपि=कामसंतप्तः अपि, स प्रभुः=सः राजा नलः, विदर्भराजम्=विदर्भदेशाधिपं भीमम्, तनयाम्=कन्यां दमयन्तीम्, न अयाचत=न याचितवान्। मानिनः=मनस्विनः, असून्=प्राणान्, शर्म च=सुखं च, वरम्=कामम्, त्यजन्ति; तु=किन्तु, एकम्=अद्वितीयम्, अयाचितव्रतम्=अयाञ्चानियमम्, न त्यजन्ति=न जहति। मानिनां प्राणत्यागदुःखाद् याचनायाः दुःखं दुःसहं भवतीत्यर्थः।

हिन्दी-अनुवाद—भृशम्=अत्यधिक, स्मरोपतप्तः अपि=कामद्वारा संतप्त हो जाने पर भी, स प्रभुः=उस राजा नल ने, विदर्भराजम्=विदर्भ-नरेश राजा भीम से, तनयाम्=उनकी कन्या दमयन्ती को, न अयाचत=नहीं

माँगा। मानिनः = स्वाभिमानी अथवा मनस्वी जन, असून् = प्राणों, शर्म च = और सुख को, वरम् = भलेही, त्यजन्ति = छोड़ दिया करते हैं, तु = किन्तु, एकम् = एक, अयाचितव्रतम् = याचना न करने के नियम को, न त्यजन्ति = नहीं छोड़ा करते हैं। मानी पुरुष प्राण एवं सुख के त्याग की अपेक्षा न माँगने सम्बन्धी नियम को न त्यागना ही अधिक श्रेष्ठ समझा करते हैं। तात्पर्य यह है कि वे प्राणों तथा अपने सुखों का उत्सर्ग सरलतापूर्वक कर सकते हैं किन्तु किसी से याचना न करने सम्बन्धी नियम को कभी भी छोड़ना पसन्द नहीं करते हैं।

भावार्थ—कामदेव द्वारा अत्यधिक रूप से सताये जाने पर भी राजा नल ने विदर्भराज भीम से उनकी कन्या दमयन्ती की याचना नही की क्योंकि मानी पुरुष प्राण एवं सुख का त्याग भले ही कर देते हैं किन्तु एकमात्र अयाचना के नियम का त्याग नहीं किया करते हैं।

कामदेव राजा नल से बदला लेना चाहता था। अतः उसने राजा नल के हृदय पर पूर्ण प्रभाव डाला और यह चाहा कि वह विदर्भराज से उनकी कन्या दमयन्ती की याचना करें किन्तु राजा नल बड़े ही स्वाभिमानी व्यक्ति थे। उन्होंने कामदेव द्वारा उत्पन्न की गयी हुयी संतप्तावस्था की कोई चिन्ता नहीं की और परिणामस्वरूप दमयन्ती की याचना भी नहीं की क्योंकि स्वाभिमानी व्यक्तियों का यह स्वभाव हुआ करता है कि वे अपने प्राणों अथवा सुखों का त्याग सरलतापूर्वक कर सकते हैं किन्तु न माँगने सम्बन्धी अपने नियम का उल्लंघन कभी भी नहीं किया करते हैं।

अलङ्कार—इस श्लोक में उत्तरार्ध के वाक्यार्थ रूप सामान्य द्वारा पूर्वार्ध के वाक्यार्थ रूप विशेष का समर्थन किया गया है अतः "अर्थान्तरन्यास" अलङ्कार है।

समास—स्मरोपतप्तः = स्मरेण उपतप्तः इति (तृतीया तत्पुरुष)। **विदर्भराजम्** = विदर्भस्य राजा विदर्भराजः तम्। **मानिनः** = मानः अस्ति एषाम् इति मानिनः। अयाचितव्रतम् = न याचितम् अयाचितम् (नञ् तत्पु०), तस्य व्रतम् (षष्ठी तत्पु०)।

व्याकरण—विदर्भराजम् = यहाँ पर "राजाहः सखिभ्यष्टच्" सूत्र से समासान्त "टच्" प्रत्यय हुआ है। **मानिनः** = मान + इनि। **याचित** = याच् + क्त (भाव में)।

साँसों के लेने की अथवा आहें भरने की। **मृषाविषादाभिनयात्** = झूठे विषाद (दुःख) के अभिनय अथवा बहाने से। अथवा विषमत्तीति विषादः [विष + अद् + अण् के अनुसार] इस व्युत्पत्ति के आधार पर "विषाद" शब्द का अर्थ होगा—शिव। तब इस समूचे पद का अर्थ होगा—लम्बी साँसों की परम्परा को झूठे "शिव—शिव" उच्चारण के बहाने से। **जुगोप** = छिपाया। **पाण्डुताम्** = अपने शरीर की सफेदी युक्त पीतिमा (पीलापन) को। **अधिकचन्द्रभागताविभावनात्** = [लेप में] कर्पूर के अंश के अधिक हो जाने की तर्कणा से। चन्द्रभागः = कर्पूर—"घनसारश्चन्द्रसंज्ञः सिताभ्रो हिमवालुका" इत्यमरः। **अपललाप** = छिपाया।

प्रसङ्ग—अपनी प्रिया दमयन्ती की प्राप्ति सम्बधी भावना से ओतप्रोत हृदय वाले राजा नल न तो मिथ्यारूप में देखी गयी दमयन्ती के साथ किये गये भाषण को ही लोगों से छिपा सके और न उसके विरह के कारण उत्पन्न हुयी अपनी मूर्च्छा को ही—

शशाक निह्नोतुमनेन तत्प्रियामयं बभाषे यदलीकवीक्षिताम्।
समाज एवालपितासु वैणिकैर्मुमूर्च्छ यत्पञ्चमसूर्च्छनासु च॥ ५२॥

स०—शशाकेति। अयन्नलोऽलीकवीक्षितां मिथ्यादृष्टां प्रियां दमयन्तीं समाजे सभायामेव यत् बभाषे, वीणा शिल्पमेषां तैर्वैणिकैः वीणावादैः 'शिल्पमि'ति ठञ्। आलपितासु सूच्चरितासु व्यक्तिं गतास्वित्यर्थः। 'रागव्यञ्जक आलाप' इति लक्षणात्। पञ्चमस्य पञ्चमाख्यस्य स्वरस्य मूर्च्छनासु आरोहावरोहणेषु 'क्रमात् स्वराणां सप्तानामारोहादवरोहणम्। मूर्च्छनेत्युच्यत' इति लक्षणात्। पञ्चमग्रहणन्तस्य कोकिलालापकोमलत्वेन उद्दीपकत्वातिशयविवक्षयेत्यनुसन्धेयम्। मुमूर्च्छेत्यपि यत्तदुभयम् अनेक प्रकारेण निह्नोतुमाच्छादयितुं शशाक। 'अये' इति पाठे विषादे इत्यर्थः। 'अये क्रोधे विषादे चे'ति विश्वः। एतेन ह्रीत्यागोन्मादमूर्च्छावस्थाः सूचिता॥ ५२॥

अन्वय—अयं यत् अलीकवीक्षितां प्रियां बभाषे च यत् वैणिकैः पञ्चममूर्च्छनासु आलपितासु समाजे एव मुमूर्च्छ, अये, तत् निह्नोतुं न शशाक।

संस्कृत-व्याख्या—अयम् = नलः, यत्, अलीकवीक्षिताम्=मिथ्यादृष्टाम्, प्रियाम् = दमयन्तीम्, बभाषे = बभाण, च, यत्, वैणिकैः = वीणावादनचतुरैः, पंचममूर्च्छनासु = पंचमस्य पंचमाख्यस्य स्वरस्य मूर्च्छनासु आरोहावरोहणेषु, आलपितासु = सु उच्चरितासु—व्यक्तं गतासु—इत्यर्थः, समाजे एव = सभायां

एव, मुमूर्च्छ = मूर्च्छा आप्नोत्, अये = विषादे, तत्, निह्नोतुम् = आच्छादयितुम्, न शशाक = अशक्नोत्।

हिन्दी-अनुवाद—अयम् = इस [राजा नल] ने, यत् = जो, अलीकवीक्षिताम् = मिथ्यारूप में देखी गयी, प्रियाम् = प्रिया (दमयन्ती) से, बभाषे = वार्त्तालाप किया, च = और, यत् = जो, वैणिकैः = वीणावादकों द्वारा, पंचमसूर्च्छनासु = पंचमस्वर की सूर्च्छनाओं के, आलपितासु = आलापों के अवसर पर, समाजे एव = सभा में ही [वे], मुमूर्च्छ = मूर्च्छित हो गये, अये = दुःख है, तत् = उसे, निह्नोतुम् = छिपा सकने में, वे, न शशाक = समर्थ न हो सके।

भावार्थ—इस राजा नल ने [भावना के वशीभूत होकर] मिथ्यारूप में देखी गयी प्रिया दमयन्ती से जो वार्त्तालाप किया तथा वीणा बजाने वालों के पंचमस्वर सम्बन्धी सूर्च्छनाओं के अवसर पर समाज में ही जो वे बेहोश (सूर्च्छित) हो गये, बड़े दुःख की बात है कि इन दोनों बातों को छिपा सकने में वे समर्थ न हो सके।

[टीकाकार मल्लिनाथ ने "अये न" के स्थान पर "अनेन" पाठ मानकर व्याख्या की है। उसके अनुसार यह व्याख्या होगी—] उक्त वार्त्तालाप और स्वयं सूर्च्छित हो जाने सम्बन्धी दोनों बातों को [अनेन = अनेन प्रकारेण] इस प्रकार से अर्थात् भाग्य के बल पर ही राजा नल छिपाने में समर्थ हो सके। अर्थात् नल के उक्त भाषण और सूर्च्छा को संयोगवश लोग सुन देख नहीं सके।

अथवा—["अये न" पाठ होने पर—] मिथ्यारूप में देखी गयी प्रिया दमयन्ती से जो राजा नल ने "अये" इस सम्बोधन के साथ कहा उसे वे छिपा नहीं सके। तथा वीणावादकों के पंचमस्वरसम्बन्धी सूर्च्छना के अवसर पर जो राजा नल दमयन्ती के उद्देश्य से मूर्च्छित हुये उसे लोगों ने यह समझा कि वे वीणा की सूर्च्छनाओं के कारण उत्पन्न हुये आनन्दातिशय से ही नेत्रनिमीलन-आदि कर रहे हैं। अतः उसे भी कोई जान न सका।

अथवा—["समाजे एव" के स्थान पर "समाज एव" पाठभेद होने पर—] उक्त सूर्च्छनाओं के आनन्दातिशय के कारण समाज ही मूर्च्छित हो गया। अतएव मिथ्यादृष्ट दमयन्ती के साथ किया गया नल का वार्त्तालाप कोई भी नहीं सुन सका। **अथवा**—उक्त मूर्च्छनाओं के अवसर पर सभा ही

मूर्च्छित हो गयी। अतः मिथ्यादृष्ट दमयन्ती के प्रति किये गये नल के भाषण को सभा का कोई भी व्यक्ति न सुन सका। किन्तु इन दोनों बातों को वे कामदेव से न छिपा सके अर्थात् कामदेव ने तो उनके भाषण और उनकी मूर्च्छना दोनों को भलीभाँति समझ ही लिया क्योंकि वे उनके हृदय-स्थल में पहले से ही विराजमान थे।

उपर्युक्त वर्णन द्वारा यह भी स्पष्ट हो जाता है कि उक्त श्लोक में राजा नल सम्बन्धी लज्जात्याग, उन्माद तथा मूर्च्छारूप कामदशाओं का वर्णन महाकवि द्वारा प्रस्तुत किया गया है।

व्याकरण—बभाषे = भाष् + लिट् । **वैणिकैः** = वीणा + ठक् + इक् (तृतीया बहुवचन का रूप)। **समाजे**—सम् + अज् + घञ् = समाजः (सप्तमी एकवचन में)—समाजे। **मुमूर्च्छ** = मूर्च्छा + लिट्—तिप्—णल् (अ)।

समास—अलीकवीक्षिताम् = अलीक यथा स्यात् तथा वीक्षिता (सुप्सुपा समास), ताम्। **वैणिकैः** = वीणावादनं शिल्पं एषां इति वैणिकाः तैः। **पञ्चममूर्च्छनासु** = पञ्चमस्य पञ्चमस्वरस्य याः मूर्च्छनाः तासु।

टिप्पणियाँ—अयम् = इस (राजा नल) ने। **अलीकवीक्षिताम्** = मिथ्यारूप में देखी गयी हुई। **प्रियाम्** = प्रिया (दमयन्ती) से। **बभाषे** = वार्त्तालाप अथवा संभाषण किया। **वैणिकैः** = वीणा बजाने वालों के द्वारा। **पञ्चममूर्च्छनासु** = पञ्चमस्वर सम्बन्धी मूर्च्छनाओं (आरोह-अवरोह आदि) के। **आलपितासु** = आलापों पर अथवा आलापने पर। पञ्चमस्वर कोकिल का स्वर माना गया है। यह अत्यन्त कोमल तथा उद्दीपक होता है। इसी दृष्टि से यहाँ इसका प्रयोग किया गया है। **समाजे**=समाज अथवा सभा में। **मुमूर्च्छ** = मूर्च्छित हो गया। **अयेन** = "अये न" इस प्रकार से विभाजन कर—"अये" को विषादसूचक अव्यय मानकर—अये, तत् निह्नोतुं न शशाक का अर्थ होगा—दुःख है कि उसे छिपा न सका। "अये क्रोधे विषादे च संभ्रमे स्मरणेऽपि च" इति विश्वः। **अथवा**—अये = "कामाय निह्नोतुं न शशाक" के आधार पर अर्थ होगा—कामदेव से छिपा सकने में समर्थ न हो सका [इः कामः तस्मै अये] "इः कामः परुपोक्तौ च" इति विश्वः। **अथवा अयेन** = भाग्य से "अयः शुभावहो विधिः" इत्यमरः।

प्रसङ्ग—लोगों द्वारा धीरे-धीरे राजा नल के कामजन्य विकार जान लिये गये—

अवाप सापत्रपतां स भूपतिर्जितेन्द्रियाणां धुरि कीर्तितस्थितिः ।
असंवरे शम्बरवैरिविक्रमे क्रमेण तत्र स्फुटतामुपेयुषि ॥ ५३ ॥

म०—अवापेति । जितेन्द्रियाणां धुर्यग्रे कीर्त्तितस्थितिः स्तुतमर्यादः स भूपतिः नलः तत्र समाजे असंवरे संवरितुमशक्ये संवरणं संवरः शमश्चेत्यपि, न विद्यते संवरो यस्य तस्मिन् शम्बरवैरिविक्रमे मनसिजविकारे क्रमेण स्फुटतामुपेयुषि सति सापत्रपतां सलज्जताम् अवाप । धैर्यशालिनां तद्भङ्गस्त्रपाकर इति भावः ॥ ५३ ॥

अन्वय—जितेन्द्रियाणां धुरि कीर्तितस्थितिः स भूपतिः तत्र असंवरे शम्बरवैरिविक्रमे क्रमेण स्फुटतां उपेयुषि (सति) सापत्रपतां अवाप ।

संस्कृत-व्याख्या—जितेन्द्रियाणाम् = इन्द्रियजयिनाम् , धुरि = अग्रे, कीर्तितस्थितिः = स्तुतमर्यादः, स = प्रसिद्धः, भूपतिः = राजा नलः, तत्र=समाजे, असंवरे = संवरणरहिते ओगोप्ये इति यावत्, शम्बरवैरिविक्रमे = कामस्य पराक्रमे–विकारे-इत्यर्थः, क्रमेण = परिपाट्या, स्फुटताम्=प्रकाशताम् , उपेयुषि= प्राप्ते, [सति], सापत्रपताम् = सलज्जताम् , अवाप = प्राप ।

हिन्दी-अनुवाद—जितेन्द्रियाणाम्=जितेन्द्रिय (पुरुषों) में, धुरि=अग्रगण्य, कीर्तितस्थितिः = कीर्तिमान स्थापित करने वाले, सः = वे, भूपतिः = राजा नल, तत्र = वहाँ सभा में, असंवरे = न छिपाये जा सकने वाले, शम्बरवैरिविक्रमे = कामदेव के पराक्रम अर्थात् विकार के, क्रमेण = क्रमशः, स्फुटतां उपेयुषि = प्रकटता को प्राप्त हो जाने पर अर्थात् प्रकट हो जाने पर, सापत्रपताम् = सलज्जता को, अवाप = प्राप्त हुये ।

भावार्थ—जितेन्द्रिय पुरुषों में अग्रणीय कीर्तिमान् स्थापित करने वाले वे राजा नल वहाँ समाज में (जन-समूह के बीच) अगोपनीय कामविकार के क्रमशः प्रकट हो जाने पर लज्जित हो गये । अर्थात् दमयन्ती सम्बन्धी कामजन्य विकार के कारण राजा नल का शरीर पाण्डुता आदि से युक्त हो गया था । अतः ऐसी शारीरिक अवस्था हो जाने पर लोगों द्वारा वास्तविकता का समझ लिया जाना स्वाभाविक ही था ।

अलङ्कार—इस श्लोक में छेकानुप्रास की प्रतीति होती है ।

व्याकरण—**असंवरः** = न संवरः—असंवरः—संवरः=सम् + वृ + अप् । **उपेयुषि** = उप + इ + लिट्—क्वसु—द्वित्वादि होकर—उपेयिवान् (सप्तमी एकवचन में) । **सापत्रपताम्** = सापत्रप + तल् + टाप् (द्वितीया एकवचन में) । **अवाप** = अव + आप् + लिट् तिप—णल (अ) ।

समास—**जितेन्द्रियाणाम्** = जितानि इन्द्रियाणि यैः जितेन्द्रियाः (बहुव्रीहि), तेषाम् । **कीर्तितस्थितिः** = कीर्तिता स्थितिः यस्य स कीर्तित-स्थितिः (बहुव्रीहि) । **असंवरे** = न विद्यते संवरो यस्य स असंवरः (नञ्-बहुव्रीहि), तस्मिन् । **शम्बरवैरिविक्रमे** = शम्बरस्य शम्बरनाम्नः असुरस्य वैरी कामदेवः, तस्य विक्रमः, तस्मिन् । **सापत्रपताम्** = अन्यतो त्रपा इति अपत्रपा तया सह वर्त्तमानः सापत्रपः ("तेन सह–" इत्यादि से बहुव्रीहि) तस्य भावः सापत्रपता, ताम् ।

टिप्पणियाँ—**जितेन्द्रियाणाम्** = जिन्होंने अपनी इन्द्रियों को अपने आधीन कर लिया है ऐसे (लोगों) के । **धुरि** = आगे, अग्रभाग में । **कीर्तितस्थितिः** = जिसकी स्थिति अर्थात् मर्यादा कीर्तिसम्पन्न हो—लब्ध-प्रतिष्ठ । **असंवरे** = जिसका संवरण किया जाना संभव न हो—अथवा—जिसको छिपाया न जा सके । **शम्बरवैरिविक्रमे** = शम्बर नामक असुर के शत्रु अर्थात् कामदेव के पराक्रम अर्थात् काम द्वारा उत्पन्न विकार । कामदेव ने कृष्ण के पुत्र प्रद्युम्न के रूप में अवतार ग्रहणकर शम्बर नामक असुर का वध कर रति से विवाह किया था । **तत्र** = वहाँ (समाज में) । **स्फुटताम्** = स्पष्टता—प्रकटता को । **उपेयुषि** = प्राप्त कर लेने पर । **सापत्रपताम्** = सलज्जता को—लज्जायुक्त होने को । **अवाप** = प्राप्त किया ।

प्रसङ्ग—विवेकसम्पन्न होने पर भी राजा नल दमयन्ती के विरह से उत्पन्न काम-पीड़ा से अत्यधिक चञ्चल मन वाले हो गये—

अलं नलं रोद्धुममी किलाभवन् गुणा विवेकप्रभवा न चापलम् ।
स्मरः स रत्यामनिरुद्धमेव यत्सृजत्ययं सर्गनिसर्ग ईदृशः ॥ ५४ ॥

म०—ननु विवेकिनः कुत इदं चापलम् ? इत्यत आह-अलमिति । युक्ता-युक्तविचारो विवेकः तत्प्रभवा अमी गुणा धैर्यादयः नलमिदं स्त्रीलाभरूपं चापलं निरोद्धुम् 'दुहियाची'त्यादिना रुन्धेर्द्विकर्मकत्वम् । अलं समर्था नाभवन् किल खलु । तथाहि–स्मरः कामः । जनमिति शेषः । जनं रत्यां रागे अनिरुद्धं सृजति अनीश्वरम-वशंकरोति रत्यां रतिदेव्यामनिरुद्धाख्यं कुमारं सृजतीति ध्वनिः । इति यत् अयं सर्गनिसर्गः सृष्टिस्वभाव ईदृशः । 'रतिः स्मरप्रियायां च रागेऽपिसुरतेऽपि च' । अनिरुद्धः कामपुत्रेऽरुद्धे चानीश्वरेऽपि चे'ति विश्वः । अत्र स्मररागदुर्वारतायाः सर्वसृष्टिसाधारण्येन चापलदुर्वारतासमर्थनात् सामान्येन विशेषसमर्थनरूपोऽर्था-न्तरन्यासः ॥ ५४ ॥

अन्वय—अमी विवेकप्रभवाः गुणाः नलं चापलं रोद्धुं अलं न अभवन् किल । अयम् ईदृशः सर्गनिसर्गः यत् स स्मरः रत्यां अनिरुद्धं एव सृजति ।

संस्कृत-व्याख्या—अमी = एते, विवेकप्रभवाः = युक्तायुक्तविचारो विवेकः तत्प्रभवाः, गुणाः = धैर्यादयः, नलम् = नैषधम्, चापलम् = चञ्चलताम्, रोद्धुम् = निवारयितुम्, अलम् = समर्थाः, न अभवन् = न जाताः । अयम् = ईदृशः, सर्गनिसर्गः = सृष्टिस्वभावः, यत्, सः, स्मरः = कामः, जनमितिशेषः—जनम्, रत्याम् = अनुरागे अनिरुद्धम् = अनीश्वरमवशम्, एव, सृजति = करोति । [अथवा—रत्याम् = रतिदेव्याम्, अनिरुद्धम् = अनिरुद्धाख्यम् कुमारम् सृजतीति ध्वनिः ।]

हिन्दी-अनुवाद—अमी = ये, विवेकप्रभवाः = विवेक से उत्पन्न, गुणाः = 'धैर्य' आदि गुण, नलम् = राजा नल को, चापलम् = चपलता से, रोद्धुम् = रोकने में, अलम् = समर्थ, न अभवन् = नहीं हुए, किल । अयम् = यह, ईदृशः = ऐसा, सर्गनिसर्गः = सृष्टि का स्वभाव है, यत् = कि, सः स्मरः = वह कामदेव, रत्याम् = रति (अनुराग) उत्पन्न होने पर, [जनम् = प्राणी को] अनिरुद्धं एव = बेबस (चंचल), एव सृजति = करता ही है । [अथवा रत्याम् = रति देवी में, अनिरुद्धम् = अनिरुद्ध नामक कुमार को, सृजति = उत्पन्न करता है ।]

भावार्थ—ये प्रसिद्ध विवेक आदि गुण नल की चपलता को रोक नहीं सके क्योंकि कामदेव रति (अनुराग) होने पर चपलता की ही उत्पत्ति (सृष्टि) करता है—यही सृष्टि का नियम है । **अथवा** कामदेव रतिकाल में चपलता की ही सृष्टि करता है अर्थात् रतिकाल में सभी चंचल हो जाते हैं—यही सृष्टि का नियम है । **अथवा**—कामदेव रति नामक अपनी प्रिया में अनिरुद्ध नामक अपने पुत्र को ही उत्पन्न करता है, यही सृष्टि का नियम है ।

कहने का तात्पर्य यह है, कि विवेक आदि गुण सम्पन्न होने पर भी राजा नल दमयन्ती के विरह से उत्पन्न काम-पीडा के कारण अत्यधिक चञ्चल हो गये ।

अलङ्कार—इस श्लोक में पूर्वार्ध में वर्णित वाक्यार्थ सामान्य का उत्तरार्ध में वर्णित वाक्यार्थ-विशेष द्वारा समर्थन किये जाने से "अर्थान्तरन्यास" नामक अलङ्कार है ।

व्याकरण—**नलं** तथा **चापलम्** दोनों ही कर्म "रोद्धुम्" के हैं क्योंकि

"रुध्" धातु द्विकर्मक है। "नलम्" में षष्ठी अथवा सप्तमी विभक्ति के अर्थ में द्वितीया विभक्ति हुयी है। **रोद्धुम्** = यहाँ "अलम्" के योग में "पर्याप्तिवचने-ष्वलमर्थेषु" सूत्र से "तुमुन्" प्रत्यय हुआ है।

समास—विवेकप्रभवाः = युक्तायुक्तविचारो विवेकः तत्प्रभवाः इति। सर्गनिसर्गः = सर्गस्य (सृष्टेः) निसर्गः (स्वभावः) इति सर्गनिसर्गः।

टिप्पणियाँ—**अमी** = ये। **विवेकप्रभवाः** = कौन सी बात युक्त अर्थात् ठीक है और कौन सी अयुक्त अर्थात् गलत् है इसका ज्ञान होना ही 'विवेक' कहलाता है। अथवा कौन सी बातें आदि ग्रहण करने योग्य हैं और कौन सी त्यागने योग्य? इसका ज्ञान ही विवेक कहा जाता है। विवेक से हुयी है उत्पत्ति जिनकी ऐसे गुण। पाठभेद में "**विवेकप्रमुखाः**" भी आता है। इसका समास होगा "विवेकः प्रमुखो येषु ते" (बहुव्रीहि)। अर्थ होगा जिनमें विवेक ही प्रमुख है ऐसे गुण—अर्थात् विवेकसम्पन्न गुण। **गुणाः**=गुण-धैर्य, शौर्य आदि। **अलम्** = पर्याप्त, समर्थ। **सर्गनिसर्गः**=सृष्टि का स्वभाव अथवा धर्म। "सर्गः स्वभावनिर्मोक्षो निश्चयाध्यायसृष्टिषु" इत्यमरः। "स्वभावश्च निसर्गश्च" इत्य-मरः। **रत्याम्** = प्रेम अथवा अनुराग। दूसरे पक्ष में—कामदेव की स्त्री। रतिः स्मरप्रियायां च रागेऽपि सुरतेऽपि च" इति विश्वः। **अनिरुद्धम्** = चंचल अथवा वशरहित। दूसरे पक्ष में—कामदेव के पुत्र। "अनिरुद्धः कामपुत्रेऽरुद्धे चानीश्वरेऽपि च" इति विश्वः।

प्रसङ्ग—विवश होकर राजा नल ने उद्यान में विहार करने के बहाने से कुछ काल पर्यन्त निर्जन देश में रहने की इच्छा प्रकट की—

अनङ्गचिह्नं स विना शशाक नो यदासितुं संसदि यत्नवानपि।
क्षणं तदारामविहार कैतवान्निषेवितुं देशमियेष निर्जनम् ॥५५॥

म०—अथास्य मनोरथसिद्ध्यौपयिक दिव्यहंससंवादनिदानभूतं वनविहारं प्रस्तौति—अनङ्गेति। स नैषधौ नलो यत्नवानप्यनङ्गचिह्नं मूर्च्छाप्रलापादिस्मर-विकारं विना संसदि क्षणमप्यासितुं यदा नो शशाक, तदा आरामविहारकैतवादु-पवनविहरणव्याजान्निर्जनं देशं निषेवितुम् इयेष देशान्तरं गन्तुमैच्छदित्यर्थः। एतेन चापलाख्ये सञ्चारिणि भ्रमणलक्षणोऽनुभाव उक्तः॥ ५५॥

अन्वय—यदा स यत्नवान् अपि अनङ्गचिह्नं विना संसदि क्षणं आसितुं न शशाक तदा आरामविहारकैतवात् निर्जनं देशं निषेवितुं इयेष।

संस्कृत-व्याख्या—यदा = यस्मिन् काले,सः = नलः, यत्नवान् अपि =

कृतप्रयत्नः अपि, अनङ्गचिह्नम् = मूर्च्छाप्रलापादिकामविकारम्, विना = ऋते, संसदि = सभायाम्, क्षणम् = किञ्चिद् कालमपि, आसितुम् = स्थातुम्, न शशाक = न समर्थः अभूत्, तदा = तस्मिन् काले, आरामविहारकैतवात् = उद्यानविहरणव्याजात, निर्जनम् = जनरहितम्, देशम् = स्थानम्, निषेवितुम् = सेवितुम्, इयेष=ऐच्छत्। देशान्तरं गन्तुमैच्छदित्यर्थः।

हिन्दी-अनुवाद—यदा = जब, सः = वे नल, यत्नवान अपि = प्रयत्नकरने पर भी, अनङ्गचिह्नम् = मूर्च्छा प्रलाप आदि काम-विकार के, विना = विना; संसदि = सभा में, क्षणम् = क्षणभर के लिये भी, आसितुम् = बैठने के लिये, न शशाक = समर्थ नहीं हुये, तदा = तब, [उन्होंने], आरामविहारकैतवात्= उद्यान-भ्रमण के बहाने से, निर्जनम् = जनरहित, देशम्=देश को, निषेवितुम्= सेवन करने की,इयेष = इच्छा की।

भावार्थ—प्रयत्न करने पर भी वे नल जब जनसमूह के समक्ष दमयन्ती-विरहजन्य मूर्च्छा, प्रलाप आदि कामदेव द्वारा उत्पन्न किये गये हुये विकारों को छिपा सकने में समर्थ न हो सके तब उन्होंने बाग-बगीचे आदि स्थानों में भ्रमण करने के बहाने से कुछ समय के लिये निर्जन स्थान की इच्छा प्रकट की।

राजा नल यह निरन्तर प्रयत्न करते रहे कि उनके शरीर में दमयन्ती के विरह के कारण काम द्वारा पाण्डुता, कृशता, दीर्घनिश्वास, मूर्च्छा, प्रलाप इत्यादि उत्पन्न किये गये हुये विकार किसी प्रकार शान्त हो जायँ किन्तु जब वे अपने एतत्सम्बन्धी प्रयत्नों में किसी भी प्रकार सफल न हो सके तब उन्होंने सोचा कि लोगों के बीच में इस दशा में रहना मेरे लिये उचित नहीं है और उन्होंने यही निर्णय किया कि मुझे इस स्थान को छोड़कर किसी अन्य एकान्त स्थान पर चला जाना चाहिये। तब उन्होंने लोगों से यही कहा कि मैं उद्यान-भ्रमण आदि करने का इच्छुक हूँ और इस बहाने से उन्होंने एतत्सम्बन्धी प्रबन्ध करने का आदेश दे दिया।

इस पद्य में चंचलता नामक संचारीभाव के उदित हो जाने पर "भ्रमण" नामक अनुभाव का कथन किया गया है।

अलङ्कार—इस श्लोक में "अपह्नुति" अलङ्कार की प्रतीति होती है।

व्याकरण—यत्नवान् = यत्न + मतुप्। अनङ्गचिह्नम् = में "पृथक्-विनानानाभिस्तृतीयान्यतरस्याम्" सूत्र में वर्णित नियम के आधार पर द्वितीया

विभक्ति हुयी है। **संसदि** = सम् + सत् + क्विप्—संसद् (सप्तमी एकवचन में—संसदि)। **क्षणम्** = में "कालाध्वनोरत्यन्तसंयोगे" सूत्र से द्वितीया विभक्ति हुयी है। "कालविशेषोत्सवयोः क्षणः" इत्यमरः। **निषेवितुम्** = नि + सेव् = तुमुन् "परिनिविभ्यः सेवसित" से 'स' के स्थान पर 'ष' हो जाता है।

समास—अनङ्गचिह्नम् = अनङ्गस्य चिह्नम् इति। **आरामविहार-कैतवात्** = आरामे विहारः इति आरामविहारः (सप्तमी तत्पुरुष) तस्य कैतवम् (षष्ठी तत्पुष) तस्मात्।

टिप्पणियाँ—यत्नवान् = यत्न करने पर भी—प्रयत्नशील होने पर भी। **अनङ्गचिह्नम्** = मूर्च्छा, प्रलाप, पाण्डुता, लम्बी-लम्बी साँसो (आहों) का लेना आदि कामदेव द्वारा उत्पन्न किये गये हुये विकार रूपी चिह्नों की, **संसदि**=सभा में-जनसमूह के समक्ष। "समज्या परिषद्गोष्ठी सभासमितिसंसदः" इत्यमरः। **आसितुम्** = बैठने अथवा स्थित रहने के लिये। **न शशाक** = समर्थ नहीं हुए। **आरामविहारकैतवात्** = उपवन (बाग, बगीचा) में विहार करने के बहाने से। "आरामः स्यादुपवनम्" इत्यमरः। **निषेवितुम्** = सेवन करने के लिये। **इयेष** = इच्छा की, अभिलाषा (प्रकट) की।

प्रसङ्ग—उद्यान-विहार के इच्छुक राजा नल ने अपने अभिन्न मित्रों के साथ उद्यान जाने हेतु सवारी (घोड़ा आदि) तैयार करने के लिये नौकरों को आदेश दिया—

अथ श्रिया भर्त्सितमत्स्यकेतनस्समं वयस्यैस्स्वरहस्यवेदिभिः।
पुरोपकण्ठोपवनं किलेक्षिता दिदेश यानाय निदेशकारिणः ॥५६॥

म०—अथेति। अथानन्तरं श्रिया सौन्दर्येण भर्त्सितमत्स्यकेतनस्तिरस्कृतस्मरः स नलः स्वरहस्यवेदिभिः निजभैमीरागमर्मज्ञैर्वयसा तुल्या वयस्याः स्निग्धाः 'स्निग्धो वयस्यः सवया' इत्यमरः। तैः सह समं पुरोपकण्ठोपवनं पुरसमीपाराममीक्षिता द्रष्टा, तृन्नन्तमेवैतत् अतएव 'न लोके' त्यादिना षष्ठीप्रतिषेधः। किलेत्यलीके। निदेशकारिण आज्ञाकरान् यानाय यानमानेतुमित्यर्थः। 'क्रियार्थोपे' त्यादिना चतुर्थी। दिदेश आज्ञापयामास ॥ ५६ ॥

अन्वय—अथ श्रिया भर्त्सितमत्स्यकेतनः स्वरहस्यवेदिभिः वयस्यैः समं पुरोपकण्ठोपवनं ईक्षिता किल निदेशकारिणः यानाय दिदेश।

संस्कृत-व्याख्या—अथ = अनन्तरम्, श्रिया = सौन्दर्येण, भर्त्सितमत्स्य-

केतनः = भर्त्सितः तिरस्कृतः मत्स्यकेतनः कामः येन तादृशः [नलः], स्वरहस्यवेदिभिः = निजभैमीरागमर्मज्ञैः, वयस्यैः = स्निग्धैः, समम्, पुरोपकण्ठोपवनम् = नगरसमीपस्थमुद्यानम्, ईक्षिता = द्रष्टा, किल = अलीकम्, निदेशकारिणः=आज्ञाकरान् भृत्यान्, यानाय = यानमानेतुमित्यर्थः, दिदेश=आज्ञापयामास ।

हिन्दी-अनुवाद—अथ = इसके पश्चात्, श्रिया = [अपने] सौन्दर्य से, भर्त्सितमत्स्यकेतनः = कामदेव को तिरस्कृत करने वाले, [राजा नल ने] स्वरहस्यवेदिभिः = अपने रहस्य को जानने वाले, वयस्यैः = [अपने] मित्रों के, समम = साथ, पुरोपकण्ठोपवनम् = नगर के पास में स्थित उद्यान को, ईक्षिता किल = देखने की इच्छा से, निदेशकारिणः = अपने आज्ञाकारी सेवकों को, यानाय = सवारी लाने के लिए, दिदेश = आज्ञा दी ।

भावार्थ—उद्यान-विहार सम्बन्धी अपनी इच्छा प्रकट करने के पश्चात् काम-पीड़ित होने पर भी अपने शरीर की शोभा से कामदेव को तिरस्कृत [नीचा दिखाने वाले] करने वाले राजा नल ने, अपने रहस्य (ये राजा नल-वस्तुतः विहार करने की दृष्टि से उद्यान को नहीं जा रहें हैं अपितु अपने अन्दर उत्पन्न हुये काम विकारों को छिपाने की दृष्टि से ही उद्यान की ओर जा रहें हैं-इत्यादि गुप्त वार्तो को) जानने वाले मित्रों के साथ नगर के पास में ही स्थित उद्यान को देखने की इच्छा से सवारी लाने के लिये अपने आज्ञाकारी नौकरों को आदेश दिया ।

अलङ्कारः—इस श्लोक में "सहोक्ति" अलङ्कार है ।

व्याकरण—**वेदिभिः** = विद् + णिनि— [तृतीयाबहुवचन]। **वयस्यैः**= वयस् + यत्—(तृतीया बहुवचन)। **ईक्षिता**—ईक्ष् + तृन् । तृन्नन्त "ईक्षिता" के योग में "उपवनं" में "न लोकाव्ययनिष्ठाखलर्थतृनाम्" सूत्र से षष्ठी विभक्ति का निषेध हो जाने पर द्वितीया हुयी । **यानाय** = यहाँ "यानमानेतुम्" ऐसी विवक्षा होने के कारण "क्रियार्थोपपदस्य च कर्मणि स्थानिनः" सूत्र के द्वारा चतुर्थी विभक्ति हुयी है ।

समास—**भर्त्सितमत्स्यकेतनः** = भर्त्सितः मत्स्यकेतनः येन सः । **स्वरहस्यवेदिभिः** = स्वस्य रहस्यम् (षष्ठी तत्पु०), तत् विदन्तीति स्वरहस्यवेदिनः तैः । वयस्यैः वयसा तुल्याः वयस्याः तैः । **पुरोपकण्ठोपवनम्** = कण्ठस्य समीपं उपकण्ठम् (अव्ययीभाव) पुरं उपकण्ठं यस्य तत् पुरोपकण्ठम् (बहुव्रीहि) ।

टिप्पणियाँ—अथ=अनन्तर—उद्यान में विहार करने सम्बन्धी इच्छा को प्रकट करने के उपरान्त। **श्रिया** = [शरीर की] शोभा से अथवा सौन्दर्य से। **भर्त्सितमत्स्यकेतनः** = कामदेव को तिरस्कृत करने वाले अथवा कामदेव को नीचा दिखलाने वाले। पाठभेद में—"भर्त्सितमत्स्यलाञ्छनः" ऐसा भी प्रयोग मिलता है किन्तु अर्थ समान ही है। कामदेव के रथ की ध्वजा में मछली का चिह्न विद्यमान है। अतः इसी से उनको "मत्स्यलाञ्छनः" अथवा "मत्स्यकेतनः" नाम से कहा गया है। **स्वरहस्य-वेदिभिः** = अपने [राजा नल के] रहस्य को जानने वाले। **वयस्यैः** = मित्रों के साथ। **समम्** = साथ। **पुरोपकण्ठोपवनम्** = नगर के समीप में स्थित उद्यान को। **ईक्षिता** = देखने वाला, द्रष्टा। **किल** = इस स्थल पर प्रयुक्त यह अव्यय-मिथ्यासूचक है। क्योंकि राजा नल का अभिप्राय काम-विकार को छिपाना ही है, उद्यान-भ्रमण नहीं। **निदेशकारिणः** = आज्ञापालक, नौकरों अथवा भृत्यों। **यानाय** = सवारी लाने के लिये। **दिदेश** = आज्ञा दी, आदेश दिया।

प्रसङ्ग—तत्पश्चात् नौकर राजा नल के लिये सुसज्जित घोड़े को ले आये—

अमी ततस्तस्य विभूषितं सितं जवेऽपि मानेऽपि च पौरुषाधिकम्।
उपाहरन्नश्वमजस्रचञ्चलैः खुराञ्चलैः क्षोदितमन्दुरोदरम् ॥५७॥

म०—अमी इति। तत आज्ञापनानन्तरं अमी निदेशकारिणःतस्य विभूषितमलङ्कृतञ्जवेऽपि वेगेऽपि माने प्रमाणेऽपि च पौरुषात् पुरुषगतिवेगात् पुरुषप्रमाणात् चाधिकं 'ऊर्ध्वविस्तृतदोःपाणिनृमाने पौरुषं त्रिषु' इत्यमरः। 'पुरुषहस्तिभ्यामण् च' त्यण्प्रत्ययः। अजस्रचञ्चलैश्चटुलस्वभावैः खुराञ्चलैःशफाग्रैः क्षोदितं मन्दुरोदरं चूर्णीकृताश्वशालाभ्यन्तरं 'वाजिशाला तु मन्दुरे'त्यमरः। एतेनोत्तमाश्वलक्षणयुक्तं सितं श्वेतमश्वमुपाहरन्नानिन्युरित्यर्थः ॥ ५७ ॥

अन्वय—ततः अमी तस्य विभूषितं सितं जवे अपि माने अपि पौरुषाधिकं अजस्रचञ्चलैः खुराञ्चलैः क्षोदितमन्दुरोदरं अश्वं उपाहरन्।

संस्कृत-व्याख्या—ततः=तदाज्ञानन्तरम्, अमी=निदेशकारिणः भृत्याः, तस्य = नलस्य, विभूषितम् = अलंकृतम्, सितम् = श्वेतम्, जवे अपि = वेगे अपि, माने अपि च = परीक्षणे अपि च, पौरुषाधिकम्=पौरुषात् पुरुषगतिवेगात् पुरुषप्रमाणाच्चाधिकम्, अजस्रचञ्चलैः = चटुलस्वभावैः, खुराञ्चलैः = शफाग्रैः, क्षोदितमन्दुरोदरम् = क्षोदितं चूर्णीकृतं मन्दुरायाः वाजिशालायाः उदरं मध्यभागं येन तादृशम्, अश्वम् = घोटकम्, उपाहरन् = आनिन्युः।

हिन्दी-अनुवाद—ततः = तदनन्तर, अमी = वे नौकर, तस्य=उसके (लिये), विभूषितम् = भलीभाँति सजाये गये हुये, सितम् = श्वेतवर्ण के, जवे अपि = वेग में भी, माने अपि च = और परिमाण में भी, पौरुषाधिकम् = पुरुष की अपेक्षा अधिक परिमाणवाले, अजस्रचञ्चलैः = निरन्तर चंचल, खुराञ्चलैः = खुरों के अग्रभागों से, क्षोदितमन्दुरोदरम् = घुड़साल का फर्श खोदने वाले, अश्वम् = घोड़े को, उपाहरत् = ले आये।

भावार्थ—तदनन्तर वे नौकर अलङ्कारों से विभूषित, श्वेतवर्ण वाले, वेग तथा ऊँचाई में पुरुष से भी अधिक और निरन्तर चंचल अपनी टापों द्वारा घुड़साल के मध्यभाग को अर्थात् फर्श को खोद डालने वाले घोड़े को [राजा नल के लिये] ले आये।

कहने का तात्पर्य यह है कि वे नौकर उत्तम लक्षणों से संपन्न घोड़े को राजा नल के गमन करने के लिये वहाँ ले आये। उत्तम घोड़े के लक्षण—"खुरैः खनन्यः पृथ्वीमश्वो लोकोत्तरः स्मृतः" इति शालिहोत्रः॥

व्याकरण—**विभूषितम्** = वि + भूष् + णिच् + क्त। **पौरुषम्** = पुरुष + अण् "पुरुषहस्तिभ्यामण च" सूत्र से। **उपाहरन्** = उप + आ + हृ + लङ्—झि।

समास—**अजस्रचञ्चलैः** = अजस्र यथा स्यात्तथा चञ्चलानि, तैः। क्षोदितमन्दुरोदरम् = मन्दुरायाः उदरम् इति मन्दुरोदरम् (षष्ठी तत्पु०) क्षोदितं मन्दुरोदरं येन स क्षोदितमन्दुरोदरः (बहुव्रीहि), तम्।

टिप्पणियाँ—**ततः** = तदनन्तर—राजा नल की आज्ञा प्राप्ति के पश्चात्। **विभूषितम्** = विशेष रूप से अलंकृत अथवा सजाये गये। **सितम्** = श्वेतवर्ण के। **जवे** = वेग में। "रंहस्तरसी तु रयः स्यदः। जवः" इत्यमरः। **माने** = परिमाण में—नाप में—ऊँचाई में। **पौरुषाधिकम्** = ऊपर को उठाये हुये हाथ और भुजासहित एक पुरुष के नाप को "पौरुष" कहा जाता है—"उर्ध्वविस्तृतदोष्पाणिनृमाने पौरुषं त्रिषु" इत्यमरः। पुरुष के नाप से भी अधिक ऊँचाई वाले। **अजस्रचञ्चलैः** = निरन्तर चंचल—"नित्यानवरताजस्रम्"—इत्यमरः। **खुराञ्चलैः** = खुरों के अग्रभागों से—टापों से। **क्षोदितमन्दुरोदरम्** = खोद दिया है अस्तबल (घुड़साल) के फर्श को जिसने—"वाजिशाला तु मन्दुरा" इत्यमरः। **उपाहरत्** = ले आये।

प्रसङ्ग—अब आगे के सात श्लोकों में घोड़े का वर्णन करते हैं। इनमें वर्णित विशेषणों से युक्त उस घोड़े पर राजा नल सवार हुये—

अथान्तरेणावटुगामिनाऽध्वना निशीथिनीनाथमहस्सहोदरैः ।
निगालगाद्देवमणेरिवोत्थितैर्विराजितं केसरकेशरश्मिभिः ॥ ५८ ॥

म०—अथ सप्तभिः कुलकमाह—अथेत्यादि । अथानयनान्तरं स नलो हयमारुरोहेत्युत्तरेणान्वयः । कथंभूतमान्तरेणाभ्यन्तरेण अवटुगामिना कृकाटिकाख्यमस्तकपृष्ठभाजा 'अवटुर्घाटा कृकाटिके'त्यमरः, अध्वना मार्गेण निगालगाद्गलोद्देशात् 'निगालस्तु गलोद्देश' इत्यमरः । देवमणिः आवर्त्तविशेषः, 'निगालजो देवमणिरि'-ति लक्षणात् । दिव्यमाणिक्यं च गम्यते, तस्मादुत्थितैरिव स्थितैरित्युत्प्रेक्षा । निशीथिनीनाथमहःसहोदरैश्चन्द्रांशुसदृशैरित्युपमा । केसरकेशा एव रश्मय इति रूपकं तैर्विराजितम् ॥ ५८ ॥

अन्वय—अथ आन्तरेण अवटुगामिना अध्वना निगालगाद् देवमणेः उत्थितैः इव निशीथिनीनाथमहस्सहोदरैः केसरकेशरश्मिभिः विराजितम् (हयं आरुरोह) ।

संस्कृत-व्याख्या—अथ = आनयनान्तरम् [सः = नलः हयमारुरोह—इत्युत्तरेणान्वयः] कथंभूतमश्वम् ? तदाह—आन्तरेण = आभ्यन्तरेण, अवटुगामिना = कृकाटिकामस्तकपृष्ठभाजा, अध्वना = मार्गेण, निगालगाद् = गलोद्देशजात्, देवमणेः = आवर्त्तविशेषः—तस्मात्, उत्थितैः इव = निःसृतैः इव निशीथिनीनाथमहस्सहोदरैः = निशीथिनी रात्रिः तस्याः नाथः चन्द्रः, तस्य महांसि किरणाः, तेषां सहोदरैः सदृशैः—चन्द्रांशुसदृशैः, केसरकेशरश्मिभिः = स्कन्धप्ररूढाः केसरकेशाः तेषां रश्मिभिः **अथवा** केसरकेश एव रश्मयः तैः, विराजितम् = शोभितम् [अश्वम्] ।

हिन्दी-अनुवाद—अथ = घोड़े के आ जाने के अनन्तर (राजा नल), आन्तरेण = अन्दर की ओर से, अवटुगामिना = कृकाटिका की ओर जाने वाले, अध्वना = मार्ग से, निगालगाद् = गलप्रदेश में विद्यमान, देवमणेः = 'देवमणि' नामक भौंरी से, उत्थितैः इव = मानों उठे हुए अथवा मानों निकले हुये, निशीथिनीनाथमहस्सहोदरैः = चन्द्रमा की किरणों के सदृश, केसरकेशरश्मिभिः = गर्दन के केश अथवा अयालों की किरणों से, विराजितम् = सुशोभित (अश्व पर सवार हुये) ।

भावार्थ—इसके पश्चात् गल प्रदेश में स्थित देवमणि नामक शुभलक्षणसूचक चिह्नविशेष से कण्ठ के मध्य में स्थित गर्दन के ऊपरी प्रदेश की ओर जाते हुये मार्ग से निकले हुये तथा चन्द्रमा की किरणों के समान उज्ज्वल

वर्णवाले केसर (अयाल) के बालों की किरणों से सुशोभित [घोड़े पर राजा नल सवार हुये—ऐसा आगामी श्लोक सं० ११६४ से सम्बन्ध करना चाहिये।]।

देवमणि कौस्तुभमणि को भी कहते हैं ["देवमणिः शिवेऽश्वस्य कण्ठावर्त्ते च कौस्तुभे" इति विश्वः।] देवमणि और चन्द्रमा दोनों की उत्पत्ति समुद्र से हुयी है। अतः देवमणि की ओर से उत्पन्न केसर (अयाल) के बालों का चन्द्रसहोदर होना उचित ही है।

अलङ्कार—"देवमणेः उत्थितैः इव" में उत्प्रेक्षा, "निशीथिनीनाथमहस्सहोदरैः" में उपमा तथा "केसरकेशरश्मिभिः" में रूपक अलङ्कार हैं। अतः यहाँ अलङ्कारों का संकर ही कहा जा सकता है।

व्याकरण—अवटुगामिना = अवटु + गम् + णिनि (कर्ता में)—अवटुगामी [तृतीया-एकवचन में]।

समास—अवटुगामिना = अवटुं गच्छतीति अवटुगामी तेन। **निशीथिनीनाथमहस्सहोदरैः** + निशीथिन्याः नाथः इति निशीथिनीनाथः तस्य महांसि, तेषां सहोदरैः। [इस स्थल पर लक्षणा द्वारा "सहोदर" पद का "तुल्य" अर्थ लिया गया है—समाने उदरे शयितः—सहोदरः—यहाँ "वोपसर्जनस्य" सूत्र से विकल्प करके 'समान' के स्थान पर 'स' आदेश हो जाता है]। **केसरकेशरश्मिभिः** = केसरकेशानां रश्मिभिः इति।

टिप्पणियाँ—आन्तरेण = अभ्यन्तर की ओर से अथवा मध्य से। **अवटुगामिनी** = 'अवटु' गर्दन के जोड़ अथवा गर्दन के ऊपर के हिस्से को कहते हैं ["अवटुर्घाटा कृकाटिका" इत्यमरः]। राजा नल के घोड़े की गर्दन के अधोभाग में "देवमणि" नामक भौंरी थी और गर्दन के ऊपरी भाग में श्वेतवर्ण के, अयाल थे। यहाँ महाकवि द्वारा यह उत्प्रेक्षा की गयी है कि वह मानो "देवमणि" से निकलने वाली किरणें ही थीं जो गर्दन के ऊपरी भाग पर पहुँचने वाले आन्तरिक मार्ग से होकर आयालों के रूप में गर्दन के ऊपर फैली हुयी थीं। **अध्वना** = मार्ग से। **निगालगात्** = गले में स्थित अथवा विद्यमान। गले के एक भाग को ही "निगाल" कहा जाता है—"निगालस्तुगलोद्देशः" इत्यमरः। **देवमणेः** = घोड़ों के गले पर उत्पन्न होने वाली एक प्रकार के केशों की भँवरी (भौंरी)। घोड़ों में इसका होना शुभलक्षणपरक माना जाता है—"देवमणिः शिवेऽश्वस्य कण्ठावर्त्ते" इति विश्वः।

निशीथिनीनाथमहस्सहोदरैः = चन्द्रमा की किरणों के समान। **केसर-केशरश्मिभिः** = गले के बालों अर्थात् अयालों से निकलने वाली किरणों से। संस्कृत भाषा में घोड़े की गर्दन पर निकलने वाले बालों को "केसर" तथा 'पारसी' में "अयाल" नाम से कहा जाता है। **विराजितम्** = सुशोभित। इस पद का एक अन्य अर्थ भी किया जा सकता है—वीनां पक्षिणां राजा विराजः—गरुडः, तद्वत् आचरितम् इति [विराज + णिच् + क्त]—इस व्युत्पत्ति के आधार पर अर्थ होगा—गरुड़ के सदृश आचरण करने वाले अर्थात् अत्यन्त तीव्रवेगगामी (घोड़े पर नल सवार हुये)।

अजस्रभूमीतटकुट्टनोद्गतैरुपास्यमानं चरणेषु रेणुभिः।
रयप्रकर्षाध्ययनार्थमागतैर्जनस्य चेतोभिरिवाणिमाङ्कितैः॥ ५९॥

म०—अजस्रेति। अजस्रेण भूमीतटकुट्टनेन उद्गतैरुत्थितै रेणुभिः रयप्रकर्षस्य वेगातिशयस्याध्ययनार्थमभ्यासायागतैरणिमाङ्कितैरणुत्वपरिमाणविशिष्टैर्जनस्य लोकस्य चेतोभिरिवेत्युत्प्रेक्षा। चरणेषु पादेषु उपास्यमानं सेव्यमानम्। 'अणुपरिमाणं मन' इति तार्किकाः॥ ५९॥

अन्वय—अजस्रभूमीतटकुट्टनोद्गतैः रेणुभिः रयप्रकर्षाध्ययनार्थम् आगतैः अणिमाङ्कितैः जनस्य चेतोभिः इव चरणेषु उपास्यमानम् (हयमारुरोह)।

संस्कृत-व्याख्या—अजस्रभूमीतटकुट्टनोद्गतैः = अजस्रं निरन्तरं भूमीतटकुट्टनं पृथ्वीतलचूर्णनं तेन उद्गतैः; उत्थितैः, रेणुभिः = धूलिभिः, रयप्रकर्षाध्ययनार्थम् = रयप्रकर्षस्य वेगातिशयस्य अध्ययनार्थं अभ्यासाय, आगतैः=आयातैः, अणिमाङ्कितैः = अणुत्वपरिमाणविशिष्टैः, जनस्य = लोकस्य, चेतोभिः = चित्तैः, इव, चरणेषु = पादेषु, उपास्यमानम् = सेव्यमानम् (हयमारुरोह)।

हिन्दी-अनुवाद—अजस्रभूमीतटकुट्टनोद्गतैः = निरन्तर पृथ्वीतट के ताड़न से उठी हुयी, रजोभिः = धूलियों से, रयप्रकर्षाध्ययनार्थम् = [मानों] वेग के आधिक्य को सीखने के निमित्त, आगतैः = आये हुये, अणिमाङ्कितैः = अणु-परिमाण से युक्त, जनस्य = लोगों के, चेतोभिः इव = [साक्षात् रूप से] अन्तःकारण ही हों [इस रूप में], चरणेषु उपास्यमानम् = सेवित चरणों वाले (घोड़े पर राजा नल सवार हुये)।

भावार्थ—तीव्र वेग को सीखने के निमित्त आये हुये, अणुपरिमाणवाले लोगों के मनों के सदृश, लगातार पृथ्वीतल (फर्श) पर ताड़न किये जाने से उठी हुयी धूलियों के द्वारा उस घोड़े के चरण सेवित किये जा रहे थे। (ऐसे घोड़े पर राजा नल सवार हुये)।

अर्थात् उस घोड़े का वेग मनुष्यों के मन से भी अधिक तीव्र था। अतः लोगों के मन तीव्र-वेग की शिक्षा प्राप्त करने के निमित्त उस घोड़े के समीप आये हुये थे। इस भाँति लोगों के मन शिष्य के रूप में थे और घोड़ा गुरु रूप में। अतएव मन रूपी शिष्य गुरु रूप में विद्यमान घोड़े के चरणों का स्पर्श धूल के रूप में कर रहे थे, ऐसा प्रतीत होता था क्योंकि लोगों के मन का परिमाण भी अणुपरिमित है (मन को अत्यन्त सूक्ष्म माना गया है)। अतः लोगों के मन (लगातार भूमि पर पैरों को पटकने से उड़ी हुयी सूक्ष्म रूप में विद्यमान) धूलि के रूप में विद्यमान थे।

अलङ्कार—"चेतोभिः इव" इत्यादि में "उत्प्रेक्षा" अलङ्कार है।

व्याकरण—भूमी = भूमि + ङीप्—("कृतिकारादक्तिनः" से)=भूमी। **अणिमा** = अणु + इमनिच्। **उपास्यमानम्** = उप् + आस् + शानच् (कर्मवाच्य में)।

समास—अजस्रभूमीतटकुट्टनोद्गतैः = भूम्याः तटम् इति भूमीतटम्, तस्य कुट्टनम् (षष्ठी तत्पु०) इति भूमीतटकुट्टनम्, अजस्रं भूमीतटकुट्टनम् (सुप्सुपा समास), तेन उद्गताः (तृतीया तत्पुरुष), तैः। **रयप्रकर्षाध्ययनार्थम्** = रयप्रकर्षस्य अध्ययनार्थम्—(षष्ठी तत्पु०)।

टिप्पणियाँ—अजस्रभूमीतटकुट्टनोद्गतैः = निन्तर (लगातार) पृथ्वीतल को कूटने से (फर्श पर अपने चरणों को वार-वार पटकने से) उड़ी हुयी। पृथ्वीतल पर इस प्रकार से पैरों को मारना अथवा अपनी टापों से निन्तर पृथ्वीतल (फर्श) को खोदना उत्तम जाति के घोड़ों के अनेक लक्षणों में एक है। **रेणुभिः** = धूलियों से। **रयप्रकर्षाध्ययनार्थम्** = वेग की प्रकर्षता (अतिशयिता अथवा आधिक्य) का अध्ययन (सीखने) करने के लिये। **आगतैः** = आये हुये। **अणिमाङ्कितैः** = अणु सदृश परिमाण से अङ्कित अथवा युक्त। ("अणुपरिमाणं मनः" इति तार्किकाः) अणु का परिमाण अत्यन्त सूक्ष्म होता है तथा अदृश्य भी। **जनस्य**=लोक के—जन समूह के अथवा लोगों के। **उपास्यमानम्** = सेवन किये जाते हुये। लोगों के मन राजा नल के घोड़े से वेगातिशय को सीखने के लिये आये हुये हैं। अतएव धूलि के रूप में विद्यमान उनके मन अपने गुरु घोड़े के चरणों का स्पर्श कर रहे हैं।

चलाचलप्रोथतया महीभृते स्ववेगदर्पानिव वक्तुमुत्सुकम्।
अलं गिरा वेद किलायमाशयं स्वयं हयस्येति च मौनमास्थितम्॥६०॥

म०—चलाचलेति । पुनः, चलाचलप्रोथतया स्वभावतः स्फुरमाणघोणतया 'चरिचलिपदीनामुपसंख्याना' च्चलेर्द्विर्वचनं दीर्घश्च । 'घोणा तु प्रोथमस्त्रियामि' त्यमरः । महीभृते नलाय स्ववेगदर्पान् वेगातिरेकान् वक्तुमुत्सुकमुद्युक्तमिवेत्युत्प्रेक्षा । अथावचने हेतुमुत्प्रेक्षते–अलमिति । गिरा उक्त्या अलं,कुतः, अयं नलः स्वयं हयस्याश्वस्य आशयमभिप्रायं वेद वेत्ति । 'विदो लटो वे'ति णलादेशः । इति हेतोरिवेत्यनुषङ्गः मौनं तूष्णीम्भावश्चास्थितं प्राप्तम् । अश्वहृदयवेदी नल इति प्रसिद्धिः ॥ ६० ॥

अन्वय—चलाचलप्रोथतया महीभृते स्ववेगदर्पान् वक्तुं उत्सुकं इव, 'गिरा अलं अयं स्वयं हयस्य आशयं वेद किल' इति मौनं च आस्थितम् (हयमारुरोह) ।

संस्कृत-व्याख्या—चलाचलप्रोथतया = स्फुरमाणघोणतया, महीभृते = राज्ञे नलाय, स्ववेगदर्पान् = वेगातिरेकान्, वक्तुम् = कथयितुम् , उत्सुकमिव = उद्युक्तमिव, गिरा = वाचा, अलम् = व्यर्थम् , अयम् = नलः, स्वयम्=साक्षात् , हयस्य = अश्वस्य, आशयम् = अभिप्रायम् , वेद = जानाति, किल, इति-हेतोः, मौनम् = तूष्णीम्भावम् , च, आस्थितम् = प्राप्तम् (अश्वमारुरोह) ।

हिन्दी-अनुवाद—चलाचलप्रोथतया = अत्यधिक चलायमान नथुनों के होने से, महीभृते = राजा नल से, स्ववेगदर्पान् = अपने वेग के सम्बन्ध में अभिमानयुक्त बातों को, वक्तुम् = कहने के लिये, उत्सुकं इव = मानों उत्सुक [किन्तु] गिरा = वाणी द्वारा, अलम् = मत कहो, अयम् = यह नल, स्वयम्= अपने आप ही, हयस्य = घोड़े के, आशयम् = अभिप्राय को, वेद किल=जानते ही हैं, इति = इस कारण, मौनम् = मौनभाव को, आस्थितम् = धारण किये हुये (घोड़े पर राजा नल सवार हुये ।

भावार्थ—नथुनों अथवा ओष्ठ के अग्रभाग की अत्यधिक चञ्चलता के द्वारा अपने वेग सम्बन्धी दर्प को मानों राजा नल से कहने के लिये उत्कण्ठित किन्तु "मत कहो, ये नल स्वयं ही घोड़े के वास्तविक अभिप्राय को जानने वाले हैं" इस कारण पूर्णरूपेण मौन को धारण किये हुये—(घोड़े पर राजा नल सवार हुये ।

राजा नल के सम्बन्ध में ऐसी प्रसिद्धि है कि वे अश्व-सम्बन्धी-विद्या के भी पूर्ण पारखी थे । अतः वे अपने लिये लाये गये घोड़े के हृदय में विद्यमान भावों को भली भाँति समझ रहे थे । इसी कारण बाद में घोड़े ने मौन धारण कर लिया ।

अलङ्कार—उक्त श्लोक में अश्व-सम्बन्धी स्वाभाविक वर्णन के विद्यमान होने से "स्वभावोक्ति" अलङ्कार की प्रतीति होती है। "स्ववेगदर्पान् वक्तुं उत्सुकमिव" में "उत्प्रेक्षा" अलङ्कार भी है।

व्याकरण—**चलाचलः** = चल् + अच्—पश्चात् "चरिचलिपतिवदीनां वाद्विर्वचनमाक्चाभ्यासस्य" से द्वित्व और आक् आगम होकर "चलाचलः" बना है। **वेद** = विद् + लट्—"विदो लटो वा" सूत्र से णल् (अ)-आदेश। **मौनम्** = मुनेर्भावः मौनम्—मुनि + अण्।

समास—**चलाचलप्रोथतया** = चलाचलः अतिचञ्चलः प्रोथः ओष्ठाग्रं नासापुटं वा यस्य तस्य भावः—चलाचलप्रोथता, तया। **स्ववेगदर्पान्** = स्वस्य वेगदर्पान् इति।

टिप्पणियाँ—**चलाचलप्रोथतया** = नथुनों के अत्यधिक चञ्चलता युक्त होने से। प्रोथ-नथुना "घोणा तु प्रोथमस्त्रियाम्" इत्यमरः। **महीभृते** = राजा नल से। यहाँ "क्रियया यमभिप्रेति सोऽपि सम्प्रदानम्" से सम्प्रदान संज्ञा होकर चतुर्थी विभक्ति हुयी है। **स्ववेगदर्पान्** = अपने अतिशय वेग सम्बन्धी दर्पों को। **वक्तुम् उत्सुकमिव**=कहने के लिये मानों उत्कण्ठित। **वेद**=[वेत्ति, जानाति] जानते हैं। **इति**=इस कारण। **मौनम्** = मौन भाव को, चुप्पी को। **आस्थितम्** = प्राप्त अथवा धारण किये हुये। कहने का तात्पर्य यह है कि अश्व अपने तीव्रगमन सम्बन्धी वेग के दर्प को राजा से कहने का इच्छुक है। इसी कारण बार बार अपने नथुनों को अत्यधिक चञ्चलता युक्त कर रहा है। किन्तु बाद में वह यह सोचकर कि राजा नल स्वयं ही अश्वविद्या में भी पारंगत हैं अतः वे मेरे हृदय की बात को स्वयं ही समझ रहे होंगे, चुप हो जाता है।

महारथस्याध्वनि चक्रवर्तिनः परानपेक्षोद्वहनाद्यशस्सितम्।
रदावदातांशुमिषादनीदृशां हसन्तमन्तर्बलमर्वतां रवेः॥ ६१॥

म०—महारथस्येति। महान् रथो यस्य तस्य महारथस्य। 'आत्मानं सारथिञ्चाश्वं रक्षन् युद्ध्यते यो नरः। स महारथसंज्ञः स्यादित्याहुर्नीतिकोविदाः॥' इत्युक्तलक्षणस्य रथिकविशेषस्येत्यर्थः। अन्यत्र महारथो नलः तस्य महारथस्य चक्रं राष्ट्रं वर्त्तयतीति चक्रवर्त्ती सार्वभौमः तस्य नलस्य, 'हरिश्चन्द्रो नलो राजा पुरुः कुत्सः पुरूरवाः। सागरः कार्त्तवीर्य्यश्च षडेते चक्रवर्त्तिनः॥' इत्यागमात् अन्यत्र चक्रेणैकेन वर्त्तनशीलस्येत्यर्थः। अध्वनि मार्गे नापेक्षत इत्यनपेक्षं पचाद्यच्, परेषामनपेक्षं तस्मादुद्वहनादसहायोद्वहनाद्धेतोर्यशःसितं कीर्त्तिविशदम् अत

एवानीदृशामीदृशयशोरहितानाम् । 'सप्त युञ्जन्ति रथमेकचक्रमि' ति सप्तानां सम्भूयोद्वहनश्रवणादिति भावः । रवेरर्वतामश्वानामन्तर्वलमन्तःसारं रदानां दन्तानां ये अवदाताः सिताः अंशवः तेषां मिषाद्धसन्तं हसन्तमिव स्थितमित्यर्थः । अत्र मिषशब्देनांशूनामसत्यत्वमापाद्य हासत्वोत्प्रेक्षणात्सापह्नवोत्प्रेक्षेयं गम्या च व्यञ्जकाप्रयोगात् । 'रदना दशना दन्ता रदा' इत्यमरः ॥ ६१ ॥

म०—अमन्यतेति। असौ नलः कुसुमान्येव इषवः कामबाणास्तेषां गर्भजं गर्भजातं वियोगिनामिति कर्मणि षष्ठी। अन्धाः क्रियन्तेऽनेनेत्यन्धङ्करणं 'आढ्यसुभगे' त्यादिना च्व्यर्थे ख्युनूप्रत्ययः, 'अरुर्द्विषदि'त्यादिना मुमागमः। तं परागं पुरा पूर्वं पुरारये पुरहराय स्मरेण मुक्तेषु शरेषु सङ्गतं संसक्तं तस्य पुरारेरङ्गे यद्भस्म तदिवामन्यत इति उत्प्रेक्षितवानित्यर्थः। पुरा पुरारये ये मुक्तास्त एवैते पुरोवर्त्तिनः कुसुमेषव इत्यभिमानः, अन्यथैषां तदङ्गभस्मसङ्गोत्प्रेक्षानुत्थानादिति ॥ ८७ ॥

अन्वय—असौ कुसुमेषु गर्भजं वियोगिनां अन्धङ्करणं पुरा स्मरेण मुक्तेषु शरेषु सङ्गतं तदङ्गभस्म इव अमन्यत।

संस्कृत-व्याख्या—असौ = नलः, कुसुमेषु = पुष्पेषु, गर्भजम्=आन्तरप्रदेशगतम्, वियोगिनाम् = विरहिणाम्, अन्धङ्करणम् = नेत्रोपघातकम्, परागम् = कुसुमधूलिः, पुरा=पूर्वम्, स्मरेण = कामेन, पुरारये = पुरहराय, मुक्तेषु = क्षिप्तेषु, शरेषु = बाणेषु, सङ्गतम् = लग्नम्, तदङ्गभस्म = तस्य शिवस्य अङ्गे यद् भस्म तत्, इव, अमन्यत = अतर्कयत्।

हिन्दी-अनुवाद—असौ = इस (राजा) नल ने, कुसुमेषु = पुष्पों में गर्भजम् = अन्दर स्थित, वियोगिनाम् = विरहियों को, अन्धङ्करणम् = अन्धा बनाने वाले, परागम् = पराग को, पुरा = पूर्वकाल में, स्मरेण = कामदेव द्वारा, पुरारये = शिव जी पर, मुक्तेषु = छोड़े गये, शरेषु = बाणों में, संगतम् = लगी हुयी, तदङ्गभस्म इव = शिवजी के शरीर की भस्म, अमन्यत = माना।

भावार्थ—इस राजा नल ने पुष्पों के मध्य विद्यमान, वियोगियों को अन्धा कर देने वाले पराग को पूर्वकाल में कामदेव द्वारा शिव जी पर छोड़े गये पुष्पनिर्मित बाणों में लगी हुयी शिवजी के शरीर की भस्म ही समझा। भस्म अथवा धूलि जब आँख में गिर जाती है तब वह प्राणियों को अन्धा बना देती है। पुष्प परागों का दर्शन कर विरही व्यक्ति काम पीड़ित होकर अन्धे (विवेकशून्य) हो जाया करते हैं।

अलङ्कार—"तदङ्गभस्म इव" में "उत्प्रेक्षा" अलङ्कार है। फूलों के पराग में शिवजी के शरीर पर लगी हुयी भस्म की संभावना की गयी है।

व्याकरण—**वियोगिनाम्** = यहाँ पर "कर्तृकर्मणोः कृति" सूत्र से कर्म में षष्ठी विभक्ति हुयी है। **अन्धङ्करणम्** = अन्ध + कृ + ख्युन्। **पुरा**—यह अव्यय है—"स्यात्प्रबन्धे चिरातीते निकटागामिके पुरा"—इत्यमरः।

समास—**अन्धङ्करणम्**=अनन्धाः अन्धाः क्रियन्तेऽनेन इति अन्धङ्करणम्।

टिप्पणियाँ—**गर्भजम्** = (पुष्पों के) अन्दर उत्पन्न। **वियोगिनाम्** = वियोगियों अथवा विरहियों के। **अन्धङ्करणम्** = अन्धा बना देने वाला। **पुरा** = पहले, पूर्वकाल में। **पुरारये** = शिवजी पर। **सङ्गतम्** = लगी हुयी, संलग्न। **तदङ्गभस्म** = उन शिवजी के शरीर पर लगी हुयी भस्म।

प्रसङ्ग—उद्यान में कोयल मधुर शब्द कर रही है। भ्रमर भी पुष्पों पर बैठकर गुञ्जन कर रहे हैं। पुष्प विकसित हो रहे हैं। स्थल कमलिनी पृथक ही खिल रही है। इन सभी को देखकर राजा नल की विरह-व्यथा और भी अधिक उनको सन्तप्त कर रही थी—

पिकाद्वने शृण्वति भृङ्गहुङ्कृतैर्दशामुदञ्चत्करुणं वियोगिनाम्।
अनास्थया सूनकरप्रसारिणीं ददर्श दूनः स्थलपद्मिनीं नलः॥ ८८॥

म०—पिकादिति। वने उपवने श्रोतरि पिकाद्वक्तुः सकाशात् भृङ्गहुङ्कृतैर्वियोगिनां दशामलिहुङ्कारकृतां दुःखावस्थामित्यर्थः उदञ्चत्करुणं विकसद् वृक्षविशेषमुद्यत्कृपञ्च यथा तथा शृण्वति सति, 'करुणस्तु रसे वृक्षे कृपायां करुणा मते'ति विश्वः। अनास्थया श्रोतुमनिच्छया सूनं प्रसूनमेव करं प्रसारयतीति प्रसारिणीं पुष्परूपहस्तविस्तारिणीं तथोक्तामनिष्टकथां करेण वारयन्तीमिव स्थितामित्यर्थः। सूनकरेति प्रसारिणीमितिरूपकानुप्राणिता गम्योत्प्रेक्षेयम्। स्थलपद्मीनीं नलो दूनः परितप्तः सन् दूङः कर्त्तरि क्तः, 'ल्वादिभ्यश्चे'ति निष्ठानत्वम्। ददर्श॥ ८८॥

अन्वय—वने पिकाद् भृङ्गहुङ्कृतैः वियोगिनां दशां उदञ्चत् करुणं [यथास्यात्तथा] शृण्वति अनास्थया सूनकरप्रसारिणीं स्थलपद्मिनीं नलः दूनः [सन्] ददर्श।

संस्कृत-व्याख्या—वने = उपवने, पिकाद् = कोकिलात्, भृङ्गहुङ्कृतैः = भ्रमराणां हुंकारैः, वियोगिनाम् = विरहिणाम्, दशाम् = दुःखावस्थाम्, उदञ्चत् करुणम् = विकसद्वृक्षविशेषमुद्यत्कृपञ्च, यथा स्यात्तथा, शृण्वति = आकर्णयति,

सति, अनास्थया = श्रोतुमनिच्छया, सूनकरप्रसारिणीम् = पुष्परूपहस्तविस्तारिणीम् तथोक्तामनिष्टकथां करेण वारयन्तीमिव स्थितामित्यर्थः, स्थलपद्मिनीम्=भूकमलिनीम्, नलः, दूनः = संतप्तः, सन् , ददर्श = अवलोकितवान् ।

हिन्दी-व्याख्या—वने=उस उपवन में, पिकाद्=कोयल से, भृङ्गहुङ्कृतैः=भ्रमरों के हुंकारों से, वियोगिनाम् = विरहीपुरुषों की, दशाम् = दुःखावस्था को, उदञ्चत्करुणम् = विकसित करुणनामक वृक्षों से, शृण्वति = सुनने पर, अनास्थया = सुनने की अनिच्छा से, सूनकरप्रसारिणीम् = [रोकने की दृष्टि से] पुष्परूपी [अपने] हाथों को फैलाये हुये, स्थलपद्मिनीम् = स्थलकमलिनी को, नलः = राजा नल ने, दूनः = सन्तप्त होते हुये, ददर्श = देखा ।

भावार्थ—उस उपवन में जब कोयल भ्रमरों के हुंकाररूपी माध्यम के द्वारा विरहियों की करुणाजनक अवस्था को कह रही थी तो स्थलकमलिनी उसे सुनना नहीं चाहती थी। अतएव वह अपने पुष्परूपी हाथों को फैलाकर मानों कोयल को वैसा करने से रोक रही थी । इस प्रकार की स्थलकमलिनी को संतप्तावस्था से विद्यमान राजा नल ने देखा ।

जहाँ करुणनामक वृक्ष विकसित हो रहे थे, कोयल वियोगियों की दशा का वर्णन अपने शब्दों में कर रही थी और जहाँ गुञ्जन करते हुये भ्रमर हूँ, हूँ कह कह कर हुंकारें भर रहे थे, ऐसे उस उपवन में स्थलकमलिनी अपने पुष्प रूपी हाथों को फैलाकर कोयल को वैसा करने से रोक रही थी । ऐसी स्थल-कमलिनी को राजा नल ने संतप्त होते हुये देखा ।

इस वर्णन से यह स्पष्ट हो जाता है कि कोयल का कूजना, वृक्षों का विकसित होना, भ्रमरों का गुंजन शब्द करना तथा कमलिनी का खिलना आदि सभी पदार्थ कामपीड़ित व्यक्ति के हृदय में और भी अधिक कामोत्तेजना उद्दीप्त करने वाले हुआ करते हैं। राजा नल तो कामपीड़ित थे ही और साथ ही विरहावस्था में भी विद्यमान थे। उसी अपनी कामसंतप्तावस्था में उन्होंने उपर्युक्त सभी पदार्थों को देखा ।

अलङ्कार—"सूनंकरप्रसारिणीम्" में रूपक अलङ्कार से अनुप्राणित "गम्योत्प्रेक्षा" अलङ्कार है ।

व्याकरण—**अनास्थया** = अन + आ + स्था + अङ् ("आतश्चोपसर्गे" इस सूत्र से) + टाप् = अनास्था—तृतीयाविभक्ति के एकवचन में—अनास्थया । दूनः = दू + [कर्त्ता में] क्त । तत्पश्चात् "ल्वादिभ्यश्च" सूत्र से 'त' के स्थान पर 'न' होकर ।

समास—उदञ्चत्करुणं = उदञ्चन्तः करुणाः तन्नामकाः वृक्षाः यस्मिन् तत्तथा **अथवा** श्लेष की दृष्टि से—उदञ्चन्ती करुणा दया यस्मिन् तत्तथा । **भृङ्गहुङ्कृतैः**=भृङ्गाणां हुङ्कृतैः (षष्ठी तत्पु०)। **अनास्थया**=न आस्था अनास्था तया (नञ् तत्पु०) । **सूनकरप्रसारिणीम्**=सूनं प्रसूनमेव करं प्रसारयतीति ।

टिप्पणियाँ—पिकात् = कोयल से । **भृङ्गहुङ्कृतैः** = भ्रमरों द्वारा किये गये हूँ, हूँ—इस प्रकार के हुंकारों के माध्यम से । कहने का तात्पर्य है कि कोयल तो अपने शब्द द्वारा वियोगी पुरुषों की दुःखावस्था का करुण चित्रण कर रही है और भ्रमर अपनी हुंकारों द्वारा उसका समर्थन कर रहे हैं। **उदञ्चत्करुणम्** = [जिस वन में] करुण नामक वृक्ष मिल रहे थे **अथवा** [श्लेष द्वारा] जिनमें करुणा (दया) उत्पन्न हो रही थी । "करुणस्तु रसेवृक्षे कृपायां करुणा मता" इति विश्वः । **शृण्वति** = यह "वने" का विशेषण है । लक्षणा-वृत्ति द्वारा यहाँ "वने" का अर्थ "वनवासी" होगा । इसी कारण यहाँ पर भाव में "यस्य च भावेन भावलक्षणम्" से सप्तमी हुयी है । कहने का तात्पर्य यह है कि जब वन में रहने वाले प्राणी कोयल के द्वारा कही जाने वाली वियोगियों की करुण दशा का वर्णन सुन रहे थे ऐसे समय पर । **अनास्थया**= बिना आस्था अथवा श्रद्धा के—अनिच्छा से । **सूनकरप्रसारिणीम्** = [अपने] पुष्प रूपी हाथों को फैलाये हुये । कहने का भाव यह है कि स्थलकमलिनी वियोगियों की उस करुण दशा को सुनना नहीं चाहती थी । इसी कारण वह मानो अपने पुष्परूपी हाथों को फैलाकर मना कर रही थी । **दूनः** = सन्तप्त, [काम] पीड़ित अथवा व्यथित ।

प्रसङ्ग—उस उपवन में राजा नल ने देखा कि आम्रवृक्ष अपनी मञ्जरियों को हिला हिलाकर वियोगियों को डरपा रहा है—

रसालसालः समदृश्यतामुना स्फुरद्द्विरेफारवरोषहुङ्कृतिः ।
समीरलोलैर्मुकुलैर्वियोगिने जनाय दित्सन्निव तर्जनाभियम् ॥८९॥

म०—रसालेति । अमुना नलेन स्फुरन्तो द्विरेफास्तेषामारवो भ्रमरझङ्कार एव रोषेण या हुङ्कृतिर्हुङ्कारो यस्य सः समीरलोलैर्वायुचलैर्मुकुलैरङ्गुलिभिरिति भावः । वियोगिने जनाय तर्जनाभियं दित्सन् दातुमिच्छन्निव स्थितः, ददातेः सन् प्रत्ययः 'सनिमीमे'त्यादिना इसादेसः, 'अत्र लोपोऽभ्यासस्ये'त्यभ्यासलोपः; 'सस्यार्धधातुक' इति सकारस्य तकारः । रसालसालश्चूतवृक्षः समदृश्यत सम्यग्दृष्टः । द्विरेफेत्यादिरूपकोत्थापितेयं तर्जनाभयजननोत्प्रेक्षेति सङ्करः ॥ ८९ ॥

अन्वय—अमुना स्फुरद्द्विरेफारवरोषहुङ्कृतिः रसालसालः समीरलोलैः मुकुलैः वियोगिने जनाय तर्जनाभियं (पाठान्तरे तर्जनाभयं) दित्सन् इव समदृश्यत ।

संस्कृत-व्याख्या—अमुना = नलेन, स्फुरद्द्विरेफारवरोषहुङ्कृतिः = स्फुरन्तः भ्रमन्तः द्विरेफाः भ्रमराः तेषां आरव एव झङ्कार एव रोषहुङ्कृतिः क्रोधहुङ्कारः यस्य तादृशः, रसालसालः = आम्रवृक्षः, समीरलोलैः = समीरेण वायुना लोलैः चञ्चलैः, मुकुलैः = कुड्मलैः अङ्गुलिभिरिति भावः, वियोगिने = विरहिणे, जनाय = लोकाय, तर्जनाभियम् = तर्जनायाः भर्त्सनायाः भियम्, (भयमपि पाठो लभ्यते) दित्सन् इव = दातुमिच्छन् इव स्थितः, समदृश्यत = सम्यग्दृष्टः ।

हिन्दी-व्याख्या—अमुना = इस राजा नल के द्वारा, स्फुरद्द्विरेफारवरोषहुङ्कृतिः = उड़ते हुये भ्रमरों की गुञ्जाररूपी हुङ्कार से युक्त, रसालसालः= आम का वृक्ष, समीरलोलैः = वायु के कारण चंचल, मुकुलैः = मंजरियों रूपी अंगुलियों के द्वारा, वियोगिने जनाय = विरही लोगों को, तर्जनाभियम् = तर्जना का भय, दित्सन् इव = दिखलाने की इच्छा सी करता हुआ, समदृश्यत = देखा गया ।

भावार्थ—आम्रवृक्ष पर मंजरियाँ लगी हुयी थीं। वायु के कारण वे हिल-डुल रही थीं, गुंजार करते हुये भ्रमर उनके ऊपर इतस्ततः उड़ रहे थे। इस दृश्य को देखकर ऐसा प्रतीत होता था मानो आम का वृक्ष भ्रमरों के गुञ्जनरूपी हुंकारों के साथ [क्रोध के साथ] अपनी मंजरियों रूपी हाथों को हिला हिलाकर वियोगी-पुरुषों को तर्जना (डर) दे रहा हो।

अलङ्कार—"तर्जनाभियं दित्सन्निव" की दृष्टि से उक्त श्लोक में उत्प्रेक्षा अलङ्कार है। इसके अतिरिक्त इसमें "अनुप्रास" अलङ्कार भी है जो कि स्पष्ट ही है।

व्याकरण—दित्सन् = दा + सन् + द्वित्व, "सनि-सीमा" इत्यादि के द्वारा "इस्" आदेश तथा "अत्र लोपोऽभ्यासस्य" से अभ्यासलोप और "सः स्यार्धधातुके" से 'स' के स्थान 'त' होने के पश्चात् लट्-शतृ । समदृश्यत= सम् + दृश + लङ् (कर्म में)।

समास—स्फुरद्द्विरेफारवरोषहुङ्कृतिः = द्वौ रेफौ यस्मिन् स द्विरेफः, स्फुरन्तः द्विरेफाः (कर्मधारय) इति स्फुरद्द्विरेफाः—तेषां आरवः

(षष्ठी तत्पु०), स एव रोषहुंकृतिः यस्य सः (बहु० स०)। **समीरलोलैः**= समीरेण लोलाः इति समीरलोलाः तैः।

टिप्पणियाँ—स्फुरद्द्विरेफारवरोषहुङ्कृतिः = [आम्र मंजरियों के ऊपर] मँडराते हुये भ्रमरों का गुँजार ही जिसका [जिस आम्रवृक्ष का] क्रोधपूर्ण हुंकार था [ऐसा आम्रवृक्ष]। **रसालसालः** = आम का वृक्ष। **समीरलोलैः** = वायु के कारण चंचल। **मुकुलैः** = कलियों द्वारा [कलियाँ रूपी अपने हाथों के माध्यम से]। **तर्जनाभियम्** = तर्जन करने अथवा फटकारने सम्बन्धी भय को। **दित्सन्** = देना चाहता हुआ [दिखलाता हुआ]। **समदृश्यत्** = देखा गया।

प्रसङ्ग—"हे पथिक ! तुम प्रतिदिन दुर्बलता को प्राप्त करते जाओ, बार बार मूर्च्छना को प्राप्त करते रहो तथा सन्ताप को प्राप्त करते रहो" इस रूप में शाप देते हुये कोयलों को राजा नल ने बड़े खेद के साथ देखा—

दिने दिने त्वं तनुरेधि रेऽधिकं पुनः पुनर्मूर्च्छ च मृत्युमृच्छ च।
इतीव पान्थं शपतः पिकान् द्विजान् सखेदमैक्षिष्ट स लोहितेक्षणान्॥९०॥

म०—दिने दिने इति। रे इति हीनसम्बोधने। त्वं दिने दिने अधिकं तनु एधि अधिकं कृशो भव, अस्तेर्लोट् सिप् 'हुझल्भ्यो हेर्धिरि'ति धित्वम्, 'ध्वसोरेद्धावभ्यासलोपश्च' इति एत्वम्, पुनः पुनः मूर्च्छं च मृत्युं मरणमृच्छ च इति पान्थं नित्यपथिकं शपतः शपमानानिव स्थितानित्युत्प्रेक्षा, लोहितेक्षणान् रक्तदृष्टीन् एकत्र स्वभावतोऽन्यत्र रोषाच्चेति द्रष्टव्यम्, पिकान् कोकिलान् द्विजान् पक्षिणो ब्राह्मणांश्च स नलः सखेदमैक्षिष्ट। स्वस्यापि उक्तशङ्कयेति भावः॥ ९०॥

अन्वय—"रे ! त्वं दिने दिने अधिकं तनुः एधि, पुनः पुनः च मूर्च्छ, मृत्युं (पाठान्तरे तापं) च ऋच्छ।" इति पान्थं (पान्थानपि पाठो लभ्यते) शपतः इव लोहितेक्षणान् पिकान् द्विजान् स सखेदं ऐक्षिष्ट।

संस्कृत-व्याख्या—"रे != इति नीच सम्बोधने (पान्थ !), त्वम्, दिने दिने = दिवसे दिवसे, अधिकम् = भृशम्, तनुः = कृशः, एधि = भव, पुनः पुनः च = भूयोभूयः च, मूर्च्छ = मूर्च्छां प्राप्नुहि, मृत्युं च = मरणं च [पाठभेदे—तापं च = सर्वाङ्गतापं च], ऋच्छ = लभस्व।" इति = एवम्, पान्थं = पथिकं [पाठभेदे-पान्थान् = पथिकान्], शपतः = शापं ददतः, इव, लोहितेक्षणान् = रक्तदृष्टीन् [पिकपक्षे स्वभावतः द्विजपक्षे च क्रोधात्], पिकान् =

कोकिलान्, द्विजान् = पक्षिणः ब्राह्मणांश्च, सः = नलः, सखेदम् = खेदसहितं यथास्यात्तथा, ऐक्षिष्ट = ददर्श ।

हिन्दी-व्याख्या—"रे ! = हे पथिक !, त्वम् = तुम, दिने दिने = प्रतिदिन अथवा दिन पर दिन, अधिकं तनुः एधि = अधिक दुर्बल होते जाओ, पुनः पुनः च मूर्च्छ = बार बार मूर्च्छित होओ, मृत्युं च ऋच्छ = मृत्यु प्राप्त करो [पाठभेदे—तापं च ऋच्छ = और सन्ताप को प्राप्त करो]", इति = इस भाँति, पान्थं = पथिक को [पाठभेदे—पान्थान् = पथिकों को], शपतः इव = शाप देते हुये के सदृश, लोहितेक्षणान् = लाल नेत्रों वाले, पिकान् = कोयलों को, द्विजान् = पक्षियों अथवा ब्राह्मणों को, स = उस राजा नल ने, सखेदम् = बड़े खेद के साथ, ऐक्षिष्ट = देखा ।

भावार्थ—"हे पथिक ! तुम दिन पर दिन दुबले होते जाओ, बार-बार मूर्च्छना का अनुभव करो तथा मृत्यु [पाठान्तर में सन्ताप] को प्राप्त करो इस भाँति पथिकों को मानो शाप देते हुये लालनेत्रों वाले कोयलों, पक्षियों अथवा ब्राह्मणों को राजा नल ने बड़े खेद तथा दुःख के साथ देखा ।

अलङ्कार—"पान्थं शपतः इव" में उत्प्रेक्षा अलंकार स्पष्ट है ।

व्याकरण—एधि = अस् + लोट् (मध्यम पुरुष, एकवचन का रूप) । शपतः = इस स्थल पर उपालम्भ अर्थ में प्रयुक्त न होने के कारण "शप् उपालम्भे" वार्तिक से आत्मने पद नहीं हुआ । अन्यथा "शपमानान्" प्रयोग बनता । ऐक्षिष्ट = ईक्ष् + लुङ् ।

समास—**लोहितेक्षणान्** = लोहितानि ईक्षणानि येषां ते लोहितेक्षणाः (बहुव्रीहि), तान् ।

टिप्पणियाँ—रे = यह अनादर सूचक अव्यय है । नीच को सम्बोधित करने में इसका प्रयोग किया जाता है । **तनुः** = क्षीण, दुर्बल । **एधि** = होओ । **ऋच्छ** = गच्छ—प्राप्त करो । **पान्थान्** = राहगीरों अथवा पथिकों को । **शपतः** = शाप देते हुये । **लोहितेक्षणान्** = रक्त नेत्रों वाले । कोयल की आँखे स्वभावतः रक्तवर्ण की हुआ करती हैं । क्रोध के कारण क्रोधावस्था में भी आँखे लाल हो जाया करती हैं । अतः रक्त वर्ण की आँखें होने के कारण ही कोयल में शाप देने सम्बन्धी उत्प्रेक्षा की गयी है । **द्विजान्** = पक्षियों अथवा ब्राह्मणों को । **ऐक्षिष्ट** = देखा ।

प्रसङ्ग—धूमकेतु नामक तारे को विपत्ति का कारण माना जाता है । अमर

जिस पर बैठे हुये थे अथवा जिस पर मँडरा रहे थे ऐसे चम्पक-पुष्प भी विरही जनों के लिये उद्दीपक होने के कारण विपत्तिजनक थे। अतः राजा नल ने चम्पक-पुष्प को साक्षात् धूमकेतु ही समझा—

अलिस्रजा कुड्मलमुच्चशेखरं निपीय चाम्पेयमधीरया दृशा।
स धूमकेतुं विपदे वियोगिनामुदीतमातङ्कितवानशङ्कत ॥ ९१ ॥

म०—अलिस्रजेति। अलिस्रजा भ्रमरपंक्त्या उच्चशेखरमुन्नतशिरोभूषणम् अलिमलिनाङ्कमित्यर्थः। 'शिखास्वापीडशेखरावि'त्यमरः। चाम्पेयं चम्पकविकारं कुड्मलम् 'अथ चाम्पेयः चम्पको हेमपुष्पक' इत्यमरः। नन्वयुक्तमिदं 'न षट्पदो गन्धफलीमजिघ्रदि'त्यादावलीनां चम्पकस्पर्शाभावप्रसिद्धेरिति चेत् नैवं किन्तु स्पृष्टेयन्तावतैवास्पर्शोक्तिः क्वचित् केषाञ्चित् उक्तपरिहारः अथवा चाम्पेयं नागकेसरं 'चाम्पेयः केसरो नागकेसरः काञ्चनाह्वय' इत्यमरः। अधीरया दृशा निपीय विक्लवदृष्ट्या गाढं दृष्ट्वा आशङ्कितवान् किञ्चिदनिष्टमुत्प्रेक्षितवान्। स नलः 'अनिष्टाभ्यागमोत्प्रेक्षां शङ्कामाचक्षते बुधाः' इति लक्षणात्। वियोगिनां विपदे उदीतमुत्थितं धूमकेतुमशङ्कत अतर्कयदित्युत्प्रेक्षालङ्कारः ॥ ९१ ॥

अन्वय—अलिस्रजा उच्चशेखरं चाम्पेयं कुड्मलं अधीरया दृशा निपीय आशङ्कितवान् स वियोगिनो विपदे उदीतं धूमकेतुं अशङ्कत।

संस्कृत-व्याख्या—अलिस्रजा = भ्रमरपङ्क्त्या, उच्चशेखरम् = उन्नतशिरोभूषणम्—अलिमलिनाङ्कमित्यर्थः, चाम्पेयम् = चम्पकविकारम्, कुड्मलम् = कोरकम्, अधीरया = विक्लवया, दृशा, निपीय = गाढं दृष्ट्वा, आशङ्कितवान् = किञ्चिदनिष्टमुत्प्रेक्षितवान्, स = नलः, वियोगिनाम् = विरहिणाम्, विपदे = विनाशाय, उदीतम् = उत्थितम्, धूमकेतुम्, अशङ्कत = अतर्कयत्।

हिन्दी-अनुवाद—अलिस्रजा = भ्रमरों की पंक्ति से युक्त होने के कारण, उन्नतशेखरम् = उन्नतशिखरभाग वाली, चाम्पेयम् = चम्पा की, कुड्मलम् = कली को, अधीरया = अधीर, दृशा = दृष्टि से, निपीय = भलीभाँति देखकर, आशङ्कितवान् = आशङ्कायुक्त, स = राजा नल ने, [उस चम्पक पुष्प को], वियोगिनाम् = वियोगियों की, विपदे = विपत्ति अथवा विनाश के लिये, उदीतम् = उदित हुआ, धूमकेतुं अशङ्कत = धूमकेतु समझा।

भावार्थ—आकाश में धूमकेतु तारे का उदय होना अत्यन्त अनिष्टकारक माना जाता है। चम्पा की कली भी कामोद्दीपक होने के कारण विरही जनों के लिये अनिष्टकारक ही हुआ करती है। इसी आधार को ध्यान में रखते हुये

महाकवि ने यहाँ यह कल्पना की है कि विरहावस्था में विद्यमान राजा नल के लिये चम्पकपुष्प अथवा चम्पा की कलियाँ साक्षात् धूमकेतु के सदृश ही थीं।

अलङ्कार—उक्त श्लोक में "उत्प्रेक्षा" अलङ्कार है।

व्याकरण—चाम्पेयम् = चम्पा + अण्। **कुड्मलम्** = कुड् (बाल्ये) + कल, मुट् का आगम। **उदीतम्** = उद् + ई + क्त।

समास—अलिस्रजा = अलीनां स्रक् इति अलिस्रक् (षष्ठी तत्पु०), तया। **उच्चशेखरम्** = उच्चः शेखरो यस्य सः (बहुव्रीहि), तम्। **चाम्पेयम्** = चम्पायाः अयं चाम्पेयः तम्।

टिप्पणियाँ—अलिस्रजा = भ्रमरों की माला अथवा पंक्ति से। **उच्चशेखरम्** = उन्नतशिखर भाग से युक्त। ऊँचो उठी हुयी। **चाम्पेयम्** = चम्पा की—"अथ चाम्पेयः चम्पको हेमपुष्पकः" इत्यमरः। चम्पा के सम्बन्ध में लोक में ऐसी प्रसिद्धि है कि उसके पास भ्रमर नहीं जाया करते हैं किन्तु फिर भी कवि ने उस प्रकार का वर्णन क्यों किया है ("न षट्पदो गन्धफलीमजिघ्रत")। इससे प्रतीत होता है कि महाकवि श्रीहर्ष को उस कथन में विश्वास नहीं था। अथवा—हो सकता है कि इस स्थल पर 'चाम्पेय' शब्द से 'नागकेसर का फूल' ही कवि को अभिप्रेत रहा हो क्योंकि नागकेसर के फूल को भी "चाम्पेय" कहा जाता है—"चाम्पेयः केसरो नागकेसरः काञ्चनाह्वयः" इत्यमरः। **कुड्मलम्**=कली को—"कुड्मलो मुकुले पुंसि न द्वयोर्नरकान्तरे" इति मेदिनीकोषः। **निपीय** = पान करके अर्थात् भलीभाँति नेत्रों से देख करके। **विपदे** = विपत्ति अथवा विनाश के लिये।

प्रसङ्ग—राजा नल ने नागकेसर के फूल को देखा जिस पर भ्रमर बैठे हुये थे और उनके बैठने के कारण वह काला काला दिखलाई पड़ रहा था और उससे पीले पराग के कण झड़ रहे थे—

गलत्परागं भ्रमिभङ्गिभिः पतत् प्रसक्तभृङ्गावलि नागकेसरम्।
स मारनाराचनिघर्षणस्खलज्ज्वलत्कणं शाणमिव व्यलोकयत्॥ ९२॥

म०—गलदिति। स नलो गलत्परागं निर्यद्रजस्कं भ्रमिभङ्गिभिः भ्रमणप्रकारैरुपलक्षितं पतद् भ्रश्यत् प्रसक्तभृङ्गावलि सक्तालिकुलं नागकेसरं कुसुमविशेषं मारनाराचनिघर्षणैः स्मरशरकर्षणैः स्खलन्तः लुठन्तः ज्वलन्तश्च कणाः स्फुलिङ्गा यस्य तं शाणं निकषोत्पलमिवेत्युत्प्रेक्षा व्यलोकयत्, 'शाणस्तु निकषः कष' इत्यमरः॥ ९२॥

अन्वय—स गलत्परागं भ्रमिभङ्गिभिः पतत् प्रसक्तभृङ्गावलि नागकेसरं मारनाराचनिघर्षणस्खलज्ज्वलत्कणं शाणं इव व्यलोकयत्।

संस्कृत-व्याख्या—स = नलः, गलत्परागम् = निर्यद्रजस्कम्, भ्रमिभङ्गिभिः = भ्रमणप्रकारैः उपलक्षितम्, पतत् = भ्रश्यत्, प्रसक्तभृङ्गावलि = सक्तालिकुलम्, नागकेसरम्=नागकेसर पुष्पम्, मारनाराचनिघर्षणस्खलज्ज्वलत्कणम् = मारस्य कामदेवस्य नाराचः शराः तेषां निघर्षणैः कर्षणैः स्खलन्तः लुठन्तः ज्वलन्तः देदीप्यमानाः कणाः स्फुलिङ्गाः यस्मात् तादृशम्, शाणमिव = निकषोत्पलमिव, व्यलोकयत् = दृष्टवान्।

हिन्दी-अनुवाद—स = राजा नल ने, गलत्परागम् = झरते हुये पराग से युक्त, भ्रमिभङ्गिभिः = चक्कर खाकर एक विशेष प्रकार से, पतत् = गिरते हुये, प्रसक्तभृङ्गावलि = [एवं] संलग्न भ्रमरों की पंक्तियों से युक्त, नागकेसरम् = नागकेसर के फूल को, मारनाराचनिघर्षणस्खलज्ज्वलत्कणम् = कामदेव के बाणों की रगड़ से गिरते तथा जलते हुए कणों (चिनगारियों) से युक्त, शाणमिव = शाण (सान रखे जाने वाले प्रस्तर विशेष) के सदृश, व्यलोकयत् = देखा।

भावार्थ—उस उपवन में नागकेसर का फूल भ्रमरों के बैठ जाने के कारण कृष्ण वर्ण का दिखलाई पड़ रहा था तथा उसमें से पीतवर्ण का पराग नीचे की ओर झर रहा था। अतएव नागकेसर पुष्प के सम्बन्ध में यह उत्प्रेक्षा की गयी है कि वह मानो काला शाण (सान रखने का पत्थर) था जिसपर कामदेव के बाणों की रगड़ लग रही थी और उस रगड़ के कारण जलते हुए पीले पीले कण निकल निकल कर नीचे की ओर गिर रहे थे। इस प्रकार के नागकेसर के फूल को राजा नल ने देखा।

अलङ्कार—उक्त श्लोक में उत्प्रेक्षा अलङ्कार है।

व्याकरण—**नागकेसरम्** = विकार अर्थ में—(अर्थात् नागकेसर का विकार) नागकेसर + अण्।

समास—**गलत्परागम्** = गलन् परागो यस्य तत् (बहुव्रीहि)। **प्रसक्तभृङ्गावलि** = प्रसक्ता भृङ्गावलिः यस्मिन् तत् (बहुव्रीहि)। **मारनाराचनिघर्षणस्खलज्ज्वलत्कणम्** = मारस्य नाराचाः इति मारनाराचाः तेषां निघर्षणैः स्खलन्तः ज्वलन्तश्च कणाः यस्मात् तादृशम्।

टिप्पणियाँ—**गलत्परागम्** = जिससे पराग के कण गिर अथवा झड़

रहे थे ऐसे नागकेसर के फूल को। **भ्रमिभङ्गिभिः** = चक्कर काटने सम्बन्धी विशिष्ट प्रकार के साथ। **पतत्** = गिरते हुये। दूसरे वृक्षों से उड़कर उस ओर आते हुये। **प्रसक्तभृङ्गावलि** = भ्रमर-समूह से युक्त अर्थात् जिस पुष्प पर भ्रमरों की पंक्तियाँ बैठी हुयी थीं। **नागकेसरम्** = नागकेसर का फूल। **मारनाराचनिघर्षणस्खलज्ज्वलत्कणम्** = जिस (शाण) पर कामदेव के बाणों की रगड़ लग रही थी और उस रगड़ के कारण उससे चिनगारियाँ भी निकल निकलकर इधर-उधर गिर रही थी ऐसे, **शाणम्** = सान रखने वाले पत्थर—"शाणस्तु निकषः कषः" इत्यमरः। **व्यलोकयत्** = देखा।

प्रसङ्ग—नल का शरीर पुष्पों की अपेक्षा कहीं अधिक सुन्दर था। अतएव भ्रमरों की पंक्तियाँ शब्द करती हुयीं उनके शरीर के चारों ओर उड़ रहीं थीं। कामदेव, यह समझकर कि मेरे बाणों की पंक्तियाँ लक्ष्य भ्रष्ट होकर शब्द कर रही हैं, लज्जित हुआ—

तदङ्गमुद्दिश्य सुगन्धि पातुकाः शिलीमुखालीः कुसुमाद् गुणस्पृशः।
स्वचापदुर्निर्गतमार्गणभ्रमात् स्मरः स्वनन्तीरवलोक्य लज्जितः॥९३॥

म०—तदङ्गमिति। सुगन्धि शोभनगन्धं 'गन्धस्ये'त्यादिना समासान्त इकारः। तदङ्गं तस्य नलस्याङ्गमुद्दिश्य लक्ष्यीकृत्य गुणो गन्धादिः मौर्वीच, 'गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुष्वि'ति वैजयन्ती। तत्स्पृशस्तद्युक्ताः 'स्पृशोऽनुदके क्विन्' कुसुमादुपादानात् पातुका धावन्तीः, 'लषपते'त्यादिना उकञ्प्रत्ययः। स्वनन्तीर्ध्वनन्तीः शिलीमुखालीः अलिपंक्तीः बाणपंक्तीश्चावलोक्य स्मरः स्वचापात् पौष्पाद् दुर्निर्गताः विषमनिर्गता ये मार्गणाः बाणास्तद्भ्रमाद्धेतोर्लज्जितोऽभवत् नूनमिति शेषः। दुर्निर्गतेषवो ह्यधिकं स्वनन्तीति प्रसिद्धेः। अत्र स्वनच्छिलीमुखेषु दुर्निर्गतमार्गणभ्रमाद् भ्रान्तिमदलङ्कारः, स च शिलीमुखेति श्लेषानुप्राणितादुत्थापिता चेयं स्मरस्य लज्जितत्वोत्प्रेक्षेत्यनयोरङ्गाङ्गिभावेन सङ्करः॥ ९३॥

अन्वय—सुगन्धि तदङ्गमुद्दिश्य गुणस्पृशः कुसुमात् पातुकाः स्वनन्तीः शिलीमुखालीः अवलोक्य स्मरः स्वचापदुर्निर्गतमार्गणभ्रमात् लज्जितः।

संस्कृत-व्याख्या—सुगन्धि = शोभनगन्धम्, तदङ्गमुद्दिश्य = तस्य नलस्य अङ्गं शरीरं उद्दिश्य लक्ष्यीकृत्य, गुणस्पृशः = गुणाभिलाषिणीः [बाणपंक्ति-पक्षे = मौर्वीस्पृशः], कुसुमात् = पुष्पात्, पातुकाः = धावन्तीः, स्वनन्ती = ध्वनन्तीः, शिलीमुखालीः = भ्रमरपंक्तीः [बाणपंक्तीश्च], अवलोक्य = दृष्ट्वा, स्मरः =

कामः, स्वचापदुर्निर्गतमार्गणभ्रमात् = स्वचापात् स्वधनुषः दुर्निर्गताः दुःखेन निर्गताः मार्गणाः बाणाः तेषां भ्रमात्, लज्जितः अभवत् नूनमिति शेषः ।

हिन्दी-अनुवाद—सुगन्धि = शोभनगन्धयुक्त, तदङ्गम् = नल के शरीर को, उद्दिश्य = लक्ष्य करके, गुणस्पृशः = गुण अर्थात् सुगन्ध की अभिलाषिणी [बाणपंक्ति-पक्ष में—प्रत्यञ्चा का स्पर्श करने वाली], कुसुमात् = पुष्प से निकलकर, पातुकाः = दौड़ने वाली तथा, स्वनन्तीः = शब्द करती हुयी, शिलीमुखालीः = भ्रमरों की पंक्तियों [पक्षान्तर में—बाण-पंक्तियों] को, अवलोक्य = देखकर, स्मरः = कामदेव, स्वचापदुर्निर्गतमार्गणभ्रमात् = अपने धनुष से बुरी तरह निकले हुये [अर्थात् लक्ष्यभ्रष्ट] बाणों के भ्रम से, लज्जितः = लज्जित हो गया ।

भावार्थ—राजा नल का शरीर पुष्पों की अपेक्षा कहीं अधिक सुगन्धित था । अतएव भ्रमर समूह पुष्पों को छोड़ छोड़कर नल के शरीर के चारों ओर मँडरा रहा था । यह दृश्य देखकर कामदेव को यह भ्रम हो गया कि उनकी अपनी धनुष की डोरी का स्पर्श करने वाले बाणों की पंक्तियाँ लक्ष्य भ्रष्ट होकर भ्रमरों की पंक्तियों के रूप में गुञ्जन कर रही हैं [क्योंकि ऐसी प्रसिद्धि है कि लक्ष्यभ्रष्ट बाण अधिक ध्वनि करते हैं ।] अतः कामदेव लज्जित हो गया । [लक्ष्यभ्रष्ट बाणों को देखकर धनुषधारी का लज्जित होना स्वाभाविक ही है ।] ।

अलङ्कार—यहाँ पर शब्द करते हुये भ्रमरों की पंक्ति में कामदेव द्वारा अपने लक्ष्यभ्रष्ट बाणों का भ्रम किये जाने से भ्रान्तिमान् अलङ्कार है । और श्लेष से अनुप्राणित उत्प्रेक्षा अलङ्कार का अंगांगिभाव से संकर भी है ।

व्याकरण—**सुगन्धि** = यहाँ पर "गन्धस्येदुत्पूतिसुसुरभिभ्यः" सूत्र से "इत्व" हो जाता है । **गुणस्पृशः** = गुण + स्पृश + क्विन् ("स्पृशोऽनुदके" से) = गुणस्पृक् । **पातुका** = पत् + उकञ् + टाप् । **स्वनन्तीः** = स्वन् + लट्—शतृ + ङीप्—(बहुवचन में) ।

समास—**सुगन्धि** = सुष्ठु गन्धो यस्मिन् तत् सुगन्धि (बहुव्रीहि) । **गुणस्पृशः** = गुणं स्पृशतीति गुणस्पृक् ताः गुणस्पृशः । **पातुकाः** = पतितुं शीलं यासां ताः । **शिलीमुखालीः** = शिलीमुखानां आलयः (षष्ठी तत्पु०) ताः । **स्वचापदुर्निर्गतमार्गणभ्रमात्** = स्वचापात् दुःखेन निर्गताः मार्गणा इति स्वचापदुर्निर्गतमार्गणाः तेषां भ्रमात् ।

टिप्पणियाँ—**सुगन्धि** = शोभन (उत्तम) गन्ध से युक्त। **तदङ्गम्** = शरीर को। **उद्दिश्य** = लक्ष्य करके। **गुणस्पृशः** = गुण (सुगन्ध) को ग्रहण करने वाली। (बाणों की पंक्ति के पक्ष में—गुण अर्थात् प्रत्यंचा का स्पर्श करने वाली।) "गुणस्त्वावृत्तिशब्दादिज्येन्द्रियामुख्यतन्तुषु" इति वैजयन्ती। **पातुकाः** = गिरने वाली या दौड़ने वाली। **स्वनन्तीः** = शब्द करती हुयी। **शिलीमुखालीः** = भ्रमरों की पंक्तियों को। **स्मरः**=कामदेव। **स्वचापदुर्निर्गतमार्गणभ्रमात्** = अपने धनुष से बुरी तरह निकले हुये बाणों के भ्रम से। जब बाण ठीक रूप में नहीं छूटता है तब वह शब्द करता हुआ लक्ष्य-भ्रष्ट हो जाया करता है जिसके कारण बाण-चालक को लज्जित भी होना पड़ा करता है। **लज्जितः** = लज्जा को प्राप्त हुआ अथवा लज्जित हुआ।

प्रसङ्ग—उस राजा नल ने वायु से कम्पायमान पल्लवों के काँटों से क्षत-विक्षत पके हुये बेल के फल को देखा—

मरुल्ललत्पल्लवकण्टकैः क्षतं समुच्चरच्चन्दनसारसौरभम्।
स वारनारीकुचसञ्चितोपमं ददर्श मालूरफलं पचेलिमम् ॥ ९४ ॥

म०—मरुदिति। मरुता वायुना ललत्पल्लवानाञ्चलत्किसलयानां कण्टकैस्तीक्ष्णाग्रैरवयवैः क्षतमन्यत्र विलसद्विटनखैः क्षतमिति गम्यते, समुच्चरत् परितः प्रसर्पत् चन्दनसारस्येव सौरभं यस्य तत् अतएव वारनारीकुचेन वेश्यास्तनेन सञ्चितोपमं सम्पादितसादृश्यमित्युपमालङ्कारः। 'वारस्त्री गणिका वेश्ये'त्यमरः। कुलाङ्गनानखक्षताद्यनौचित्याद्वारविशेषणं, पचेलिमं स्वतः पक्वं कर्मकर्त्तरि 'केलिमर उपसंख्यानमि'ति पचेः केलिमर्प्रत्ययः। मालूरफलं बिल्वफलं 'बिल्वे शाण्डिल्यशैलूषौ मालूरः श्रीफलावपी'त्यमरः। स नलो ददर्श ॥ ९४ ॥

अन्वय—स मरुल्ललत्पल्लवकण्टकैः क्षतं समुच्चलच्चन्दनसारसौरभं वारनारीकुचसञ्चितोपमं पचेलिमं मालूरफलं ददर्श।

संस्कृत-व्याख्या—सः = नलः, मरुल्ललत्पल्लवकण्टकैः = मरुता वायुना ललन्तः विलसन्तः ये पल्लवाः तेषां कण्टकैः [अन्यत्र मरुत् देवः तद्वत् ललन् विलासं कुर्वन् यः पल्लवः विटः तस्य कण्टकाः कण्टवत्तीक्ष्णाः नखाः तैः।), क्षतम् = आहतम्, समुच्चरच्चन्दनसारसौरभम् = समुच्चरत् परितः प्रसर्पत् चन्दन सारस्य इव सौरभं गन्धं यस्मात् तादृशम् (अन्यत्र-चन्दनस्य सारसौरभं यस्मात् तादृशम्) वारनारीकुचसञ्चितोपमम् = वारनारीकुचेन वेश्यास्तनेन सञ्चितोपमम् सम्पादितसादृश्यम्—वेश्यास्तनतुल्यशोभम्—इत्यर्थः, पचे-

लिमम् = स्वतः पक्वम्, मालूरफलम् = बिल्वफलम्, ददर्श = अवलोकयामास ॥

हिन्दी-अनुवाद—स = उस राजा नल ने, मरुल्ललत्पल्लवकण्टकैः=वायु के द्वारा हिलते हुये पल्लवों के काटों से, [कुच-पक्ष में—देवता के सदृश विलास करने वाले विट के तीक्ष्ण नखों से] क्षतम् = क्षत-विक्षत, समुच्चलच्चन्दन-सारसौरभम् = (तथा) फैलती हुयी चन्दन की गन्ध के सदृश उत्तम गन्ध से युक्त [कुच-पक्ष में—फैलती हुयी तथा लिप्त हुयी चन्दन की गन्ध से युक्त], वारनारीकुचसञ्चितोपमम् = वेश्या के स्तनों की समानता को धारण किये हुये, पचेलिमम् = पके हुये, मालूरफलम् = बेल के फल को, ददर्श = देखा ।

भावार्थ—राजा नल ने वायु द्वारा कम्पित पल्लवों के काटों से [अन्य-पक्ष में—वायु नामक देवता के सदृश विलासी विट (धूर्तनायक) के कण्टक-सदृश नखों से] क्षत (घायल), निकलते हुये चन्दन सदृश शोभन गन्ध से युक्त [अन्य पक्ष में—लिप्त हुये चन्दन सदृश श्रेष्ठ गन्ध से युक्त] वेश्या के स्तनों के सादृश्य को प्राप्त किये हुये एवं भलीभाँति पके हुये बेल के फल को देखा ।

अलङ्कार—उक्त श्लोक में "उपमा" अलङ्कार है ।

व्याकरण—पचेलिमम् = पच् + केलिमर् ["केलिमर उपसंख्यानम्" वार्तिक से] ।

समास—मरुल्ललत्पल्लवकण्टकैः=मरुता ललन्तः मरुल्ललन्तः मरुल्ललन्तः पल्लवाः इति मरुल्ललत्पल्लवाः (कर्मधारय), तेषां कण्टकाः इति (षष्ठी तत्पु०), तैः । **समुच्चलच्चन्दनसारसौरभम्** = समुच्चलत् चन्दनसारसौरभं यस्मिन् तत् (बहुव्रीहि) । **वारनारीकुचसञ्चितोपमम्** = वारनार्याः कुचौ इति वारनारी-कुचौ ताभ्यां संचिता उपमा यस्य तादृशम् ।

टिप्पणियाँ—**मरुल्ललत्पल्लवकण्टकैः** = वायु द्वारा हिलाये डुलाये जाते हुये पल्लवों के काँटों से । **क्षतम्** = क्षत-विक्षत, घायल । **समुच्चल-च्चन्दनसारसौरभम्** = जिसमें से चन्दन सदृश उत्तम गन्ध निकलकर चारों ओर व्याप्त हो रही थी । **वारनारीकुचसञ्चितोपमम्** = वेश्या के स्तनों के समान । "वारस्त्री गणिका वेश्या-इत्यमरः" । अच्छे कुल की स्त्रियों के स्तनों का नखक्षत आदि का प्रकट होना अनुचित माना गया है इसीलिए 'वार' विशेषण का प्रयोग हुआ है । **पचेलिमम्**=पकेहुये । **मालूरफलम्**=बेल के फल को । **ददर्श** = देखा ।

प्रसङ्ग—राजा नल पाटल के फूल के गुच्छे को कामदेव के वाणों का तूणीर समझकर भयभीत हो गये—

युवद्वयीचित्तनिमज्जनोचितप्रसूनशून्येतरगर्भगह्वरम् ।
स्मरेषुधीकृत्य धिया भियाऽन्धया स पाटलायाः स्तवकं प्रकम्पितः ।९५।

म०—युवेति । युवा च युवती च तयोर्यूनोर्द्वयी मिथुनं तस्याश्चित्तयोः कर्मणोर्निमज्जनेण्यन्ताल्लुट् उचितैः क्षमैः प्रसूनैः पुष्पवाणैः शून्येतरदशून्यं पूर्णं गर्भगह्वरं गर्भकुहरं यस्य तत् पाटलायाः पाटलवृक्षस्य स्तवकं कुसुमगुच्छभिम-यान्धया भयमूढया धिया भयजन्यभ्रान्त्येत्यर्थः । स्मरेषुधीकृत्य कामतूणीकृत्य तथा विभ्रम्यद्वृत्यर्थः, अत एव भयात् प्रकम्पितश्चकम्पे । अत्र पाटलस्तवके मदनतूणीरभ्रमात् भ्रान्तिमदलङ्कारः । 'कविसंमतसादृश्याद्विषये विहितात्मनि । आरोप्यमाणानुभवो यत्र स भ्रान्तिमान्मतः ॥' इति लक्षणात् ॥ ९५ ॥

अन्वय—सः युवद्वयीचित्तनिमज्जनोचितप्रसूनशून्येतरगर्भगह्वरं पाटलायाः स्तवकं भियान्धया धिया स्मरेषुधीकृत्य प्रकम्पितः ।

संस्कृत-व्याख्या—सः = नलः, युवद्वयीचित्तनिमज्जनोचितप्रसूनशून्येतर-गर्भगह्वरम् = युवा च युवति च तयोः यूनोः द्वयी मिथुनं तस्याः चित्तयोः अन्तः करणयोः निमज्जने उचितैः क्षमैः प्रसूनैः पुष्पवाणैः शून्येतरदशून्यं पूर्णं गर्भगह्वरं गर्भकुहरं यस्य तादृशम्, पाटलायाः = पाटलवृक्षस्य, स्तवकम् = कुसुमगुच्छम्, भियान्धया = भयमूढया, धिया = बुद्ध्या [भयजन्यभ्रान्त्या इत्यर्थः), स्मरेषु-धीकृत्य = कामतूणीरीकृत्य, प्रकम्पितः = चकम्पे ।

हिन्दी-अनुवाद—सः = वह राजा नल, युवद्वयीचित्तनिमज्जनोचित-प्रसूनशून्येतरगर्भगह्वरम् = युवक और युवतियों (दोनों के) के चित्तों को डुबाने में समर्थ पुष्पों से पूर्ण मध्यभागों वाले, पाटलायाः = पाटलवृक्ष के, स्तवकम् = फूल के गुच्छे को, भियान्धया = भय के कारण विमूढ़, धिया = बुद्धि से, स्मरेषुधीकृत्य = कामदेव का तरकस समझकर, प्रकम्पितः=काँप गये ।

भावार्थ—राजा नल ने पाटलवृक्ष के पुष्पों के गुच्छे को पुष्पों से परिपूर्ण देखकर यह समझा कि यह विरही युवक और युवतियों के हृदयों को वेधने वाले कामदेव के वाणों से भरा हुआ तरकस ही है। राजा नल स्वयं भी विरहावस्था में विद्यमान थे अतः उस पाटलपुष्प के गुच्छे को देखकर उनका भयभीत हो जाना स्वाभाविक ही था । भय के कारण उनकी विचारशक्ति

नष्ट हो गयी थी। इस कारण उन्होंने उस गुच्छे को बाणों से भरा हुआ कामदेव का तूणीर ही समझ लिया।

अलङ्कार—पाटलवृक्ष के पुष्पों के गुच्छे में कामदेव के बाणों से परिपूर्ण तूणीर का भ्रम होने से उक्त श्लोक में भ्रान्तिमान् अलङ्कार है।

व्याकरण—स्मरेषुधीकृत्य = स्मरेषुधी + च्वि, ईत्व + कृ + ल्यप्। प्रकम्पितः = प्र + कम्प् + क्त (कर्त्ता में)।

समास—युवद्वयीचित्तनिमज्जनोचितप्रसूनशून्येतरगर्भगह्वरम् = युवा च युवती च इति युवानौ ("पुमान स्त्रिया"—से एकशेप) तयोः द्वयी, तस्याः चित्ते (षष्ठी तत्पु०), तयोः निमज्जनम्, तस्मिन् उचितानि प्रसूनानि (कर्मधारय), तैः शून्येतरं गर्भगह्वरं यस्य सः (बहुव्रीहि), तम्। स्मरेषुधीकृत्य = स्मरस्य इषुधिः (षष्ठी तत्पु०), न स्मरेषुधिः अस्मरेषुधिः, अस्मरेषुधिं स्मरेषुधिं कृत्वा इति स्मरेषुधीकृत्य।

टिप्पणियाँ—युवद्वयीचित्तनिमज्जनोचितप्रसूनशून्येतरगर्भगह्वरम्= युवा और युवती दोनों के चित्तों को डुबा लेने में समर्थ पुष्पोंसे परिपूर्ण मध्य-भाग वाले। पाटलायाः = पाटला (पाढर) के। स्तवकम् = गुच्छे को। भियान्धया = भय के कारण अंधी (अज्ञानपूर्ण)। धिया = बुद्धि से। स्मरेषुधीकृत्य = कामदेव के बाणों से भरा हुआ तरकस समझकर। प्रकम्पितः = काँप गये।

प्रसङ्ग—राजा नल ने कृष्णवर्ण के पत्रों वाले अगस्त्य वृक्ष को राहु तथा उसके बीच दिखाई देने वाली कली को भक्षण के बाद पुनः राहु द्वारा उद्गमित चन्द्रकला समझा।

मुनिद्रुमः कोरकितः शितिद्युतिर्वनेऽमुनाऽमन्यत सिंहिकासुतः।
तमिस्रपक्षत्रुटिकूटभक्षितं कलाकलापं किल वैधवं वमन् ॥९६॥

म०—मुनीति। अमुना नलेन वने कोरकितः सञ्जातकोरकः पत्रेषु कृष्णच्छविः मुनिद्रुमोऽगस्त्यवृक्षः तमिस्रपक्षे त्रुटिकूटेन क्षयव्याजेन भक्षितम् भक्षितत्वे कुतः क्षय? इति भावः। अत्र कूटशब्देन क्षयोपह्नवेन भक्षणारोपादपह्नवभेदः। वैधवं चन्द्रसम्बन्धि 'विधुः शुभ्रांशुरि'त्यमरः। कलाकलापङ्कलासमूहं वमन्नुद्गिरन् सिंहिकासुतो राहुरमन्यत किल खलु? अत्र कोरकितशितद्युतित्वाभ्यां मुनिद्रुमस्येन्दुकलाकलापवमनविशिष्टराहुत्वोत्प्रेक्षा, सा चोक्तापह्नवोत्थापितेति सङ्करः॥ ९६॥

अन्वय—अमुना वने कोरकितः शितिद्युतिः मुनिद्रुमः तमिस्रपक्षत्रुटिकूट-भक्षितं वैधवं कलाकलापं वमन् सिंहिकासुतः अमन्यत किल ।

संस्कृत-व्याख्या—अमुना = नलेन, वने = विपिने, कोरकितः=मुकुलितः, शितिद्युतिः = शितिः कृष्णः द्युतिः छविः यस्य तादृशः, मुनिद्रुमः = अगस्त्यवृक्षः, तमिस्रपक्षत्रुटिकूटभक्षितम् = तमिस्रपक्षे अन्धकारपक्षे, त्रुटिकूटेन क्षयव्याजेन भक्षितम्, वैधवम् = चन्द्रसम्बन्धिनम्, कलाकलापम् = कलासमूहम्, वमन् = उद्गिरन्, सिंहिकासुतः = राहुः, अमन्यत = मेने, किल = खलु ।

हिन्दी-अनुवाद—अमुना=इस (राजा नल) ने, वने=वन में, कोरकितः= कलियों से युक्त, शितिद्युतिः = कृष्णवर्ण की कान्ति से युक्त, मुनिद्रुमः = अगस्त्य नामक वृक्ष को, तमिस्रपक्षत्रुटिकूटभक्षितम् = कृष्ण पक्ष में कलाओं के क्रमशः घटने के बहाने निगले गये हुये, वैधवम् = चन्द्रमा के, कलाकलापम् = कला-समूह को, वमन् = उगलता हुआ, सिंहिकासुतः = राहु ही, अमन्यत किल = समझा अथवा माना ।

भावार्थ—राजा नल ने वन में कलिकाओं से युक्त कृष्ण वर्ण वाले अगस्त्य के वृक्ष को कृष्ण पक्ष में चन्द्रमा की कलाओं के क्रमिक घटाव के बहाने से निगले हुये और तदनन्तर उसकी कलाओं को पुनः उगलते हुये राहु सदृश ही समझा । [अथवा—अन्धकार में छल पूर्वक खाये गये हुये पशु आदि को पुनः उगलते हुए सिंह के बच्चे के समान उस अगस्त्य के वृक्ष को राजा नल ने देखा] ।

राजा नल ने पहले यह सोचा कि यह राहु चन्द्रमा को निगल गया था अतएव इससे मुझे कोई सन्ताप नहीं होता है किन्तु अब यह पुनः चन्द्रमा को उगल रहा है और यह चन्द्रमा मुझे अब संतप्त करेगा—ऐसा सोचकर उन्होंने उस आगस्त्य के वृक्ष को राहु के सदृश ही माना ।

अलङ्कार—उक्त श्लोक में उत्प्रेक्षा, रूपक, अपह्नुति तथा श्लेष अलङ्कारों का संकर है ।

व्याकरण—कोरकितः = कोरक + इतच् । वैधवम् = विधु + अण् ।

समास—कोरकितः = कोरकः संजातः अस्मिन् इति कोरकितः । शिति-द्युतिः=शितिः द्युतिः यस्य सः (बहुव्रीहि) । **तमिस्रपक्षत्रुटिकूटभक्षितम्**= तमिस्रः पक्षः इति तमिस्रपक्षः (कर्मधारय) तस्मिन् त्रुटिः इति तमिस्रपक्ष-

त्रुटिः, सैव कूटम्, तेन भक्षितः इति तमिस्रपक्षत्रुटिकूटभक्षितः तम्। **वैधवम्** = विधोः अयं वैधवः तम्।

टिप्पणियाँ—कोरकितः = जिसमें कलियाँ लगी हुयी थीं अर्थात् कलियों से युक्त। **शितिद्युतिः** = कृष्ण वर्ण की कान्ति से युक्त। "शितीधवलमेचकौ"—इत्यमरः। **मुनिद्रुमः** = अगस्त्य नामक वृक्ष को। **तमिस्रपक्षत्रुटिकूट-भक्षितम्** = कृष्ण पक्ष में कलाओं के क्रमशः घटने के वहाने से खाये हुये अथवा निगल लिये गये हुये। कृष्ण पक्ष में चन्द्रमा की कलाओं का एक एक करके क्रमिक ह्रास होता चला जाया करता है। अतएव ऐसी कल्पना की जाती कि मानो चन्द्रमा की एक एक कला को राहु क्रम से ग्रस रहा हो और अमावस्या का एक दिन ऐसा आ जाता है कि जिस दिन पूर्ण रूप से राहु द्वारा चन्द्रमा ग्रस लिया जाता है अर्थात् राहु चन्द्रमा को निगल लेता है। **वैधवम्** = विधु अर्थात् चन्द्रमा सम्बन्धी अथवा चन्द्रमा की। **कलाकलापम्**= कला-समूह को। **वमन्** = उगलता हुआ। **सिंहिकासुतः** = राहु। राजा नल ने काले रंग की पत्तियों से युक्त अगस्त्य के वृक्ष को राहु समझा जिसमें श्वेत वर्ण की अर्द्धचन्द्राकार कलियाँ खिली हुयी थीं। वह वृक्ष उस समय राहु के सदृश प्रतीत हो रहा था तथा उसमें संलग्न श्वेत वर्ण की कलियाँ चन्द्रमा की श्वेत वर्ण की कलाओं के सदृश प्रतीत हो रही थीं। **अमन्यत** = माना, समझा।

प्रसङ्ग—राजा नल ने वायु द्वारा लता के साथ किया गया विलास एवं कुसुम के साथ की गयी क्रीड़ा को देखकर अपनी आँखें बन्द कर लीं—

पुरोहठाक्षिप्ततुषारपाण्डरच्छदावृतेर्वीरुधि बद्धविभ्रमाः।
मिलन्निमीलं विदधुर्विलोकिता नभस्वतस्तं कुसुमेषु केलयः ॥९७॥

म०—पुर इति। पुरोऽग्रेहठात् झटित्याक्षिप्ता आकृष्टातुषारेण हिमेन पाण्डराणां छदानां पत्राणां तुषारवत् पाण्डरस्य च्छदस्याच्छादकस्य वस्त्रस्य चावृतिरावरणं येन तस्य नभस्वतो वायोः वीरुधि लतायां बद्धाः अनुबद्धा विभ्रमा भ्रमणानि विलासाश्च यासान्ताः कुसुमेषु विषये केलयः क्रीडाः कुसुमेषु केलयः कामक्रीडाश्च विलोकिताः सत्यस्तं नृपं नलं मिलन्निमीलो मिलनं यस्य तं विदधुः निमीलिताक्षञ्चक्रुरित्यर्थः। विरहिणामुद्दीपकदर्शनस्य दुःसहदुःखहेतुत्वात् अन्यत्र ('नेक्षेतार्कं न नग्नां स्त्रीं न च संसृष्टमैथुनामि'ति निषेधादिति भावः।) अत्र प्रस्तुतनभस्वद्विशेषणसामर्थ्यादप्रस्तुतकामुकविरहप्रतीतेः समासोक्तिरलङ्कारः॥९७॥

अन्वय—पुरो हठाक्षिप्ततुषारपाण्डरच्छदावृतेः नभस्वतः वीरुधि बद्धविभ्रमाः कुसुमेषु केलयः विलोकिताः तं मिलन्निशीलं विदधुः ।

संस्कृत-व्याख्या—पुरः=अग्रे [पाठान्तरे पुरा=पूर्वम्], हठाक्षिप्ततुषारपाण्डरच्छदावृतेः=हठात् झटिति आक्षिप्ता आकृष्टा तुषारेण हिमेन पाण्डराणां धवलानां छदानां पत्राणां [पक्षे = तुषारवत् पाण्डरस्य धवलस्य छदस्य वस्त्रस्य] आवृतिः आवरणं येन तथाविधस्य, नभस्वतः=वायोः, वीरुधि = लतायाम्, बद्धविभ्रमाः= बद्धाः नद्धाः विभ्रमाः भ्रमणानि [पक्षे—विलासाः] यासां ताः, कुसुमेषु = पुष्पेषु, केलयः = क्रीडाः [पक्षे—कुसुमेषु केलयः = कामक्रीडाः], विलोकिताः = दृष्टाः [सत्यः], तम् = नलम्, मिलन्निमीलम् = कृतनेत्रसंकोचम्, विदधुः = चक्रुः ।

हिन्दी-अनुवाद—पुरः = सामने [पाठान्तर में पुरा = पहले], हठाक्षिप्ततुषारपाण्डरच्छदावृतेः = हठपूर्वक बर्फ के सदृश श्वेत वर्ण के पत्तों रूपी आवरण को हटाने वाली [नायक पक्ष में—तुषार के सदृश श्वेत वर्ण के वस्त्र के आवरण को हटाने वाले], नभस्वतः = वायु की, वीरुधि = लता में, बद्धविभ्रमः = भ्रमणों [नायक पक्ष में—विलासों] से युक्त, कुसुमेषु = पुष्पों के साथ की गयी, केलयः = क्रीडाओं [नायक पक्ष में—कामक्रीडाओं] ने, विलोकिताः = देखी जाने पर, तम् = उस नल को, मिलन्निमीलम् विदधुः = आँखो को बन्द कर दिया ।

भावार्थ—पहले हठपूर्वक बर्फ के सदृश श्वेत पत्रों रूप आवरण (वस्त्र) को हटाने वाली वायु की लताओं में विलास [अथवा विशिष्ट भ्रम अथवा पक्षियों का भ्रम] उत्पन्न करने वाली पुष्प विषयक क्रीडाओं [अथवा काम क्रीडाओं] ने राजा नल के नेत्रों को बन्द कर दिया अर्थात् उसे देखकर राजा नल ने अपने नेत्रों को बन्द कर लिया ।

अथवा अपने समक्ष बलपूर्वक हटाये गये तुषारसदृश श्वेत पत्रों वाली, वेरे की लताओं में विशिष्ट भ्रम [अथवा—पक्षियों का भ्रम] उत्पन्न करने वाली, वायु की पुष्पों के साथ की गयी क्रीडा [अथवा वायु द्वारा की गयी कामकीडा] ने राजा नल के नेत्रों को बन्द कर दिया ।

राजा नल ने वायु द्वारा लता के साथ किये गये विलास तथा पुष्पों के साथ की गयी क्रीडा को देखकर अपनी आँखें बन्द कर लीं क्योंकि विरही व्यक्ति [राजा नल] के लिये ये उद्दीपक थीं । दूसरी बात यह है कि धर्म-

शास्त्र [" ... संस्पृष्टमैथुनाम्"—इति याज्ञवल्क्यः] के अनुसार किसी की भी कामक्रीडा को देखना मना है। अतः स्त्रीरूपिणी लता के साथ पुरुष रूपी वायु की कामक्रीडा को देखकर मानों राजा नल ने अपने नेत्रों को वन्द कर लिया।

अलङ्कार—उक्त श्लोक में प्रस्तुत वायु के विशेषणों की सामर्थ्य से अप्रस्तुत कामुक-विरह की प्रतीति होने के कारण "समासोक्ति" अलङ्कार है।

समास—हठाक्षिप्ततुषारपाण्डरच्छदावृतेः=तुषारेण पाण्डरम् [तृतीया तत्पु०] इति तुषारपाण्डरम्, तुषारपाण्डरं छदम् (कर्मधारय) इति तुषार-पाण्डरच्छदम्, तस्य आवृतिः [षष्ठी तत्पु०] इति तुषारपाण्डरच्छदावृतिः। हठेन आक्षिप्ता तुषारपाण्डरच्छदावृतिः येन सः [बहुव्रीहि], तस्य। बद्धविभ्रमाः = बद्धाः विभ्रमाः भ्रमणानि [विलासाश्च] यासां ताः।

टिप्पणियाँ—पुरः = आगे—समक्ष । [पाठान्तर में—पुरा = पहले] हठाक्षिप्ततुषारपाण्डरच्छदावृतेः = जिस [वायु ने] तुषार के कारण श्वेतवर्ण के पत्तों के आवरण को वलपूर्वक हटा दिया था [नायक पक्ष में—जिसने तुषार के समान श्वेतवर्ण के वस्त्र के आवरण को जबरदस्ती हटा दिया था]। नभस्वतः = वायु की। वीरुधि = लता में। बद्धविभ्रमाः = वायु द्वारा की गयी क्रीडा के पक्ष में—जिनमें विशिष्ट भ्रमण किये गये हों। नायक द्वारा की गयी क्रीडा के पक्ष में—जिनमें विलास [अर्थात् विशिष्ट हाव-भाव, नखरे आदि] किये गये हों। कुसुमेषुकेलयः = वायुपक्ष में—फूलों के साथ की गयी क्रीडाओं। नायक-पक्ष में—[एक शब्द मानकर] काम सम्बन्धी क्रीडाओं। विलोकिताः = देखकर। मिलन्निमीलम् = जिसने अपने नेत्रों को बन्द कर लिया हो। विदधुः = किया अथवा कर लिया। पाठान्तर में—ससृजुः = कर लिया, किया।

प्रसङ्ग—फलों के भार से झुके हुये वृक्षों को देखकर राजा नल अत्यधिक प्रसन्न हुये—

गता यदुत्सङ्गतले विशालतां द्रुमाः शिरोभिः फलगौरवेण ताम्।
कथं न धात्रीमतिमात्रनामितैः स वन्दमानानभिनन्दतिस्म तान्? ॥९८॥

म०—गता इति। द्रुमा यस्या धात्र्या उत्सङ्गतले उपरि देशे च विशालतां विवृद्धिं गताः तां धात्रीम्भुवञ्च उपमातरं वा 'धात्री जनन्यामलकी वसुमत्युप-मातृष्वि'तिविश्वः। 'धा कर्मणि ष्ट्रन्नि'ति दधातेः ष्ट्रन् प्रत्ययः। फलगौरवेण फलभरेण

सुकृतातिशयेन च हेतुना अतिमात्रं नामितैः, प्रह्वीकृतैः नमेभिरत्वविकल्पादृभ्रस्वा-भावः। शिरोभिरग्रैः उत्तमाङ्गैश्च वन्दमानान् स्पृशतोऽभिवादयमानांश्च तान् प्रकृतान् द्रुमान् अत एव यच्छन्दानपेक्षी स नलः कथं नाभिनन्दति स्म अभिनन्दैवेत्यर्थः। वृक्षाणां क्षेत्रानुरूपफलस्य सम्पत्तिमपत्यानां च मातृभक्तिञ्च को नाम नाभिनन्दतीति भावः। अत्रापि विशेषणसामर्थ्यात् पुत्रप्रतीतेः समासोक्तिरलंकारः॥ ९८॥

अन्वय—द्रुमाः यदुत्सङ्गतले विशालतां गताः तां धात्रीं फलगौरवेण अतिमात्रनामितैः शिरोभिः वन्दमानान् तान् स कथं न अभिनन्दति स्म।

संस्कृत-व्याख्या—द्रुमाः = वृक्षाः, यदुत्सङ्गतले = यस्याः धात्र्याः उत्सङ्गतले = उपरिप्रदेशे अङ्के वा, विशालताम् = विवृद्धिम्, गताः = प्राप्ताः; ताम्, धात्रीम् = भुवम् उपमातरं वा, फलगौरवेण = फलभरेण फलाधिक्येन वा, अतिमात्रनामितैः = अतिमात्रं अतिशयेन नामितैः नम्रितैः, शिरोभिः = अग्रभागैः उत्तमाङ्गैश्च, वन्दमानान् = स्पृशतः, अभिवादयमानांश्च, तान् = प्रकृतान् द्रुमान् पुत्रांश्च, सः = नलः कथम् न, अभिनन्दति स्म = अस्तौषीत्—अभिननन्दैवेत्यर्थः। वृक्षाणां क्षेत्रानुरूपफलस्य सम्पत्तिम्, अपत्यानां च मातृभक्तिं च को नाभिनन्दतीति भावः।

हिन्दी-अनुवाद—द्रुमाः = वृक्ष, यदुत्सङ्गतले = जिस (पृथ्वी) की गोद में, विशालताम् = विशालता को, गताः = प्राप्त हुये; ताम् = उस, धात्रीम् = पृथ्वी की [अथवा पुत्रपक्ष में—पालनकर्त्री धाय की] फलगौरवेण = फलों के भार से [पुत्रपक्ष में—अतिशय पुण्य से], अतिमात्रनामितैः = अत्यधिक झुकाये हुये, शिरोभिः = अग्रभागों [पक्षान्तर में—मस्तकों] से, वन्दमानान् = वन्दना करते हुये, तान् = उन वृक्षों [अथवा-पुत्रों] का, स = वह नल, कथं न अभिनन्दति स्म = अभिनन्दन क्यों नहीं करते अर्थात् अवश्य करते।

भावार्थ—जिनका पालन पोषण पृथ्वी की गोद में हुआ था ऐसी अपनी माँ पृथ्वी को अपने फलों के आधिक्य से झुके हुये अग्रभागों से युक्त उन वृक्षों का राजा नल अभिनन्दन क्यों नहीं करते अर्थात् अवश्य ही अभिनन्दन करते।

संसार में भी—माता की गोद में पालपोषकर युवावस्था को प्राप्त हुये, विद्याध्ययन आदि के गौरव से अत्यन्त नतमस्तक हो अपनी माँ की वन्दना

करने वाले पुत्र को देखकर सज्जनपुरुष जिस भाँति उनका अभिनन्दन किया करते हैं उसी भाँति इस पृथ्वीतल पर वृद्धि को प्राप्त कर फलों के भार से अत्यन्त झुकी हुयी डालियों से युक्त वृक्षों का राजा नल ने अभिनन्दन किया।

अलङ्कार—इस श्लोक में भी विशेषण की सामर्थ्य से पुत्र की प्रतीति होने के कारण "समासोक्ति" अलङ्कार है।

व्याकरण—धात्रीम् = धा + ष्ट्रन् ["धा कर्मणि ष्ट्रन्" से] + ङीप्। नामितैः = नम् + णिच् + क्त = नामित (तृतीया बहुवचन में)।

समास—यदुत्सङ्गतले = यस्याः उत्सङ्गतले—इति। **धात्रीम्** = दधति याम् **अथवा** धयन्ति याम्—इति। **अतिमात्रनामितैः** = अतिमात्रं नामितानि अतिमात्रनामितानि तैः।

टिप्पणियाँ—यदुत्सङ्गतले = [पृथ्वी पक्ष में—] जिसके ऊपर के भाग में। [माता-पक्ष में—गोद में।] **विशालताम्** = विशालता को, वृद्धि को। पक्षान्तर में—युवावस्था को। **धात्रीम्** = पृथ्वी को, धाय को—उपमाता को। "धात्री स्यादुपमातापि क्षितिरप्यामलक्यपि"—इत्यमरः। **अतिमात्रनामितैः** = अत्यधिक झुके हुये—विनम्र हुये। **शिरोभिः** = अग्रभागों से (डालियों से), मस्तकों से। **वन्दमानान्** = वन्दना करते हुये—प्रणाम करते हुये।

प्रसङ्ग—वायु के कारण शीतलता आदि गुणों से युक्त दिन की धूप चाँदनी सदृश हो कर भी राजा नल को आनन्द नहीं दे सकी—

नृपाय तस्मै हिमितं वनानिलैः सुधीकृतं पुष्परसैरहर्महः।
विनिर्मितं केतकरेणुभिः सितं वियोगिनेऽधत्त न कौमुदी मुदः ॥९९॥

म०—अत्रातपस्य चन्द्रिकात्वनिरूपणाय तद्धर्मान् सम्पादयति-नृपायेति। वनानिलैः उद्यानवातैः हिमं शीतलं कृतं हिमितं, तत्करोतेर्ण्यन्तात् कर्मणि क्तः। पुष्परसैर्वनवातानीतैः मकरन्दैः सुधीकृतममृतीकृतं तथा केतकरेणुभिः सितं विनिर्मितं शुभ्रीकृतम् अह्नो महस्तेजः अहर्मह आतपः 'रोः सुपी'ति रेफादेशः। तदेव कौमुदीति व्यस्तरूपकं वियोगिने तस्मै नृपाय मुदः प्रमोदान् नाधत्त न कृतवती, प्रत्युतोद्दीपिकैवाभूदिति भावः ॥ ९९ ॥

अन्वय—वनानिलैः हिमितं पुष्परसैः सुधीकृतं केतकरेणुभिः सितं विनिर्मितं अहर्महः तस्मै वियोगिने नृपाय कौमुदी मुदः न अदत्त।

संस्कृत-व्याख्या—वनानिलैः = उद्यानवातैः, हिमितम् = शीतलीकृतम्,

पुष्परसैः = वनवातानीतैः मकरन्दैः, सुधीकृतम् = अमृतीकृतम्, केतकरेणुभिः = केतकीपुष्पपरागैः, सितम् = श्वेतम्, विनिर्मितम् = कृतम् [शुभ्रीकृतमित्यर्थः], अहर्महः = अह्नः दिवसस्य महः तेजः—आतपः–इत्यर्थः, तस्मै, वियोगिने = विरहिणे, नृपाय—राज्ञे नलाय, कौमुदीमुदः = चन्द्रिकाजनितान् प्रमोदान्, न अदत्त = न अददात्। प्रत्युत उद्दीपकमेवाभूदिति भावः।

हिन्दी-अनुवाद—वनानिलैः = उद्यान की वायु से, हिमितम् = शीतल, पुष्परसैः = पुष्पों के रस से, सुधीकृतम् = अमृत सदृश किया हुआ, केतकरेणुभिः = केतकी के पुष्पों के पराग से, सितम् = धवल, अहर्महः = दिन का तेज, तस्मै वियोगिने नृपाय = उस विरही राजा के लिये, कौमुदीमुदः = चन्द्रमा की चाँदनी के सदृश आनन्द को, न अदत्त = प्रदान न कर सका।

भावार्थ—वायु द्वारा शीतलता को प्राप्त कराया गया हुआ, पुष्पों के मधु से अमृत के सदृश बनाया गया हुआ तथा केतकी के पुष्पों के परागों से शुभ्रता को प्राप्त कराया गया हुआ भी दिन का तेज (धूप) उस विरही राजा नल के लिये चाँदनी सदृश आनन्द को नहीं दे सका।

यद्यपि उपर्युक्त तीनों कारणों से शीतल, अमृत युक्त एवं शुभ्रवर्ण होने के कारण दिन की धूप चन्द्रमा की चाँदनी के समान सुखद हो रही थी किन्तु फिर भी वह धूप उस विरही राजा नल के लिये सुखद न बन सकी क्योंकि विरही व्यक्तियों के लिये चाँदनी भी दुखद तथा उद्दीपक ही हुआ करती है।

अलङ्कार—टीकाकार मल्लिनाथ ने "अहर्महः एवं कौमुदी तस्मै वियोगिने नृपाय मुदः न अदत्त" रूप में टीका कर यह स्पष्ट किया है कि दिन की धूप रूपी चन्द्रिका ने उस वियोगी राजा को आनन्दित नहीं किया। अतः इस दृष्टि से यहाँ "व्यस्तरूपक" अलङ्कार बनता है। किन्तु हमारे द्वारा की गयी उपर्युक्त व्याख्या के आधार पर सभी सुखद कारणों से युक्त होने पर भी दिन की धूप राजा नल को सुख प्रदान रूपी कार्य की उत्पत्ति नहीं कर सकी—अतएव यहाँ "विशेषोक्ति" नामक अलङ्कार की मान्यता हो जाती है।

व्याकरण—हिमितम् = हिमं कृतं इति हिमितम्—हिम + णिच्—"तत्करोति तदाचष्टे" नामक वार्तिक से। तत्पश्चात् 'क्त' प्रत्यय होकर "हिमितम्" बनता है। **सुधीकृतम्** = सुधा + च्वि, ईत्व—कृ + क्त। **अहर्महः** = अह्नः महः इति अहर्महः—यहाँ "रोऽसुपि" सूत्र से अहन् के नकार के स्थान पर रेफादेश हो जाता है।

समास—हिमितम्=हिमं (शीतलं) कृतम् इति हिमितम् । अहर्महः = अह्नः महः इति अहर्महः (षष्ठी तत्पु०) ।

टिप्पणियाँ—वनानिलैः = उद्यान वायु के द्वारा । हिमितम् = शीतलता को प्राप्त कराया गया हुआ । पुष्परसैः = पुष्पों के मधु के द्वारा । सुधीकृतम् = अमृततुल्य बना दिया गया हुआ । अहर्महः = दिन का तेज (धूप) । कौमुदीमुदः = चाँदनी से प्राप्त होने वाले आह्लादक आनन्द को । न अदत्त—न दे सका ।

प्रसङ्ग—विरहावस्था में विद्यमान होने पर भी राजा नल का मुख चन्द्रमा की अपेक्षा कहीं अधिक सुन्दर प्रतीत हो रहा था—

वियोगभाजोऽपि नृपस्य पश्यता तदेव साक्षादमृतांशुमाननम् ।
पिकेन रोषारुणचक्षुषा मुहुः कुहूरुताहूयत चन्द्रवैरिणी ॥१००॥

म०—वियोगेति । वियोगभाजोऽपि वियोगिनोऽपि नृपस्य तदाननमेव साक्षादमृतांशुं प्रत्यक्षचन्द्रं पश्यता अत एव रोषादद्यापि चन्द्रतां न जहातीति क्रोधादिवारुणचक्षुषा पिकेन चन्द्रवैरिणी कुहूर्निजालाप एव कुहूर्नष्टचन्द्रकला अमावास्येति श्लिष्टरूपकं, 'कुहूः स्यात् कोकिलालापनष्टेन्दुकलयोरपी'ति विश्वः । मुहुराहूयत आहूता किमित्युत्प्रेक्षा पूर्वोक्तरूपकसापेक्षेति संकरः । अस्य चन्द्रस्येयमेव कुहूराह्वानीया स्यात् तत्कान्तिराहित्यसम्भवादिति भावः ॥१००॥

अन्वय—वियोगभाजः अपि नृपस्य तत् आननं साक्षात् अमृतांशुं एव पश्यता रोषारुणचक्षुषा पिकेन मुहुः कुहूरुता चन्द्रवैरिणी आहूयत ।

संस्कृत-व्याख्या—वियोगभाजः = वियोगिनः, अपि, नृपस्य = राज्ञः नलस्य, तत् = प्रसिद्धम्, आननम् = मुखम्, साक्षात् अमृतांशुम्=प्रत्यक्षचन्द्रम्, एव, पश्यता = अवलोकयता, रोषारुणचक्षुषा = रोषेण क्रोधेन अरुणे रक्ते चक्षुषी नेत्रे यस्य तथाविधेन, पिकेन = कोकिलेन, मुहुः = वारंवारम्, कुहूरुता= कुहूः इति रुत् शब्दो यस्य तेन अथवा कुहूः इति रुत् शब्दः तया, चन्द्रवैरिणी= चन्द्रस्य वैरिणी विरोधिनी—अमावस्या [अथवा—[कुहूः] + उत्—निश्चयेन चन्द्रवैरिणी चन्द्रस्य हिमांशोः वैरिणी विरोधिनी, कुहूः = अमावस्या], आहूयत = आहूता किम् ?

हिन्दी-अनुवाद—वियोगभाजः = विरहातुर होने पर, अपि=भी, नृपस्य= राजा नल का, तद् आननम् = उस मुखको, साक्षाद् अमृतांशुम् एव = प्रत्यक्ष-रूप से चन्द्रमा ही, पश्यता = [देखने वाली] समझने वाली, रोषारुणचक्षुषा=

क्रोध के कारण रक्तवर्ण की आँखों वाली, पिकेन = कोयल ने, मुहुः = बार-बार, कुहूरुता = "कुहू" कुहू" शब्द करके, चन्द्रवैरिणी = चन्द्रमा की शत्रु अमावस्या को, आहूयत = बुला लिया।

भावार्थ—विरहावस्था में विद्यमान होने पर भी राजा नल के मुख को प्रत्यक्षरूप से चन्द्रमा ही समझते हुये [राजा नल का मुख विरही होने पर भी मलिन नहीं हुआ अपितु चन्द्रमा के समान ही सुन्दर है ऐसा सोचकर] क्रोध के कारण लाल नेत्रों वाली तथा "कुहू" शब्द करने वाली कोयल ने चन्द्रमा की विरोधिनी ["कुहू" अर्थात् अदृष्ट चन्द्रकलावाली अमावस्या की तिथि] अमावस्या को ही बुला लिया [अथवा—निश्चित ही चन्द्रमा की विरोधिनी कुहू (अमावस्या) को बुला लिया।

अलङ्कार—कोयल की बोली का शब्द "कुहू" है। "कुहू" नाम अमावस्या का भी है "कुहूः स्यात् कोकिलालापनष्टेन्दुकलयोरपि" इति विश्वः"। अतः यहाँ यह संभावना की गयी है कि मानों कोयल अपने "कुहू-कुहू" शब्द के द्वारा अमावस्या का आह्वान कर रही हो। अतएव उक्त श्लोक में "उत्प्रेक्षा" अलङ्कार है॥ "कुहूरुताहूयत" में "सभङ्ग श्लेष" अलङ्कार भी है—(१) कुहूरुता आहूयत—(२) कुहूः (अमावस्या) उत आहूयत।

व्याकरण—वियोगभाक् = वियोग + भज् + ण्वि।

समास—वियोगभाजः = वियोगं भजते इति वियोगभाक् तस्य। **अमृतांशुम्** = अमृतमया अंशवो यस्य स अमृतांशुः (बहुव्रीहि) तम्। **रोषारुणचक्षुषा** = रोषेण अरुणी चक्षुषी यस्य स रोषारुणचक्षुः (बहुव्रीहि) तेन। **कुहूरुता** = कुहूः इति रुत् यस्य स (बहुव्रीहि), तेन अथवा—कुहूः एव रुत् (कर्मधारय),।

टिप्पणियाँ—वियोगभाजः = विरही होने पर अथवा वियोगी। **साक्षात्** = प्रत्यक्षरूप से। **अमृतांशुम्** = चन्द्रमा को। **रोषारुणचक्षुषा** = क्रोध के कारण रक्तवर्ण (लाल) के नेत्रों से युक्त। **कुहूरुता** = "कुहू-कुहू" शब्द करने वाली कोयल ने। अथवा—"कुहूः" इस शब्द के द्वारा। अथवा—"उत चन्द्रवैरिणी कुहूः आहूयत" इस प्रकार का अन्वय किये जाने पर—अर्थ होगा—"निश्चय ही चन्द्रमा की विरोधिनी अमावस्या को"। कोयल के नेत्र स्वाभाविकरूप से ही लाल हुआ करते हैं तथा वह "कुहू-कुहूः" शब्द भी किया करती है। **आहूयत** = बुला लिया अथवा बुलाया।

प्रसङ्ग—राजा नल ने अशोक वृक्ष को रक्षा करते हुये के सदृश माना—

अशोकमर्थान्वितनामताशया गतान् शरण्यं गृहशोचिनोऽध्वगान्।
अमन्यतावन्तमिवैष पल्लवैः प्रतीष्टकामज्वलदस्त्रजालकम् ॥ १०१ ॥

म०—अशोकमिति। एष नलः पल्लवैः प्रतीष्टानि प्रतिगृहीतानि संच्छन्नानि कामस्य ज्वलदस्त्राणि तद्रूपकाणि जालकानि छादकानि बालमुकुलगुच्छा येन तं पल्लवसंच्छन्नकुसुमरूपकामास्त्रमित्यर्थः। अन्यथा तद्दर्शनादेव ते म्रियेरन्निति भावः। अशोकमत एवार्थान्वितनामता नास्ति शोकोऽस्मिन्नित्यन्वर्थसंज्ञा तत्कृतया आशया अस्मानप्यशोकान् करिष्यतीत्यभिलाषेण शरणे रक्षणे साधु समर्थं शरण्यं मत्वेति शेषः। 'शरणं रक्षणे गृह' इति विश्वः, 'तत्र साधुरि'ति यत्प्रत्ययः। आगतान् शरणागतानित्यर्थः। गृहान् दारान् शोचन्तीति गृहशोचिनः गृहानुद्दिश्य शोचन्त इत्यर्थः। गृहः पत्न्यां गृहे स्मृत' इति विश्वः। अध्वगान् प्रोषितान् अवन्तमिव शरणागतरक्षणे महाफलस्मरणादन्यथा महादोषस्मरणाच्च रक्षन्तमिवेत्यर्थः। अमन्यत ज्ञातवान्। अस्त्रभीरूणां तद्गोपनमेव रक्षणाय इति भावः ॥ १०१ ॥

अन्वय—एषः पल्लवैः प्रतीष्टकामज्वलदस्त्रजालकं अशोकं अर्थान्वितनामताशया शरण्यं गतान् गृहशोचिनः अध्वगान् अवन्तमिव अमन्यत।

संस्कृत-व्याख्या—एषः = नलः, पल्लवैः, प्रतीष्टकामज्वलदस्त्रजालकम् = प्रतीष्टं स्वीकृतं कामस्यकन्दर्पस्य ज्वलत् आरक्तं अस्त्रजालकं अस्त्रसमूहः येन तथाविधम्, अशोकम् = अशोकवृक्षम्, अर्थान्वितनामताशया = अर्थेन 'यत्सेवया शोको न भवति' इत्येवं रूपेण अन्वितं अन्वर्थं नाम यस्य तस्य भावः अर्थान्वितनामता तस्यां आशया 'अस्मानपि अशोकान् करिष्यति' इत्यभिलापेण, शरण्यम् = शरणे रक्षणे साधुं समर्थम्, गतान् = प्राप्तान् [अथवा = आगतान् शरणागतानित्यर्थः], गृहशोचिनः = गृहान् दारान् शोचन्तीति गृहशोचिनः गृहानुद्दिश्य शोचन्त इत्यर्थः, अध्वगान् = प्रोपितान् पथिकान्, अवन्तमिव = रक्षन्तमिव, अमन्यत = ज्ञातवान्। अस्त्रभीरूणां तद्गोपनमेव रक्षणाय—इति भावः ॥

प्रसङ्ग—हे राजन्! मैं आपकी कृपा का पात्र हूँ। ऐसे कृपापात्र पक्षी पर अपने पराक्रम का प्रयोग करना आपके लिये सर्वथा अनुचित एवं निन्दनीय ही है—

पदे पदे सन्ति भटा रणोद्भटा न तेषु हिंसारस एष पूर्यते ?।
धिगीदृशन्ते नृपतेः कुविक्रमं कृपाश्रये यः कृपणे पतत्रिणि ॥१३२॥

स०—पदे पद इति। रणोद्भटाः रणेषु प्रचण्डाः भटा योधाः पदे-पदे सन्ति सर्वत्र सन्तीत्यर्थः, वीप्सायां द्विर्भावः। एष हिंसारसो हिंसारागस्तेषु भटेषु पूर्यते अत्र काकुः न पूर्यते किमित्यर्थः। नृपतेर्महाराजस्य ते तव ईदृशमवध्यवध-रूपं कुविक्रमं धिक् यः कुविक्रमः कृपाश्रये कृपाविषये अनुकम्पनीये कृपणे दीने पतत्रिणि क्रियत इति विशेषः॥ १३२॥

अन्वय—पदे पदे रणोद्भटाः भटाः सन्ति, एष हिंसारसः तेषु न पूर्यते। ते नृपतेः ईदृशं कुविक्रमं धिक्, यः कृपाश्रये कृपणे पतत्रिणि [दृश्यते]।

संस्कृत-व्याख्या—पदे-पदे = स्थाने-स्थाने, रणोद्भटाः = रणेषु युद्धेषु उद्भटाः प्रचण्डाः, भटाः = योद्धाः, सन्ति = विद्यन्ते। एषः, हिंसारसः = हिंसानु-रागः, तेषु = भटेषु, न पूर्यते = परिपूर्णो न भवति किम्? ते = तव, नृपतेः = राज्ञः, ईदृशम् = अवध्यवधरूपम्, कुविक्रमम् = कुत्सितं पौरुषम्, धिक्, यः = कुविक्रमः, कृपाश्रये = कृपाविषये—अनुकम्पनीये, कृपणे = दीने, [मयि] पतत्रिणि = पक्षिणि, दृश्यते।

हिन्दी-अनुवाद—पदे-पदे = स्थान-स्थान पर, रणोद्भटाः = रण में प्रचण्ड, भटाः = योद्धा, सन्ति = विद्यमान हैं। एष = यह, हिंसारसः = हिंसा प्रेम, [क्या] तेषु = उनमें, न पूर्यते = पूरा नहीं हो पाता है? ते नृपतेः = तुझ राजा के, ईदृशम् = इस प्रकार के [अवध्य प्राणी का वध कर देने वाले], कुविक्रमम् =

बुरे पराक्रम को, धिक् = धिक्कार है, यः = कि जो [बुरा पराक्रम], कृपाश्रये = कृपा के पात्र, कृपणे = दीन, [मुझ], पतत्रिणि = पक्षी पर, दृश्यते = दिखलाया जा रहा है।

भावार्थ—क्या पद-पद पर युद्ध में अत्यन्त पराक्रमी और वीर योद्धा नहीं है कि जिन पर तुम्हारा हिंसानुराग पूरा हो पाता। तुम्हारा यह हिंसानुराग नम्र प्राणियों [मुझ जैसे दीनों] पर पूरा हो रहा है। इससे ज्ञात होता है कि उन शूरवीरों के साथ युद्ध करने में असमर्थ होने के कारण तुम मुझ जैसे नतमस्तक दीनों पर अपनी हिंसा प्रवृत्ति को पूरा कर रहे हो जो कि तुम्हारे लिये नितान्त अनुचित है।

अलङ्कार—इस श्लोक में भी अनुप्रास की छटा स्पष्ट ही है।

समास—**रणोद्भटाः** = रणेषु, उद्भटाः रणोद्भटाः। **कुविक्रमम्** = कुत्सितं विक्रमम् इति कुविक्रमम्।

टिप्पणियाँ—**रणोद्भटाः** = युद्धों में उन्मत्त योद्धागण। **भटाः** = शूरवीर, योद्धा। **हिंसारसः** = हिंसा (मारना—हनन करना) के प्रति प्रेम। **ईदृशम्** = अवध्य प्राणी का वध करना जैसा। **कुविक्रमम्** = बुरा पराक्रम—निन्दनीय पराक्रम को। **कृपाश्रये** = कृपा करने के स्थान—दया किये जाने योग्य प्राणी पर। **पतत्रिणि** = पक्षी (हंस) पर।

प्रसङ्ग—जो राजा दुष्टों को दण्ड देता है और सज्जनों की रक्षा करता है वह प्रशंसनीय होता है। इसके विपरीत जो दण्ड का अनुचित प्रयोग करता है (जैसा कि आप मेरे साथ कर रहे हैं) वह स्वयं ही दण्ड का भागी बना करता है—

फलेन मूलेन च वारिभूरुहां मुनेरिवेत्थं मम यस्य वृत्तयः।
त्वयाद्य तस्मिन्नपि दण्डधारिणा कथं न पत्या धरणी हृणीयते ॥१३३॥

म०—फलेनेति। यस्य मम मुनेरिव वारिभूरुहां जलरुहां पद्मादीनाम् अन्यत्र वारिरुहां भूरुहाञ्च फलेन मूलेन चेत्थमनेन दृश्यमानप्रकारेण वृत्तयो जीविकाः तस्मिन् अपि अनपराधेऽपीति भावः। दण्डधारिणा दण्डकारिणा अदण्ड्यदण्डकेनेत्यर्थः। पत्या त्वया हेतुना अद्य धरणी कथं न हृणीयते जुगुप्सत एवेत्यर्थः, हृणीयते कण्ड्वादियगन्ताल्लट् तत्र हृणीङिति ङित्करणादात्मनेपदम्। अकार्यकारिणं भर्त्तारमपि हन्ते स्त्रिय इति भावः॥ १३३॥

अन्वय—यस्य मम मुनेः इव वारिभूरुहां फलेन मूलेन च इत्थं वृत्तयः, तस्मिन् अपि दण्डधारिणा त्वया पत्या अद्य धरणी कथं न ह्णीयते ?

संस्कृत व्याख्या—यस्य, मम = हंसस्य, मुनेः इव = ऋषेरिव, वारिभूरुहाम् = जलरुहां पद्मादीनाम् [अन्यत्र वारिरुहां भूरुहाञ्च], फलेन, मूलेन च = कन्दादिना मृणालेन च, इत्थम् = अनेन दृश्यमानप्रकारेण, वृत्तयः = जीविकाः तस्मिन् अपि = निरपराधेऽपि मयीत्यर्थः, दण्डधारिणा = दण्डकारिणा अदण्ड्य-दण्डकेनेत्यर्थः, त्वया = भवता, पत्या = स्वामिना, अद्य, धरणी = पृथ्वी, कथं न, ह्णीयते = जुगुप्सते एव—इत्यर्थः ।

हिन्दी अनुवाद—यस्य मम = जिस मेरी, मुनेः इव = मुनि के समान, वारिभूरुहाम् = कमलों के [मुनि पक्ष में—जल में उत्पन्न होने वाले कमल आदि तथा पृथ्वी पर उत्पन्न होने वाले आम्र आदि वृक्षों के], फलेन मूलेन च = फल तथा मूल (मृणाल, कन्द आदि) से, इत्थम = इस प्रकार, वृत्तयः = जीविका होती है, तस्मिन् अपि = उसको भी, दण्डधारिणा = दण्ड धारण करने वाले, त्वया पत्या = तुम्हारे जैसे स्वामी से, अद्य = इस समय, धरणी = पृथ्वी, कथं न = क्यों नहीं, ह्णीयते = लज्जित होती है ?

भावार्थ—[दण्ड देना राजा का धर्म है—इस सम्बन्ध में हंस कह रहा है—] जिसकी जीविका जल-भूमि में उत्पन्न कमलों के फल (कमल-गट्टा) तथा मूल (कमल-नाल की जड़) से [मुनिपक्ष में—जल में उत्पन्न होने वाले कमल आदि के तथा पृथ्वी पर उत्पन्न होने वाले आम्र आदि के फल तथा कन्द आदि से] होने के कारण मुनियों के सदृश है ऐसे कृपा के पात्र मुझ पर भी [अनुचित] दण्ड का प्रयोग करने वाले तुम्हारे जैसे पालकों अथवा रक्षकों से यह पृथ्वी लज्जित क्यों नहीं होती है ।

राजा का कर्तव्य है कि वह दुष्टों को दण्ड दे तथा सज्जनों की रक्षा करे किन्तु आप तो इस प्रकार के राजा हैं कि जो मुझ जैसे निरपराध को ही दण्डित कर रहे हैं । अतः आप पृथ्वी के अधिपति हैं वह पृथ्वी आप जैसे स्वामी को पाकर लज्जित क्यों नहीं होगी ? अर्थात् अवश्य होगी ।

अलङ्कार—इस श्लोक में 'उपमा' अलङ्कार है ।

व्याकरण—वारिभूरुहाम् = वारिभू + रुह् + क्विप् (षष्ठी विभक्ति के बहुवचन में) । ह्णीयते = ह्णी (कण्ड्वादि) + लट् ।

समास—वारिभूरुहाम् = वारि एव भूः (उत्पत्ति स्थानं) इति वारिभूः, तस्यां रोहन्ति (उत्पद्यन्ते) इति वारिभूरुहाः, तेषाम् ।

टिप्पणियाँ—**मुनेः इव** = मुनि के समान–जैसे वन में रहने वाले मुनि लोगों की जीविका फलों तथा कन्दों पर आधारित रहा करती है उसी प्रकार से मेरी जीविका का आधार भी कमलगट्टा तथा कमलमूल ही है। **वारिभूरुहाम्** = [हंस के पक्ष में—] कमलों के। [मुनिपक्ष में—] जल में उत्पन्न होने वाले कमल आदि तथा पृथ्वी पर उत्पन्न होने वाले आम्र आदि वृक्षों के फल। **वृत्तयः** = जीविका। **धरणी** = पृथ्वी। **ह्रणीयते**= लज्जित होती है।

प्रसङ्ग—राजा नल सुवर्णमय हंस को देखने से आश्चर्यान्वित, अपनी निन्दा सुनने के कारण लज्जित, तथा हंस के वचनों का श्रवण कर दया से युक्त हो रहे थे—

इतीदृशैस्तं विरचय्य वाङ्मयैः सचित्रवैलक्ष्यकृपं नृपं खगः।
दयासमुद्रे स तदाशयेऽतिथीचकार कारुण्यरसापगा गिरः ॥१३४॥

म०—इतीति। इतीत्थं खगो हंसस्तं नृपम् ईदृशैर्दोषालम्भैरित्यर्थः, वाङ्मयैर्वाग्विकारैः 'एकाचो नित्यं मयटमिच्छती'ति विकारार्थे मयट्प्रत्ययः। पक्षिकथनात् चित्रं, परैः स्वाकार्योद्घाटनादपत्रपा वैलक्ष्यं, परार्त्तिदर्शनेन तन्निवर्त्तनेच्छा वा कृपा, ताभिः सह वर्त्तत इति सचित्रवैलक्ष्यकृतं विरचय्य विधाय 'ल्यपि लघुपूर्वादि'त्ययादेशः। दयासमुद्रे तदाशये तच्चित्ते कारुण्यरसापगा करुणारसनदीः गिरः अतिथीचकार प्रवेशयामासेत्यर्थः समुद्रे नदीप्रवेशो युक्त इति भावः॥१३४॥

अन्वय—इति ईदृशैः वाङ्मयैः तं नृपं सचित्रवैलक्ष्यकृपं विरचय्य स खगः दयासमुद्रे तदाशये कारुण्यरसापगाः गिरः अतिथीचकार।

संस्कृत-व्याख्या—इति = इत्थम्, ईदृशैः = एतादृशैः, वाङ्मयैः = वचनैः, तम्, नृपम् = राजानम्, सचित्रवैलक्ष्यकृपम् = चित्रं च वैलक्ष्यं च कृपा च तत्सहितम्, विरचय्य = विधाय, सः, खगः = हंसः, दयासमुद्रे = दयासागरे, तदाशये = तस्य नलस्य आशये हृदये, कारुण्यरसापगाः = करुणारसनदीः, गिरः = वाचः, अतिथीचकार = प्रवेशयामास–इत्यर्थः।

हिन्दी-अनुवाद—इति = इस प्रकार, ईदृशैः = ऐसे, वाङ्मयैः = वचनों से, तं नृपम् = उस राजा नल को, सचित्रवैलक्ष्यकृपम् = आश्चर्यान्वित, लज्जित तथा दयापूर्ण, विरचय्य = बनाकर, स खगः = उस पक्षी हंस ने, दयासमुद्रे = दया के सागर, तदाशये = राजा नल के हृदय में, कारुण्यरसापगाः = करुण रस की नदी रूपी, गिरः = वाणी को, अतिथीचकार = प्रविष्ट करा दिया।

भावार्थ—उस पक्षी हंस ने इस प्रकार के अपने वचनों (१।१३० से १।१३३ तक) द्वारा राजा नल को अपने सुवर्णमय स्वरूप द्वारा आश्चर्यान्वित अपने द्वारा की जाती हुयी निन्दा से लज्जित तथा अपने दया भरे वचनों से कृपालु बनाकर दया के सागर राजा नल के हृदय में कारुण्यरूपी जल की नदीरूपिणी वाणी को प्रवाहित कराया अर्थात् समुद्र में जल से भरी हुयी नदियों के समान दयार्द्र राजा नल के हृदय में अपने करुणा भरे वचनों को प्रविष्ट कराया—राजा नल से दया भरे वचनों को कहने लगा।

अलङ्कार—उक्त श्लोक में 'रूपक' तथा 'अनुप्रास' अलङ्कार हैं।

व्याकरणः—**वाङ्मयैः**=वाच् + मयट्—"एकाचो नित्यं मयटमिच्छन्ति" से विकार अर्थ में। **विरचय्य** = वि + रच् + णिच्=ल्यप्—"ल्यपि लघुपूर्वात्" सूत्र से णिच् के इ को अयादेश। **कारुण्य** = करुण + ष्यञ्। **अतिथीचकार** = अतिथि + च्वि, दीर्घ, कृ + लिट्।

समास—**सचित्रवैलक्ष्यकृपम्** = चित्रं च वैलक्ष्यं च कृपा च इति (द्वन्द्व समास), तैः सहितः इति सचित्रवैलक्ष्यकृपः (बहुव्रीहि) तम्। **कारुण्यरसापगाः** = कारुण्यमेवरसः (कर्मधारय) इति कारुण्यरसः, तस्य आपगाः (षष्ठी तत्पु०)।

टिप्पणियाँ—**वाङ्मयैः** = वाणी के विकारों, वचनों द्वारा। **सचित्रवैलक्ष्यकृपम्** = आश्चर्य, लज्जा और कृपा से युक्त। **विरचय्य** = बनाकर। **तदाशये** = उस राजा नल के हृदय में। **कारुण्यरसापगाः** = कारुण्यरस (रूपी जल) की नदी। **गिरः** = वाणी को–वचनों को। **अतिथीचकार** = अतिथि बनाया अर्थात् प्रविष्ट करा दिया।

प्रसङ्ग—अब हंस अपने भाग्य को उलाहना देता हुआ कहता है।

मदेकपुत्रा जननी जरातुरा नवप्रसूतिर्वरटा तपस्विनी।
गतिस्तयोरेष जनस्तमर्दयन्नहो विधे! त्वां करुणा रुणद्धि नो॥१३५॥

म०—तावद्गिरः प्रपञ्चयति—मदित्यादिना। तत्र तावद् दैवमुपालभते हे विधे! जननी अहमेवैकः पुत्रो यस्याः मदेकपुत्रा मम नाशे तस्या गत्यन्तरं नास्तीत्यर्थः। जरातुरा स्वयमप्यसमर्थेत्यर्थः, वरटा स्वभार्य्या 'हंसस्य योषिद्वरटे'त्यमरः। नवप्रसूतिरचिरप्रसवा तपस्विनी शोच्या एव जनः स्वयमित्यर्थस्तयोर्जायाजनन्योर्गतिः शरणं तं जनं मामित्यर्थः, अर्दयन् पीडयन्

हे विधे ! विधाता ! त्वां करुणा नो रुणद्धि मत्पीडनान्न निवारयतीति काकुः, न रुणद्धि किमित्यर्थः ॥ १२५ ॥

अन्वय—अहो ! जननी, मदेकपुत्रा जरातुरा, तपस्विनी वरटा नवप्रसूतिः, एष जनः तयोः गतिः, तं अर्दयन् हे विधे ! त्वां करुणा न रुणद्धि ? (किम्) ।

संस्कृत व्याख्या—अहो ! कष्टसूचकमव्ययमेतत्, जननी = (मम) माता, मदेकपुत्रा = अहमेव एकः पुत्रो यस्याः सा मदेकपुत्रा, जरातुरा = वार्धक्यपीडिता [च]—स्वयमप्यसमर्था इत्यर्थः [तस्याः गत्यन्तरं नास्तीति भावः ।] तपस्विनी = पतिव्रता दीना वा, वरटा = मम भार्या, नवप्रसूतिः = अचिरप्रसवा [अथवा—वरटा = मम भार्या, नवप्रसूतिः = अचिरप्रसवा, अतएव, तपस्विनी शोच्या] । एष जनः = स्वयमित्यर्थः, तयोः=जायाजनन्योः, गतिः = शरणम्–वृत्युपायः वा; तम् = जनं–मामित्यर्थः, अर्दयन् = पीडयन्, हे विधे ! हे विधातः !, त्वाम्, करुणा = दया, न रुणद्धि मत्पीडनात् न निवारयति [किम्] ?

हिन्दी-अनुवाद—अहो ! = हाय, जननी = [मेरी] माता, मदेकपुत्रा = मैं ही हूँ एकमात्र पुत्र जिसका ऐसी है [तथा], जरातुराः = वृद्धावस्था से पीड़ित है । तपस्विनी = पतिव्रता अथवा दीन अथवा बेचारी, वरटा = मेरी पत्नी, नवप्रसूतिः = नव प्रसव वाली [अर्थात् उसके शीघ्र ही बच्चा होने वाला है ।] (अथवा—वरटा = मेरी पत्नी, नवप्रसूतिः = शीघ्र ही सन्तान उत्पन्न करने वाली है अतएव तपस्विनी = शोचनीय है ।) एषजनः = यह व्यक्ति अर्थात् मैं ही, तयोर्गतिः = उन दोनों [माता और पत्नी] का सहारा हूँ [उन दोनों की जीवन-रक्षा के निमित्त मैं ही एकमात्र सहारा हूँ], तम् = [ऐसे] उस (मुझ) को, अर्दयन् = सताते हुये—पीड़ित करते हुये, हे विधे ! = हे विधाता !, त्वाम् = तुमको—आपको, करुणा = दया, न रुणद्धि = [क्यों] नहीं रोकती है ।

भावार्थ—हे भाग्य ! मैं ही जिसका इकलौता पुत्र हूँ ऐसी बुढ़ापे से पीड़ित मेरी माता है । तथा नवीन प्रसव वाली एवं पतिव्रता (अथवा दीन–बेचारी) मेरी पत्नी है । उन दोनों [मेरी माता पत्नी] का मैं ही एकमात्र शरण अथवा जीविका चलाने वाला हूँ । उस मुझको मारते हुये क्या करुणा (दया) तुमको नहीं रोकती है ? यह बड़े दुःख की बात है ।

अलङ्कार—उक्त श्लोक में "परिकर" नामक अलङ्कार है।

समास—मदेकपुत्रा = अहमेव एकः पुत्रो यस्याः सा मदेकपुत्रा (बहुव्रीहि)। **नवप्रसूतिः** = नवाप्रसूतिः (कर्मधारय) इति नवप्रसूतिः ।

टिप्पणियाँ—मदेकपुत्रा = मैं ही हूँ एकमात्र पुत्र जिसका—इकलौते पुत्र वाली। **जरातुरा** = वृद्धावस्था से पीड़ित। **वरटा** = हंसी। "हंसस्य योषिद्वरटा" इत्यमरः। **नवप्रसूतिः** = नवप्रसूता अर्थात् जिसने शीघ्र ही बच्चे को जन्म दिया है। **तपस्विनी** = बेचारी, दीन, पतिव्रता। **अर्दयन्** = पीड़ित करते हुये, सताते हुये। **न रुणद्धि** = नहीं रोकती है।

प्रसङ्ग—हंस अपनी माँ को सम्बोधित करते हुये कह रहा है कि हे माता ! मेरी मृत्यु से तुमको जीवनपर्यन्त कष्ट सहन करना होगा—

मुहूर्त्तमात्रं भवनिन्दया दयासखाः सखायः स्रवदश्रवो मम ।
निवृत्तिमेष्यन्ति परं दुरुत्तरस्त्वयैव मातः ! सुतशोकसागरः ॥१३६॥

म०—अथ मातरं शोचयति-मुहूर्त्तेति । हे मातः ! सखायः सुहृदो दयासखाः सदयाः भवनिन्दया संसारगर्हणेन मुहूर्त्तमात्रं क्षणमात्रं स्रवदश्रवो गलिताश्रव एव सन्तो निवृत्तिं शोकोपरतिमेष्यन्ति, किन्तु त्वयैव सुतशोक एव सागरः परमत्यन्तः दुःखेनोत्तीर्य्यत इति दुरुत्तरो दुस्तरः तरतेः कृच्छ्रार्थे खल्प्रत्ययः ॥ १३६ ॥

अन्वय—हे मातः ! मम दयासखाः सखायः स्रवदश्रवः मुहूर्त्तमात्रं भवनिन्दया निवृत्तिं एष्यन्ति, परं त्वया एव सुतशोकसागरः दुरुत्तरः ।

संस्कृत-व्याख्या—हे मातः ! = हे जननि !, मम = मे, दयासखाः = दयालवः, सखायः = मित्राणि (अन्ये पक्षिणः), स्रवदश्रवः = स्रवन्ति गलन्ति अश्रूणि येषां तादृशाः, मुहूर्त्तमात्रम् = क्षणमात्रम्, भवनिन्दया = भवस्य संसारस्य निन्दया, निवृत्तिम् = शोकोपरतिम्, एष्यन्ति = प्राप्स्यन्ति । परम् = किन्तु, त्वया एव, सुतशोकसागरः = सुतशोकः पुत्रशोकः एव सागरः समुद्रः, दुरुत्तरः = दुस्तरः [दुःखेनापि तरितुं योग्यः न भविष्यति—इति भावः। अथवा दुःखेन एव तरितुं योग्यः भविष्यति ।]।

हिन्दी-अनुवाद—हे मातः = हे माता !, मम = मेरे, दयासखाः = दयालु, सखाः = मित्र, स्रवदश्रवः = अश्रुधारा बहाते हुये, मुहूर्त्तमात्रम् = क्षण भर के लिये, भवनिन्दया = "यह संसार अनित्य है, जीवन क्षणभंगुर है" इत्यादि रूप से संसार की निन्दा करके, निवृत्तिम् = शान्ति को अथवा दुखःविस्मृति

को, एष्यन्ति = प्राप्त कर लेंगे। परम् = किन्तु, त्वयाएव = केवल तुम्हारे द्वारा ही, सुतशोकसागरः = पुत्रशोकरूपी समुद्र, दुरुत्तरः = पार करना कठिन होगा।

भावार्थ—अश्रुधारा बहाते हुये तथा दयालु मेरे मित्र थोड़े समय तक संसार की (यह संसार अनित्य है, क्षणभंगुर है, यहाँ जन्म लेने के पश्चात् अन्त में सबकी यही गति (मृत्यु) होती है, काल किसी को नहीं छोड़ता—इत्यादि रूप से) की निन्दा कर दुःख को भूल जावेंगे। किन्तु हे माता ! पुत्र का शोकसागर तुम्हारे लिये ही दुःख से पार करने योग्य होगा। तात्पर्य यह है कि मेरी मृत्यु से मेरे मित्रों को तो थोड़ी सी देर के लिये ही कष्ट होगा किन्तु तुमको जीवन-पर्यन्त कष्ट सहन करना होगा।

अलङ्कार—इस श्लोक में "अनुप्रास" अलङ्कार है। "सुतशोकसागरः" में रूपक भी है।

व्याकरण—**मुहूर्त्तमात्रम्** = यहाँ पर "कालाध्वनोऽत्यन्तसंयोगे" सूत्र में वर्णित नियम के आधार पर द्वितीया विभक्ति हुयी है। **दुरुत्तरः** = दुर + उद् + तॄ + खल्।

समास—**दयासखाः** = दयायाः सखायः इति दयासखाः (षष्ठी तत्पु०)। "यहाँ पर 'राजाहः सखिभ्यष्टच्' से समासान्त 'टच्' प्रत्यय हुआ है। **स्रवदश्रवः** = स्रवन्ति अश्रूणि येषां ते (बहुव्रीहि)—स्रवदश्रवः।

टिप्पणियाँ—**दयासखाः** = दया के मित्र अर्थात् दयालु। **सखायः** = मित्र। **स्रवदश्रवः** = अश्रुधारा बहाते हुये। **मुहूर्त्तमात्रम्** = क्षणभर के लिये। थोड़ी सी देर के लिए। **भवनिन्दया** = संसार की निन्दा द्वारा (संसार की अनित्यता—नश्वरता–क्षणभंगुरता आदि दोषों को कहते हुये)। **निवृत्तिम्** = शोक से शान्ति को अथवा दुःख निवृत्ति को। **एष्यन्ति** = प्राप्त कर लेंगे। **परम्** = किन्तु। **सुतशोकसागरः** = पुत्र शोक रूपी सागर को। **दुरुत्तरः** = दुःख (महान कष्ट) के साथ पार करने योग्य।

प्रसङ्ग—अब वह हंस अपनी पत्नी को लक्षित कर विलाप करता हुआ कहता है—

मदर्थसन्देशमृणालमन्थरः प्रियः कियद्दूर इति त्वयोदिते।
विलोकयन्त्या रुदतोऽथ पक्षिणः प्रिये! स कीदृग्भविता तव क्षणः ॥१३७॥

म०—अथ भार्यामुद्दिश्य विलपति—मदर्थेत्यादिनः। हे प्रिये ! मह्यमिमे मदर्थे 'अर्थेन सह नित्य समासो विशेष्यलिङ्गता चेति वक्तव्यम्' तयोः सन्देश-

मृणालयोः वाचिकबिसयोः मन्थरस्तत्प्रेषणे विलम्बितप्रवृत्तिः प्रियः कियद्दूरे वर्त्तत इति त्वया उदिते उक्ते पृष्टे सतीत्यर्थः। अथ प्रश्नानन्तरं रुदतः अनिष्टोच्चारणाशक्त्या अश्रूणि विमुञ्चतः पक्षिणः इतो गच्छतो गतान्विलोकयन्त्यास्तव स क्षणः स कालः कीदृग्भविता भविष्यति ? वज्रपातप्राय इति भावः। कर्त्तरि लुट् ॥ १३७ ॥

अन्वय—प्रिये ! मदर्थसन्देशमृणालमन्थरः प्रियः कियद्दूरे इति त्वया उदिते, अथ रुदतः पक्षिणः विलोकयन्त्याः तव स क्षणः कीदृक् भविता।

संस्कृत-व्याख्या—हे प्रिये ! = हे वल्लभे !, मदर्थसन्देशमृणालमन्थरः = मह्यं इमे मदर्थे ये सन्देशमृणाले—तयोः सन्देशमृणालयोः वाचिकबिसयोः विषये मन्थरः अलसः [तत्प्रेषणे विलम्बितप्रवृत्तिः वा], प्रियः = वल्लभः, कियद्दूरे = कियति दूरे देशे वर्त्तते, इति, त्वया, उदिते = उक्ते—पृष्ठे सतीत्यर्थः, अथ = प्रश्नानन्तरम्, रुदतः = अनिष्टोच्चारणाशक्त्या अश्रूणि विमुञ्चतः, पक्षिणः = खगान्, विलोकयन्त्याः = पश्यन्त्याः, तव = ते, सः, क्षणः = कालः, कीदृक् = कीदृशः, भविता = भविष्यति ? वज्रपातप्राय—इतिभावः।

हिन्दी-अनुवाद—हे प्रिये !, मदर्थसन्देशमृणालमन्थरः=मेरे लिये सन्देश तथा मृणाल (भेजने) के विषय में देर करने वाला—अथवा सुस्त, मेरा, प्रियः = प्रिय, कियद्दूरे = कितनी दूर रह गया है ? इति = इस प्रकार से, त्वया उदिते = तेरे द्वारा कहे जाने के, अथ = पश्चात, रुदतः रोते हुये, पक्षिणः= पक्षिओं को, विलोकयन्त्याः = देखती हुयी, तव = तुम्हारा, स क्षणः = वह क्षण, कीदृक् = कैसा, भविता = होगा ?

भावार्थ—हे प्रिये ! वन से वापिस लौटे हुये अन्य पक्षिओं से जब तुम यह पूछोगी कि मेरे लिये संदेश भेजने अथवा मृणाल लाने वाला मेरा प्रिय (हंस) कितनी दूर रह गया है ? तव वे पक्षी मुझ (हंस) के पकड़े जाने की बात मुख से न निकालेंगे तथा उनकी आँखों से अश्रुधारा प्रवाहित होने लगेगी। यह देखकर हे प्रिये ! तुम्हारी दशा क्या होगी ? तुम किसी अनिष्ट को समझकर वज्राहत सी हो जाओगी।

अलङ्कार—उक्त श्लोक में "भावोदय" नामक अलङ्कार है।

समास—मदर्थसन्देशमृणालमन्थरः = सन्देशं च मृणालं च इति सन्देशमृणाले (द्वन्द्व), मह्यं इमे मदर्थे (चतुर्थी तत्पु०), मदर्थे ये संदेशमृणाले तयोः मन्थरः (सप्तमी तत्पु०) इति मदर्थसन्देशमृणालमन्थरः।

टिप्पणियाँ—मदर्थसन्देशमृणालमन्थरः = मेरे लिये सन्देश भिजवाने तथा मृणालदण्ड को भेजने में देर करने वाला। **उदिते** = कहे जाने पर। **कीदृक्** = कैसा—किस प्रकार का ? **भविता** = होगा।

प्रसङ्ग—हंस को इस बात का आश्चर्य है कि ब्रह्मा ने अपने जिन कमल-सदृश सुकोमल हाथों से उसकी प्रिया (हंसी) के शरीर का निर्माण किया था उन्हीं हाथों से उसके ललाट पर ऐसे कठोर अक्षर कैसे लिख दिये—कि तू अपनी प्रिया से वियुक्त हो जायेगा—

कथं विधातर्मयि पाणिपङ्कजात्तव प्रियाशैत्यमृदुत्वशिल्पिनः।
वियोक्ष्यसे वल्लभयेति निर्गता लिपिर्ललाटन्तपनिष्ठुराक्षरा॥१३८॥

म०—कथमिति। हे विधातः! प्रियायाः वरटायाः शैत्यमृदुत्वशिल्पिनस्तादृक् तदङ्गशैत्यमार्दवनिर्म्माणकात्तव पाणिपङ्कजात्पङ्कजमृदुशिशिरात् पाणेरित्यर्थः। मयि विषये वल्लभया सह वियोक्ष्यसे इत्येवंरूपा अतएव ललाटं तपन्ति दहन्तीति ललाटन्तपानि 'असूर्य्यललाटयोर्दृशितपोरि'ति खश् प्रत्ययः, 'अरुर्द्विषदि'त्यादिना मुमागमः तानि निष्ठुराणि कर्णकठोराणि चाक्षराणि यस्याः सा लिपिरक्षरविन्यासः कथं निर्गता निःसृता ? अत्र कारणात् विरुद्धकार्य्योत्पत्तिकथनाद्विषमालङ्कारभेदः 'विरुद्धकार्यस्योत्पत्तिर्यत्रानर्थस्य भावयेत्। विरूपघटना वा स्याद्विषमालंकृतिर्मते' ति ॥ १३८ ॥

अन्वय—हे विधातः ! प्रियाशैत्यमृदुत्वशिल्पिनः तव पाणिपङ्कजात् मयि 'वल्लभया वियोक्ष्यसे' इति ललाटन्तपनिष्ठुराक्षरा लिपिः कथं निर्गता ?

संस्कृत-व्याख्या—हे विधातः ! = हे ब्रह्मन् !, प्रियाशैत्यमृदुत्वशिल्पिनः = प्रियायाः वरटायाः शैत्यमृदुत्वशिल्पिनः—तादृक्तदङ्गशैत्यमार्दवनिर्माणकुशलात्, तव = ते, पाणिपङ्कजात् = कमलसदृशमृदुशिशिरात् पाणेः, मयि = मद्विषये, 'वल्लभया = दयितया, वियोक्ष्यसे = वियोगं प्राप्स्यसि' इति = एवंरूपा, ललाटन्तपनिष्ठुराक्षरा = ललाटं तपन्ति दहन्ति—इति ललाटन्तपानि तानि निष्ठुराणि कर्णकठोराणि च अक्षराणि यस्या सा, लिपिः = अक्षरविन्यासः, कथम् = केन प्रकारेण, निर्गता = निसृता ?

हिन्दी-अनुवाद—हे विधातः ! = हे ब्रह्मन् !, प्रियाशैत्यमृदुत्वशिल्पिनः = मेरी प्रिया (के शरीर) की शीतलता और कोमलता के निर्माण करने वाले, तव = तुम्हारे (आपके), पाणिपङ्कजात् = कमलसदृश हाथों से, मयि = मेरे विषय में (मेरे मस्तक पर) "वल्लभया वियोक्ष्यसे" = तुम प्रिया से वियुक्त

होओगे,' इति = इस प्रकार की, ललाटन्तपनिष्ठुराक्षरा = मस्तक को संतप्त करने वाले कठोर अक्षरों से युक्त, लिपिः = लिपि, कथम् = कैसे, निर्गता = निकली (अथवा मस्तक पर अंकित की गयी)।

भावार्थ—हंस आश्चर्य प्रकट करता हुआ कहता है कि ब्रह्मा ने अपने जिन कमलसदृश शीतल तथा कोमल हाथों से उसकी प्रिया (हंसी) के कोमल अङ्गों का निर्माण किया था उन्हीं हाथों से उसके मस्तक पर ऐसे कठोर अक्षरों को कैसे लिख दिया कि "तू अपनी प्रिया (हंसी) से वियुक्त हो जायेगा" ? कोमल हाथों से कोमल अक्षरों को ही लिखा जाना उचित था न कि कठोर।

अलङ्कार—उक्त श्लोक में कारण के विरुद्ध कार्य की उत्पत्ति का कथन किये जाने से "विषम" नामक अलङ्कार है। लक्षण—"विरुद्धकार्यस्योत्पत्ति-र्यत्रानर्थस्य वा भवेत्। विरूपघटना वा स्याद्विषमालंकृतिर्मता"। इसके अतिरिक्त रूपक अलङ्कार भी है जो कि स्पष्ट ही है।

व्याकरण—**ललाटन्तप** = ललाट + तप् + खश् "असुर्यललाटयोर्दृशि-तपोः" से। तदनन्तर "अरुर्द्विषदजन्तस्य मुम्" से 'मुम्' का आगम।

समास—**प्रियाशैत्यमृदुत्वशिल्पिनः** = शैत्यं च मृदुत्वं च इति शैत्य-मृदुत्वे (द्वन्द्व), प्रियायाः शैत्यमृदुत्वे, तयोः शिल्पी (षष्ठी तत्पु०) इति प्रियाशैत्यमृदुत्वशिल्पी तस्य। **पाणिपङ्कजात्** = पाणिः पङ्कजमिव इति पाणि-पङ्कजम् (उपमित समास), तस्मात्। **ललाटन्तपनिष्ठुराक्षरा** = ललाटं तपन्ति इति ललाटन्तपानि, ललाटन्तपानि निष्ठुराणि (कर्मधारय), ललाटन्तपनिष्ठु-राणि अक्षराणि यस्याःसा (बहुव्रीहि)।

टिप्पणियाँ—**प्रियाशैत्यमृदुत्वशिल्पिनः** = प्रिया (हंसी) के शीतल एवं कोमल अङ्गों के रचयिता। **पाणिपङ्कजात्** = कमलसदृश हाथों से। **वियोक्ष्यसे** = वियुक्त (पृथक्) होओगे। **ललाटन्तपनिष्ठुराक्षरा** = मस्तक को सन्तप्त करने वाले अथवा मस्तक में सन्ताप को उत्पन्न करने वाले अत्यन्त कठोर अक्षरों से युक्त। **निर्गता** = निकली अथवा लिख दी गयी।

प्रसङ्ग—अपने झुण्ड वाले हंसों से मेरी मृत्यु का समाचार जानकर हे प्रिये ! तुम दशों दिशाओं को सूना ही देखोगी —

अपि स्वयूथ्यैरशनिक्षतोपमं ममाद्य वृत्तान्तमिमं बतोदिता।
मुखानि लोलाक्षि ? दिशामसंशयं दशापि शून्यानि विलोकयिष्यसि॥

म०—अपीति। अपि सत्यपैरथः। अद्यास्मिन् दिने 'सद्यःपरुदि, त्यादिना

निपातः स्वयूथ्यैः स्वसङ्गचरैर्हंसैः कर्तृभिरशनिक्षतोपमं वज्रप्रहारप्रायं ममेमं वृत्तान्तम् अनर्थवार्त्ता उदिता उक्ता सती वदेर्ब्रूञर्थस्य दुहादित्वादप्रधाने कर्मणि क्तः 'वचिस्वपीत्यादिना सम्प्रसारणं, हे लोलाक्षि ? दशदिशां मुखानि शून्यान्यलक्ष्याकाराणि विलोकयिष्यसि असंशयं सन्देहो नास्तीत्यर्थः। अर्थाभावेऽव्ययीभावः, बतेति खेदे ॥ १३९ ॥

अन्वय—अपि लोलाक्षि ! अद्य स्वयूथ्यैः अशनिक्षतोपमं मम इमं वृत्तान्तं उदिता, बत असंशयं दिशां दशापि मुखानि शून्यानि विलोकयिष्यसि ।

संस्कृत-व्याख्या—अपि = चेत्यपेरर्थः, लोलाक्षि ! = चञ्चलनेत्रे, अद्य = अस्मिन् दिने, स्वयूथ्यैः = स्वसङ्गचरैः, हंसैः, अशनिक्षतोपमम् = वज्रप्रहार-सदृशम्, मम = मे, इमम् = मरणरूपम्, वृत्तान्तम् = अनर्थ वार्त्ताम्, उदिता = कथिता, बत् = इति खेदे, असंशयम् = निःसन्देहम्, दिशाम् = ककुभम्, दश अपि, मुखानि, शून्यानि = रिक्तानि, विलोकयिष्यसि = अवलोकयिष्यसि ।

हिन्दी अनुवाद—हे लोलाक्षि ! हे चंचल नेत्रों वाली, अद्य = आज, स्वयूथ्यैः = अपने झुंड के हंसों द्वारा, अशनिक्षतोपमम् = वज्रप्रहार के समान, मम = मेरे, इमं वृतान्तम् = इस (मरणरूप) वृतान्त के, उदिता = कहे जाने पर, बत = हाय, असंशयम् = निःसन्देहरूप से, दिशां दश अपि = दशों दिशाओं के, मुखानि = मुखों को, शून्यानि = शून्य, विलोकयिष्यसि = देखोगी ।

भावार्थ—और, हे चंचल नेत्रोंवाली प्रिये ! (हंसी) आज अपने झुंड में रहने वाले हंसों के द्वारा वज्रप्रहार सदृश मेरे इस वृतान्त (मरण-समाचार) को कहे जाने पर खेद है कि तुम दशों दिशाओं को शून्य देखोगी ।

अलङ्कार—उक्त श्लोक में अनुप्रास तथा उपमा अलंकार हैं ।

व्याकरण—यूथ्याः = यूथ् + यत् । उदिता = वद् + क्त (कर्म में) । वद् धातु द्विकर्मक है । इसके गौणकर्म में 'क्त' प्रत्यय होता है । इसी कारण प्रधान कर्म 'वृतान्तम्' में द्वितीया विभक्ति प्रयुक्त हुयी है ।

समास—लोलाक्षि=लोले अक्षिणी यस्याः सा (बहुव्रीहि) स्वयूथ्यैः—यूथे भवः यूथ्याः, स्वस्य यूथ्याः स्वयूथ्याः तै । अशनिक्षतोपमम् = अशनेः क्षतम् इति अशनिक्षतम् तदेव उपमा यस्य स अशनिक्षतोपमः (बहुव्रीहि) तम् ।

टिप्पणियाँ—लोलाक्षि = चंचल नेत्रों वाली । स्वयूथ्यैः = अपने झुंड के पक्षियों के द्वारा । अशनिक्षतोपमम् = वज्र के प्रहार के सदृश । उदिता =

कही जाने पर। **बत्** = खेदवाचक अव्यय है। **असंशयम्** = निःसन्देह। **शून्यानि** = शून्य, रिक्त। **विलोकयिष्यसि** = देखोगी।

प्रसङ्ग—हंस पुनः कहता है—हे प्रिये! मेरे न होने पर तुम बच्चों का पालन पोषण कर सकती हो। किन्तु यदि मेरे वियोग में तुमने भी प्राण-त्याग दिये तो बच्चों की निश्चित ही मृत्यु हो जायेगी—

ममैव शोकेन विदीर्णवक्षसा त्वयाऽपि चित्राङ्गि ? विपद्यते यदि।
तदस्मि दैवेन हतोऽपि हा हतः स्फुटं यतस्ते शिशवः परासवः ॥१४०॥

म०—ममैवेति। हे चित्राङ्गि ? लोहितचञ्चुचरणत्वाद्विचिगात्रे ? मम शोकेनैव मद्विपत्तिदुःखेनैव विदीर्णवक्षसा विदलितहृदा त्वया विपद्यते म्रियत्ते यदि तर्त्तहि दैवेन हतः स्फुटं व्यक्तं पुनर्हतोऽस्मि हेति विषादे, 'हा विस्मयविषादयोरि'ति विश्वः। कुतः ? यतः ते शिशवः परासवो मातुरप्यभावे पोषकाभावान्मृताः, अतः शिशुमरणभावनया द्विगुणितं मे मरणदुःखं प्राप्तमित्यर्थः ॥ १४० ॥

अन्वय—हे चित्राङ्गि! यदि मम एव शोकेन विदीर्णवक्षसा त्वया विपद्यते, तत्, हा, दैवेन हतः अपि हतः अस्मि, यतः ते शिशवः स्फुटं परासवः।

संस्कृत-व्याख्या—हे चित्राङ्गि = (लोहितचञ्चुचरणत्वात्) हे विचित्रगात्रे, ! 'विचित्राङ्गि' इत्यपि पाठो लभ्यते। यदि = चेत्, मम एव शोकेन = मद्विपत्तिदुःखेनैव, विदीर्णवक्षसा = विदीर्णहृदया, त्वया, विपद्यते = म्रियते, तत् = तर्हि, हा = इति विषादे, दैवेन = भाग्येन, हतः = मारितः, अपि, हता अस्मि, यतः, ते = तव, शिशवः = बालकाः, स्फुटम् = व्यक्तम्, परासवः = मातुः अपि अभावे पोषकाभावात् मृताः; अतः शिशुमरणभावनया द्विगुणितं मे मरणदुःखं प्राप्तम्—इति भावः।

हिन्दी-अनुवाद—हे चित्राङ्गि = हे विचित्र (नाना प्रकार के सुन्दर अंगों से युक्त) शरीर वाली ! यदि = अगर, मम एव शोकेन = मेरे ही शोक के कारण, विदीर्णवक्षसा = विदीर्णहृदयवाली, त्वया = तुम, अपि=भी, विपद्यते = मृत्यु को प्राप्त हो जाती हो, तत् = तो, हा = हाय, दैवेन = भाग्य से, हतः = मारागया हुआ मैं (फिर दुबारा), हतः अस्मि = मारा जाऊँगा; यतः= क्योंकि, ते शिशवः = तुम्हारे बच्चे, स्फुटम् = व्यक्त रूप से ही अर्थात् निश्चित रूप से, परासवः = (तुम्हारे द्वारा किये जाने वाले पालन-पोषण को न पाकर) निष्प्राण हो जावेंगे अथवा मर जावेंगे। अतः बच्चों के भी मरे जाने के कारण मेरा कष्ट दुगुना हो जायगा।

भावार्थ—हंस पुनः सोचता है कि उसके वियोग के कारण उसकी पत्नी निश्चित ही अपने प्राण त्याग देगी। और फिर माता-पिता दोनों के ही अभाव के कारण जब उसके बच्चों का पालन-पोषण करने वाला कोई भी नहीं रह जायगा तो वे बच्चे भी मृत्यु के ग्रास बन जावेंगे अथवा मर जावेंगे। इस भाँति उस हंस के मर जाने पर उसका वंश ही समाप्त हो जावेगा। यह सोचकर उस हंसका दुःख दूना (द्विगुणता को प्राप्त) हो रहा था।

अलङ्कार—इस श्लोक में "काव्यलिङ्ग' अलङ्कार की प्रतीति है। लक्षण—"स्यात्काव्यलिङ्गं वागर्थो नूतनार्थसमर्थकः।"

समास—विदीर्णवक्षसा = विदीर्णः वक्षः यस्याः सा (बहुव्रीहि) विदीर्णवक्षा तया। **परासवः** = परागताः असवः येषां ते परासवः।

व्याकरण—विपद्यते = वि + पद् + लट् (भाववाच्य)।

टिप्पणियाँ—चित्राङ्गि = हे सुन्दर अंगों तथा प्रत्यङ्गों से युक्त अर्थात् हे शोभन अंगों से युक्त शरीरवाली। **ममएवशोकेन**—मेरे वियोग से उत्पन्न शोक के कारण ही। **विदीर्णवक्षसा** = जिसका हृदय विदीर्ण हो गया हो (अथवा फट गया हो)—ऐसी (तुम)। **विपद्यते** = मृत्यु को प्राप्त हो जाती हो अथवा मर जाती हो। **हा**! यह विषाद अर्थ में प्रयुक्त अव्यय है। अर्थात्—बड़े ही दुःखकी बात है अथवा हाय। "हा विस्मयविषादयोः" इति विश्वः। **परासवः** = निकल गये हैं प्राण जिनके—मरे हुये—मृत। (स्वयं ही) मर जावेंगे—निष्प्राण हो जावेंगे।

प्रसङ्ग—हंस कहता है कि मेरे वे बच्चे जो कि बड़े मनोरथों के पश्चात्, बड़े भाग्य से, चिरकाल तक प्रतीक्षा करने के उपरान्त उत्पन्न हुये थे, क्षणभर में ही मृत्यु के ग्रास बन जावेंगे—

तवापि हाहा विरहात् क्षुधाकुलाः कुलायकूलेषु विलुठ्य तेषु ते।
चिरेण लब्धा बहुभिर्मनोरथैर्गताः क्षणेनास्फुटितेक्षणा मम ॥१४१॥

म०—ननु मन्मृतौ कथं तेषां मृतिरत आह—तवापीति। हे प्रिये! बहुभिर्मनोरथैश्चिरेण लब्धाः कृच्छ्रलब्धा इत्यर्थः, अस्फुटितेक्षणाः अद्याप्यनुन्मीलितेक्षणा मम ते पूर्वोक्ताः शिशवः तवापि न केवलं ममैवेति भावः। क्षुधाकुलाः क्षुत्पीडिताः तेषु स्वसम्पादितेष्वित्यर्थः, कुलायकूलेषु नीडान्तिकेषु, 'कुलायो नीडमस्त्रियामि'त्यमरः। विलुठ्य परिवृत्य क्षणेन गताः मृतप्रायाः, हा हेति खेदे ॥ १४१ ॥

अन्वय—हा हा, बहुभिः मनोरथैः चिरेण लब्धाः अस्फुटितेक्षणाः मम ते तव अपि विरहात् क्षुधाकुलाः तेषु कुलायकूलेषु विलुठ्य क्षणेन गताः।

संस्कृत-व्याख्या—हा हा=–इति खेदे; [हे प्रिये], बहुभिः = अनेकैः, मनोरथैः = कामनाभिः, चिरेण = बहुकालेन, लब्धाः = प्राप्ताः, अस्फुटितेक्षणाः= अधुनापि अनुन्मीलितनेत्राः, मम, ते = शिशवः तव अपि (न केवलं ममैवेति भावः), विरहात् = वियोगात्, क्षुधाकुलाः = क्षुत्पीडिताः, (सन्तः), तेषु = स्वसम्पादितेषु––इत्यर्थः, कुलायकूलेषु = नीडान्तिकेषु, विलुठ्य = परिवृत्य, क्षणेन गताः = मृतप्रायाः।

हिन्दी अनुवाद—हा हा = महान् दुःखकी बात है [कि––हे प्रिये], बहुभिः = अनेक मनोरथों से, चिरेण = बहुतकाल पश्चात्, लब्धाः = प्राप्त हुये–अथवा उत्पन्न हुये, अस्फुटितेक्षणः = जिनकी आँखे इस समय तक भी पूर्णरूपेण खुल नहीं सकी हैं, ऐसे, मम = मेरे, ते = वे बच्चे, तव अपि = तुम्हारे भी (वे बच्चे), विरहात् = (तुम्हारे) विरह के कारण, क्षुधाकुलाः = भूख से पीड़ित होकर, तेषु = (स्वयं निर्माण किये गये हुये) उन, कुलायकूलेषु = घोंसलों के किनारों पर, विलुठ्य = लोट–पोटकर––छटपटाकर, क्षणेन गताः = क्षणभर में ही मर जावेंगे।

भावार्थ—हे प्रिये ! मेरे अनेक मनोरथों से प्राप्त (उत्पन्न हुये,) अनुन्मीलित नेत्रों वाले, मेरे तथा तुम्हारे भी वे बच्चे तुम्हारे भी वियोग के कारण [किसी पालन-पोषणकर्त्ता के विद्यमान न होने के कारण] भूख से व्याकुल होकर हम दोनों द्वारा निर्मित घोंसलों के अन्दर ही छटपटाकर क्षणभर में ही इस संसार से चल बसेंगे अर्थात् मृत्यु को प्राप्त हो जावेंगे––यह महान् दुःख एवं शोक की बात है।

अलङ्कार—"चिरेणलब्धा" तथा "क्षणेनगताः" में विद्यमान विरोध की दृष्टि से उक्त श्लोक में "विरोधाभास" अलङ्कार की प्रतीति हो रही है।

व्याकरण—क्षणेन = में कार्य समाप्ति के अर्थ में तृतीया-विभक्ति हुयी है।

समास—अस्फुटितेक्षणाः = अस्फुटितानि ईक्षणानि येषां ते (बहुव्रीहि)। **क्षुधाकुलाः** = क्षुधया आकुलाः (तृतीया तत्पु०)। **कुलायकूलेषु** = कुलायानां कूलानि (षष्ठी तत्पु०) इति कुलायकूलानि तेषु।

टिप्पणियाँ—बहुभिःमनोरथैः = अनेकबार की गयी अभिलाषाओं के परिणामस्वरूप। **चिरेण** = बहुत समय तक की गयी प्रतीक्षा के उपरान्त

(पश्चात्) । **लब्धाः** = प्राप्त अथवा उत्पन्न हुये । **अस्फुटितेक्षणाः** = जिनकी आँखे इस समय तक भी (पूर्णरूपेण) नहीं खुल सकी हैं ऐसे (मेरे बच्चे) । **विरहात्** = मैं तो मर ही चुका होऊँगा और मेरे वियोग में तुम भी मर जाओगी—फिर तुम्हारे भी वियोग के कारण (अनाथ हो जाने वाले मेरे बच्चे) । **क्षुधाकुलाः** = भूख से पीड़ित । **तेषु** = उन (स्वयं निर्माण किये गये हुये) घोंसलों में । **कुलायकूलेषु** = घोंसलों के किनारे अथवा छोरों पर । मेरे अथवा तुम्हारे आगमन की प्रतीक्षा में घोसलों के किनारों पर स्थित होकर । **विलुठ्य** = लोटपोटकर–तड़फड़ाकर–छटपटाकर । **क्षणेन गताः** = क्षण भर में ही (थोड़ी देर में ही) चल बसेंगे—मृत्यु को प्राप्त हो जावेंगे ।

प्रसङ्ग—इस भाँति अपनी प्रिया (हंसी) के प्रति कहकर हंस अपने बच्चों को सम्बोधित करते हुये कह रहा है—

सुताः कमाहूय चिराय चुङ्कृतैर्विधाय कम्प्राणि मुखानि कं प्रति ? ।
कथासु शिष्यध्वमिति प्रमील्य च स्रुतस्य सेकाद् बुबुधे नृपाश्रुणः ॥१४२॥

म०—सुता इति । हे सुताः ? चूङ्कृतैश्चूङ्कारश्चिराय कं प्रति कमपि प्रति मुखानि कम्प्राणि चञ्चलानि विधाय कथासु शिष्यध्वं कथामात्रशेषा भवत ? कुत्रापि पित्रोरदर्शनाद् म्रियध्वं, प्राप्तकाले लोट्, मरणकालः प्राप्त इत्यर्थः । इतीति इत्युक्त्वेत्यर्थः । गम्यमानार्थत्वादप्रयोगः । प्रमील्य मूर्च्छां प्राप्य स हंसः स्रुतस्य दयार्द्रभावात्प्रवहतो नृपस्याश्रुणः सेकाद् बुबुधे संज्ञां लेभे । प्रायेणात्र स्वभावोक्तिरूह्या ॥ १४२ ॥

अन्वय—सुताः चुङ्कृतैः कं चिराय आहूये कं प्रति मुखानि कम्प्राणि विधाय कथासु शिष्यध्वं इति प्रमील्य सः सुतस्य नृपाश्रुणः सेकात् बबुधे ।

संस्कृत-व्याख्या—सुताः = पुत्राः, चुङ्कृतैः = "चूँ, चूँ" इत्यव्यक्तशब्दैः, कम्, चिराय = बहुकालपर्यन्तम्, आहूय = आकार्य, कं प्रति, मुखानि, = आननानि, कम्प्राणि = चंचलानि, विधाय = कृत्वा, कथासु शिष्यध्वम् = कथामात्रशेषा भवत—कुत्रापि पित्रोरदर्शनाद् म्रियध्वम्—मरणकालः प्राप्त–इत्यर्थः, इति = इत्युक्त्वा–इत्यर्थः, प्रमील्य = मूर्च्छां प्राप्य, सः = हंसः, स्रुतस्य = दयार्द्रभावात् प्रवहतः, नृपाश्रुणः=नृपस्य राज्ञःनलस्यः अश्रुणः, सेकाद्=सेचनाद्, बुबुधे = संज्ञां लेभे ।

हिन्दी-अनुवाद—हे सुताः ! = हेपुत्रो, चूङ्कृतैः = चूँचूँ शब्द द्वारा, कं चिराय आहूय = किसको देर तक बुला-बुलाकर, [खाना माँगोगे ?], [तथा

बोलना सीखने के निमित्त] कं प्रति = किसकी ओर, मुखानि = मुखों को, कम्प्राणि = कम्पित अथवा कम्पनपूर्ण, विधाय = करके, कथासु शिष्यध्वम् = कथामात्र शेष रह जाओगे—(कहीं पर भी अपने मां बाप को न पाकर मृत्यु को प्राप्त हो जाओगे), इति = ऐसा कहकर, प्रमील्य = मूर्च्छा प्राप्त करके, सः = वह हंस, स्रुतस्य = बहते हुये, नृपाश्रुणः = राजा के आँसुओं के, सेकात् = सेक से, बुबुधे = चेतनता को प्राप्त हुआ ।

भावार्थ—हे पुत्रो ! चूँ-चूँ करते हुये बहुत समय तक किसे बुला-बुलाकर [खाना माँगोगे] ? तथा अपने मुखों को कँपाते हुये किससे बोलना सीखोगे ? [अर्थात् किसी से नहीं,] अतएव कथाशेष हो (मर) जाओगे । इतना कहकर वह हंस मूर्छित हो गया । हंस के उपर्युक्त वचनों को सुनकर तथा उसकी मूर्छित अवस्था को देखकर राजा का हृदय दया से भर गया और उसकी अश्रुधारा प्रवाहित होने लगी । राजा के वे आँसू हंस के ऊपर गिरे और उनके सिंचन से हंस को चेतनता प्राप्त हुयी अर्थात् वह होश में आया ।

रस—हंस द्वारा किये गये उपर्युक्त विलाप-वर्णन (१।१३५ से १।१४२ तक) में "करुण-रस" की प्रतीति स्पष्टरूपेण हो रही है ।

अलङ्कार—उक्त श्लोक में "स्वभावोक्ति" अलङ्कार की प्रतीति हो रही है ।

व्याकरण—शिष्यध्वम् = शिष् + लोट् (प्राप्तकाल अर्थ में) ।

समास—नृपाश्रुणः = नृपस्य अश्रुणः (षष्ठी तत्पु०) इति नृपाश्रुणः ।

टिप्पणियाँ—चूङ्कृतैः="चूँ चूँ" इस प्रकार के शब्दों द्वारा । **कम्प्राणि**= चंचल । **शिष्यध्वम्** = कथामात्रशेष रह जाओगे । **प्रमील्य** = मूर्छित होकर, मूर्छा को प्राप्त कर । **स्रुतस्य** = बहते हुये—प्रवाहित होते हुये । **नृपाश्रुणः** = राजा नल के आँसू से (अश्रुधारा से) । **बुबुधे** = जगा-होश में आया, चेतनता को प्राप्त किया—सचेत हुआ ।

प्रसङ्ग—इस प्रकार विलाप करते हुये उस हंस को राजा ने छोड़ दिया—

इत्थममुं विलपन्तममुञ्चद्दीनदयालुतयाऽवनिपालः ।
रूपमदर्शि धृतोऽसि यदर्थं गच्छ यथेच्छमथेत्यभिधाय ॥१४३॥

म०—अत्र सर्वत्र 'भिन्नसर्गान्तैरि'ति काव्यलक्षणाद् वृत्तान्तरेण श्लोकद्वयमाह—इत्थमित्यादिना । इत्थं विलपन्तं परिदेवमानममुं हंसमवनिपालो

नलो दीनेष्वार्त्तेषु दयालुतया कारुणिकतया रूपमाकृतिरदर्शि अपूर्वत्वादवलोकितं, यस्मै यदर्थं रूपदर्शनार्थमेव धृतो गृहीतोऽसि, अथ यथेच्छं गच्छेत्यभिधाय अमुञ्चत् मुक्तवान् । 'दोधकवृत्तमिदम्भभभा गावि'ति लक्षणात् ॥ १४३ ॥

अन्वय—दीनदयालुतया अवनिपालः "यदर्थं धृतः असि (तत्) रूपं अदर्शि । अथ यथेच्छं गच्छ" इति अभिधाय इत्थं विपलन्तं अमुं अमुञ्चत् ।

संस्कृत-व्याख्या—दीनदयालुतया = दीनेषु आर्तेषु दयालुतया कारुणिकतया, अवनिपालः = राजा नलः, "यदर्थम् = यस्मै प्रयोजनाय, धृतः = गृहीतः, असि, (तत्), रूपम् = आकृतिः, अदर्शि = दृष्टम् , अथ = अतः परम्, यथेच्छम् = स्वेच्छानुसारम् , गच्छ", इति = इत्थम्, अभिधाय = उक्त्वा, इत्थम् = पूर्वोक्तप्रकारेण, विलपन्तम् = विलापं कुर्वन्तम्, अमुम् = हंसम्, अमुञ्चत् = मुक्तवान् ।

हिन्दी-अनुवाद—दीनदयालुतया = दीनों के प्रति दयालु होने के कारण, अवनिपालः = राजा नल ने, "यदर्थम् = जिस (उद्देश्य) के लिये, धृतः असि= तुमको पकड़ा था, (तत् = उस), रूपम् = रूप को, अदर्शि = देख लिया । अथ=अब, यथेच्छम्=अपनी इच्छानुसार, गच्छ = जाओ—विचरण करो ।" इति = ऐसा, अभिधाय = कहकर, इत्थम्=पूर्वोक्त प्रकार से, विलपन्तम् = विलाप करते हुये, अमुम्=उस हंस को, अमुञ्चत्=छोड़ दिया ।

भावार्थ—इस प्रकार (१।१३५–१४२) विलाप करते हुये उस हंस को, राजा नल ने यह कहकर "कि हे हंस ! मैंने तुम्हारे रूप को देखने के लिये ही तुमको पकड़ा था—वह मैंने देख लिया । अब तुम अपनी इच्छानुसार जहाँ चाहो, वहाँ जाओ" छोड़ दिया ।

अलङ्कार—इस श्लोक में "अनुप्रास" अलङ्कार है ।

छन्द—उपर्युक्त वृत्त में—"दोधक" नामक छन्द है । लक्षण—"दोधकवृत्तमिदम्भभभागौ" ।

भगण	भगण	भगण	गुरु	गुरु
ऽ।।	ऽ।।	ऽ।।	ऽ	ऽ
इत्थम	मुंविल	पन्तम	मु	ञ्चत्
दीनद	यालुत	यावनि	पा	लः ।

व्याकरण—दयालुः = दय् + आलुच् । **दीनदयालुतया** = दीनदयालु + तल् + टाप् । **अदर्शि** = दृश् + लुङ् (कर्मवाच्य प्रथमपुरुष—एकवचन) ।

समास—दीनदयालुतया = दीनेषु दयालुः इतिदीनदयालुः, तस्य भावः दीनदयालुता तया। **यथेच्छम्**=इच्छामनतिक्रम्य इति यथेच्छम् (अव्ययीभाव)।

टिप्पणियाँ—दीनदयालुतया = दीनों (दुखियों-गरीबों) के प्रति कृपालु (दयालु) होने के कारण। **धृतःअसि** = पकड़े गये हो—पकड़ा था। **विलपन्तम्** = विलाप करते हुये।

प्रसङ्ग—हंस के पकड़ लिये जाने पर उसके साथियों द्वारा पहले अश्रुधारा प्रवाहित की गयी थी। अब हंस के छूट जाने पर हर्ष के कारण उनके अश्रु बह निकले—

आनन्दजाश्रुभिरनुस्रियमाणमार्गान् प्राक्शोकनिर्गलितनेत्रपयःप्रवाहान्।
चक्रे स चक्रनिभचङ्क्रमणच्छलेन नीराजनां जनयतां निजबान्धवानाम्॥

म०—आनन्देति। हंसः चक्रनिभचङ्क्रमणस्य मण्डलाकारभ्रमणस्य छलेन नीराजनाञ्जनयतां कुर्वतां निजबान्धवानां 'बन्धमुक्तं बान्धवा नीराजयन्ती'ति समाचारः। प्राङ्मोचनात्पूर्वं शोकेन निर्गलिता निःसृता नेत्रपयःप्रवाहा बाष्पपूरास्तानानन्दजाश्रुभिरानन्दबाष्पैरनुस्रियमाणमार्गान् अनुगम्यमानमार्गांश्चक्रे कृतवान्। अत्र पक्षिणां स्वभावसिद्धं बन्धमुक्तं स्वयूथ्यभ्रमणं छलशब्देनापह्नुत्य तत्र नीराजनात्वारोपादपह्नवभेदः। अत्र चमत्कारित्वान्मङ्गलाचाररूपत्वाच्च सर्वत्र सङ्गीतश्लोकेष्वानन्दशब्दप्रयोगः, यथाह भगवान् भाष्यकारः—'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि विहितानि शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्ति अध्येतारश्च प्रवक्तारो भवन्ती'ति। वसन्ततिलकावृत्तम् 'उक्ता वसन्ततिलका तभजा जगौ गा इति लक्षणात्। सर्गान्तत्वाद् वृत्तभेदः, यथाह दण्डी—सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसन्धिभिः। सर्वत्र भिन्नसर्गान्तैरुपेतं लोकरञ्जनम् ॥' इति ॥ १४४ ॥

अन्वय—स चक्रनिभचङ्क्रमणच्छलेन नीराजनां जनयतां निजबान्धवानां प्राक्शोकनिर्गलितनेत्रपयःप्रवाहान् आनन्दजाश्रुभिः अनुस्रियमाणमार्गान् चक्रे।

संस्कृत व्याख्या—सः = हंसः, चक्रनिभचङ्क्रमणच्छलेन = चक्रनिभं मण्डलाकारं चङ्क्रमणं भ्रमणं तस्य छलेन व्याजेन, नीराजनाम् = आरार्तिकाम्, जनयताम् = कुर्वताम्, निजबान्धवानाम् = स्वीयमित्राणाम्, प्राक् = मोचनात् पूर्वम्, शोकनिर्गलितनेत्रपयःप्रवाहान् = शोकेन शुचा निर्गलितान् (निर्गमित पाठोपि लभ्यते), निःसरितान् नेत्रपयःप्रवाहान् अश्रुपूरान् आनन्दजाश्रुभिः = आनन्दबाष्पैः अनुस्रियमाणमार्गान् = अनुगम्यमानमार्गान्, चक्रे = कृतवान्।

हिन्दी-अनुवाद—सः = उस (हंस) ने, चक्रनिभसङ्क्रमणच्छलेन = मण्डलाकार भ्रमण के बहाने से, नीराजनां = आरती, जनयताम् = करते हुये, निजबान्धवानाम् = अपने बंधुओं के, प्राक् = छोड़ दिये जाने से पहले वाले, शोकनिर्गलितनेत्रपयःप्रवाहान् = शोक के कारण निकले हुये आँसुओं के प्रवाह को, आनन्दजाश्रुभिः = (अब छूट जाने के पश्चात्) हर्ष से उत्पन्न आँसुओं से, अनुस्रियमाणमार्गान् = अनुसरण किये जाते हुये मार्ग वाला, चक्रे = कर दिया—बना दिया।

भावार्थ—राजा नल द्वारा हंस के पकड़लिये जाने पर उसके साथी बन्धुओं ने रोकर तथा उस हंस के बंधनमुक्त (छूट जाना) हो जाने पर आँसू बहाने लगे तथा उस बंन्धनमुक्त हंस के चारों ओर आ-आकर बैठते हुये ऐसे प्रतीत हो रहे थे कि मानों उस बंन्धनमुक्त हंस की आरती सी उतार रहे हों।

अलङ्कार—उक्त श्लोक में अनुप्रास अलङ्कार तो स्पष्ट ही है यद्यपि पक्षियों का यह स्वभावसिद्ध धर्म है कि वे अपने साथी के बन्धनमुक्त हो जाने पर हर्षित हो होकर उसके समीप आ-आकर चारों ओर बैठा करते हैं किन्तु इस मण्डलाकार बैठने में महाकवि 'छल' शब्द द्वारा उसका अपह्नव करके आरती किये जाने का आरोप किया है—अतः यहाँ अपह्नुति अलङ्कार भी है।

व्याकरण—चङ्क्रमणम् = क्रम् + यङ् + ल्युट्। **अनुस्रियमाण** = अनु + सृ + शानच् (कर्मवाच्य)।

समासः—चक्रनिभचङ्क्रमणच्छलेन = चक्रेण निभं (सदृशम्) चक्रनिभम् (तृतीया तत्पु०), चक्रनिभं चङ्क्रमणं (कर्मधारय)—इति चक्रनिभचङ्क्रमणम्, तस्य छलम् (षष्ठी तत्पु०)—इति चक्रनिभचङ्क्रमणच्छलम्—तेन। **प्राक्शोकनिर्गलितनेत्रपयःप्रवाहान्** = शोकेन निर्गलिताः शोकनिर्गलिताः (तृतीया तत्पु०), प्राक् शोकनिर्गलिताः (सुप्सुपा समास), प्राक्शोकनिर्गलिताः नेत्रपयःप्रवाहाः (कर्मधारय) इति प्राक्शोकनिर्गलितपयःप्रवाहाः, तान्।

टिप्पणियाँ—चक्रनिभचङ्क्रमणच्छलेन = मण्डलाकार रूप में किये गये भ्रमणों के बहाने से। **नीराजनाम्** = आरती को। **जनयताम्** = उत्पन्न करते हुये—करते हुये। **निजबान्धवानाम्** = अपने ही झुंड में रहने वाले बन्धु सदृश पक्षियों के। **प्राक्शोकनिर्गलितनेत्रपयःप्रवाहान्** = छोड़े जाने से पहले (जब हंस राजा नल द्वारा पकड़ लिया गया था उस समय पकड़े जाने से उत्पन्न हुये) शोक के कारण निकले हुये आँसुओं के प्रवाह को—अथवा

अश्रुधारा को। **आनन्दजाश्रुभिः** = [हंस जब राजा द्वारा छोड़ दिया गया तब उसकी मित्रमंडली में रहने वाले पक्षियों द्वारा हर्ष के कारण अश्रुधारा को प्रवाहित किया] (इस भाँति के) आनन्द के कारण उत्पन्न हुये आँसुओं से। **अनुस्रियमाणमार्गान्** = अनुसरण किये जाते हुए मार्ग से युक्त अथवा मार्ग वाला। **चक्रे** = किया—कर दिया—बना दिया।

नैषध महाकाव्य के सभी सर्गों के अन्तिम श्लोक में "आनन्द" पद का प्रयोग किया गया है जो कि चमत्कारोत्पादक तथा मङ्गलपूर्ण भावना का द्योतक है। अतः इस काव्य को "आनन्दाङ्क काव्य" भी कहा जाता है। ऐसा करके महाकवि श्री हर्ष ने शिष्टाचार का ही पालन किया है जैसा कि भगवान् नामक भाष्यकार ने कहा भी है—"मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि विहितानि शास्त्राणि प्रथन्ते वीरपुरुषाण्यायुष्मत्पुरुषाणि च भवन्ति अध्येतारश्च प्रवक्तारो भवन्तीति"।

छन्द—काव्यशास्त्रीय सिद्धान्त के अनुसार महाकाव्य के अन्त में छन्द-परिवर्त्तन हो जाना भी आवश्यक कहा गया है। जैसा कि महाकवि दण्डी ने कहा भी है :—"सर्गैरनतिविस्तीर्णैः श्राव्यवृत्तैः सुसन्धिभिः। सर्वत्र भिन्नसर्गान्तैरुपेतं लोकरञ्जनम् ॥" इसी आधार पर १४३ वें तथा १४४ वें श्लोकों में छन्दपरिवर्त्तन किया गया है। उक्त वृत्त में "वसन्ततिलका" नामक छन्द है। लक्षण—"उक्ता वसन्ततिलका तभजाजगौगाः"। अर्थात् यह १४ वर्णों का वृत्त होता है। इसके प्रत्येक चरण में क्रमशः तगण, भगण, जगण, जगण तथा दो गुरु वर्ण आते हैं :—

तगण	भगण	जगण	जगण	गुरु	गुरु
ऽऽ।	ऽ।।	।ऽ।	।ऽ।	ऽ	ऽ
आनन्द	जाश्रुभि	रनुस्रि	यमाण	मा	र्गान्
प्राक्छोक	निर्गलि	तनेत्र	पयःप्र	वा	हान्। इत्यादि ॥

प्रसङ्ग—अब महाकवि प्रथम सर्ग की समाप्ति का वर्णन भी श्लोक द्वारा ही करते हैं—

> श्रीहर्षं कविराजराजिमुकुटालङ्कारहीरः सुतं
> श्रीहीरः सुषवे जितेन्द्रियचयं मामल्लदेवी च यम्।
> तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या महा-
> काव्ये चारुणि नैषधीयचरिते सर्गोऽयमादिर्गतः ॥ १४५ ॥

म०—अथ कविःकाव्यवर्णनमाख्यातपूर्वकं सर्गसमाप्तिं श्लोकबन्धेनाह—श्रीहर्षमिति । कविराजराजिमुकुटानां विद्वच्छ्रेष्ठश्रेणीमुकुटानाम् अलङ्कारभूतो हीरो वज्रमणिःहीरो नाम विद्वान् श्रीहर्षनामानं यं सुतं सुषुवे जनयामास, मामल्लदेवी नाम स्वमाता सा च यं सुतं सुषुवे, तस्य श्रीहर्षस्य यश्चिन्तामणिमन्त्रः तस्य चिन्तनमुपासना तस्य फले फलभूते 'शृङ्गारभङ्ग्या' शृङ्गाररसेन चारुणि निषधानां राजा नैषधो नलः तदीयचरिते नलचरितनामके महाकाव्ये अयमादिः प्रथमः सर्गो गतः समाप्त इत्यर्थः । एवमुत्तरत्रापि द्रष्टव्यम् ॥ १४५ ॥

इति 'मल्लिनाथसूरि-विरचितायां समाख्यायां नैषधटीकायां
प्रथमः सर्गः समाप्तः ॥ १ ॥

अन्वय—कविराजराजिमुकुटालङ्कारहीरः श्री हीरः मामल्लदेवी च यं जितेन्द्रियचयं श्रीहर्षं सुतं सुषुवे, तच्चिन्तामणिमन्त्रचिन्तनफले शृङ्गारभङ्ग्या चारुणि नैषधीयचरिते महाकाव्ये अयं आदिः सर्गः गतः ।

संस्कृत व्याख्या—कविराजराजिमुकुटालङ्कारहीरः = कविराजराजिमुकुटानां विद्वच्छ्रेष्ठश्रेणिमौलीनां अलङ्कारः अलङ्कारभूतः हीरः वज्रमणिः, श्रीहरिः=श्री हीरो नाम पिता, मामल्लदेवी = एतदाख्या माता, च, यम् , जितेन्द्रियचयम् = जितः इन्द्रियचयः इन्द्रियसमूहः येन तादृशम् , श्री हर्षम् = श्री हर्षनामानम्, सुतम् = पुत्रम् , सुषुवे = जनयामास, तच्चिन्तामणिमन्त्रचिन्तनफले = तस्य श्री हर्षस्य यः चिन्तामणिमन्त्रः तस्य चिन्तनं उपासना तस्य फले फलभूते, शृङ्गारभङ्ग्या=शृङ्गाररसवृत्त्या, चारुणि = रमणीये, नैषधीयचरिते=नैषधीयं नलसम्बन्धि चरितं विद्यते यस्मिन् एवंविधे [अथवा–निषधानां राजा नैषधः नलः तदीयचरिते नलचरितनामके], महाकाव्ये, अयम्, आदिः = प्रथमः, सर्गः, गतः = समाप्तः ।

हिन्दी-अनुवाद—कविराजराजिमुकुटालङ्कारहीरः = श्रेष्ठकवियों की पंक्ति के मुकुटों के आभूषणस्वरूप हीरे (के सदृश), श्री हीरः=श्री हीर (नामक पिता तथा), मामल्लदेवी च=और मामल्लदेवी (नाम की माता) ने, यम् = जिस, जितेन्द्रियचयम्=सम्पूर्ण इन्द्रियों के विजेता, श्रीहर्षं सुतम् = श्री हर्ष नाम के पुत्र को, सुषुवे=उत्पन्न किया, तच्चिन्तामणिमन्त्रचिन्तनफले = उसके चिन्तामणि नामक मन्त्र की उपासना के फलस्वरूप, शृङ्गारभङ्ग्या=शृंगार रस की प्रधानता से, चारुणि = मनोहर, नैषधीयचरिते = नैषधीयचरित नामक, महाकाव्ये = महाकाव्य में, अयम् = यह, आदिः = प्रथम, सर्गः, गतः = समाप्त हुआ ।

व्याकरण—नैषधीय = निषधानां राजा नैषधः (नलः), तस्य इदं नैषधीयम्—नैषध + छ ("वृद्धाच्छः" सूत्रसे) तदनन्तर छ के स्थान पर "ईय्" आदेश होकर।

समास—कविराजराजिमुकुटालङ्कारहीरः = कवीनां राजानः कविराजाः, कविराजानां राजिः इति कविराजराजिः, तस्याः मुकुटानि—इति कविराजराजिमुकुटानि, तेषां अलङ्कारहीरः अलङ्कारभूतः हीरः (मध्यलो० स०)—इति। **जितेन्द्रियचयम्** = जितः इन्द्रियचयः येन तादृशम्। **चिन्तामणिमन्त्रचिन्तनफले** = चिन्तामणिमन्त्रस्य ब्रह्मणः मन्त्रस्य चिन्तनं उपासना तस्य फले। **नैषधीयचरिते** = निषधानां राजा नैषधः, तस्य इदं नैषधीयम्, नैषधीयं चरितं यस्मिन् तत् नैषधीयचरितम्—तस्मिन्।

टिप्पणियाँ—कविराजराजिमुकुटालङ्कारहीरः = श्रेष्ठकवियों के समूह के मुकुट के अलङ्कारभूत हीरकमणि के सदृश (अर्थात् अतिश्रेष्ठ एवं सुयोग्य महाकवि)। **श्री हीरः** = महाकवि श्री हर्ष के पिता का नाम श्री हीर था। **मामल्लदेवी** = यह श्री हर्ष की माता का नाम था। **जितेन्द्रियचयम्** = जिसने इन्द्रियसमूह (अथवा सभी इन्द्रियों) पर विजय प्राप्त कर ली थी ऐसे। **सुषुवे** = उत्पन्न किया। **चिन्तामणिमन्त्रचिन्तनफले** = चिन्तामणि नामक मन्त्र के चिन्तन के फलस्वरूप। अर्थात् महाकवि श्रीहर्ष ने चिन्तामणि नामक मन्त्र का चिन्तन किया था और उसके फलस्वरूप इस महाकाव्य का निर्माण हुआ था। **शृङ्गारभङ्गया** = शृंगार रस (की प्रधानता) से परिपूर्ण। **नैषधीयचरिते** = निषध देश के राजा नल से सम्बन्धित "नैषधीयचरित" नामक महाकाव्य में। **गतः** = समाप्त हुआ।

उक्त श्लोक में महाकवि श्री हर्ष ने अपने माता-पिता का परिचय दिया है। उनके पिता का नाम श्री हीर तथा माता का नाम मामल्लदेवी था। श्री हीर श्रेष्ठकवियों के मुकुट की मणि के सदृश थे। महाकवि श्रीहर्ष को "चिन्तामणि" नामक मन्त्र सिद्ध था जिसके फलस्वरूप उन्होंने "नैषधीयचरित" नामक महाकाव्य की रचना की।

छन्द—इस अन्तिमवृत्त में शार्दूलविक्रीडित" नामक छन्द है। **लक्षण—** "सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितम्"। अर्थात् यह १९ वर्णों का

वृत्त है। इसमें १२,७ पर विश्राम होता है। इसमें क्रमशः "मगण, सगण, जगण, सगण, तगण, तगण" और गुरु वर्ण आते हैं।

मगण, सगण, जगण, सगण, तगण, तगण, गुरु

रूप— ऽऽऽ ।।ऽ ।ऽ। ।।ऽ ऽऽ। ऽऽ। ऽ

श्री हर्षं कविरा जराजि मुकुटा लङ्कार हीरः सु तम्।

श्री हीरः सुषुवे जितेन्द्रि यचयं मामल्ल देवी च यम्॥ इत्यादि।

इत्युत्तरप्रदेशस्थ 'मैनपुरी' मण्डलान्तर्गत 'महावतपुर' ग्रामनिवासिनः

श्रीमतो दयानन्दमहोदयस्य श्रीमत्याः सुखदेव्याश्च तनुजनुषा

वृन्दावनस्थगुरुकुलविश्वविद्यालयाधीतविद्येन,

पी० एच० डी० इत्युपाधिधारिणा

आचार्यसुरेन्द्रदेवशास्त्रिणा

विरचिता "आशुबोधिनी" व्याख्या समाप्ता।

॥ समाप्तश्चायं प्रथमः सर्गः॥

श्लोकानुक्रमणिका